च्छाकोशम्मधश्चुतम्। आहार्य्याऽइतो। अर्ज्जनोआ।

र २ २ १ १ र २ १ ५
त्कोआ३ह्वा। व्याता२। प्रियःसूनुर्न्नमोवा३ओ२३४वा।

४ ५ १ २ र १
जाऽयेऽहायि ॥(२) प्रियःसूनोहो२यिनमर्ज्जयाः। प्रा

र १ १ १
यःसूनुर्न्नमर्ज्जयः। तमायिंह्वा३यिन्वा। तियपसो।

'२ १ १ १ र र २ १ ५
यथाऽहायि। राया२म्। नदोषुवागभोवा३ओ२३४वा।

४ ५
स्ताऽयोऽहायि(३) ॥ १४ * ॥ [१०]

२ १र ४र ५र
॥ हिंहिङ्कारंवामदेव्यम् ॥ प्रसोमा२३देववीतयायि।

१ र र र २ ३र २
सायिन्धुर्न्नपिप्येवर्णसाऽग्नोः पयसामदिरोऽनजीहो ३।

१ १ १ १ र र २ ३र २ १
ऊम्मा२। गृ२३वीः। अच्छाकोशाम्मधोहो३। ऊम्मा

---

* ऋ० मा० १८म० १अ० १४सा०।

१ ४ ५ २ १र ४
२। श्रुताम। औ२३होवा ॥(१) अच्छाको ३ २ ३ म

५ १ र र र र र
मधुश्रुताम्। आच्छाकोममधुश्रुतमाहर्य्यतोअर्जुनो

१ २ ३र २ १ १ १ १ १ ३र
आत्कऔहोइ। ऊम्मा२। व्या२३ता। प्रियस्कनुर्नमौ

२ १ १० २ ४ ५ २ १
होइ। ऊम्मा२। जिया। औ३होवा ॥(२) प्रियःक्र२

४ ५ १ र र
नुर्नमर्ज्जियाः। प्रायःक्रनुर्नमर्ज्जियस्तमीहिन्वन्त्यपसो

२ ३र २ १ १ २ १र २ ३र
यथौहोइ। ऊम्मा२। रा२३थाम्। नद्दीषुवाऽगभौ

२ १ १ ४ ५ ४
होइ। ऊम्मा२। स्तियोः। औ२३होवा। होः५

ई। डा(३)॥१७॥ [११]

२र र १ २र १र १ १ १ २ १
॥ काण्वरथतरं ॥ प्रासोमदेववीतयायि। सिन्धुर्न

२ १ २ २ र र र र
पायि। ष्यइआर्णाइसा। अंशोःपयसामदिरोनजागृ

१ ४र २ १र ५ २
वा२३४ऐहि। अच्छाको२३४श्याम्। मधा३१उवा२३।

१ २ ३ २ २र र १र २ १ १ १ २ १र
ए३। श्रुतमा ॥(१) आच्छाकोश्रम्मधुश्रुताम्। अच्छा

---

० ऊ० गा० १९५० २अ० १७सा०।

कोशाम्। माधुश्चूतम्। आद्दर्य्यतोअर्जुनोअत्के
अव्यताऽ३४ऐद्दी। आ३द्दार्य्या३तो। अर्जुनोअत्केअ
व्यताऽ३४ऐद्दी। पियःस्ऽ३४नूः। ममा३१उवाऽ३। ए३।
जियआ॥(२) प्रायःसूनुर्नर्मर्जियाः। प्रियःसूनूः। ना
३माज्जा३याः। तमीएद्दिन्वन्त्यपसोयथाऽ३४मैद्दी। ना
३मायिएद्दा३यिन्वा। तियपसोयथारथाऽ३४मैद्दी। नदौ
षूऽ३४वा। गभा३१उवाऽ३। ए३। स्तियोवा ॥६*॥[१२]२०

अथ तृतीयतृचे, † प्रथमा।

प्रसोमासोमदच्युतःश्रवसेनोमधोनाम्।
सुताविदथेअक्रमुः॥ १ ‡॥

---

० ऊ० मा० २२प्र० २अ० ६सा०।

† 'उक्तोमाध्यन्दिनः पवमानः, उक्तानि गायत्राणि ० ० ०। आर्भवः पवमानो यक्तव्यः तस्य ज्योतिष्टोमवत् छन्दांसि साम्नाद्यानामधेयैरित्युच्यते'—इति वि०।

‡ ह० आ० ५, २, १ (१भा० २०पृ०)=ऋ० वे० ६, ८, २२, १।

"सोमासः" सोमाः "मदच्युतः" मदस्राविणः "सुताः" अभिषुताः सन्तः "विदथे" यज्ञे "मघोनां" हविष्मतां "नः" अस्माकं "अवसे" अन्नाय कीर्त्तये वा "प्र अक्रमुः" प्र गच्छन्ति ॥

"मघोनां"-"मघोनः"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ १२ ३ १ २ ३ २
आदीꣳहꣳसोयथागणंविश्वस्याविवशन्मतिम्।

२ ३ १ २१
अत्योनगोभिरज्यते ॥ २ * ॥

"आत्" अपिच "ईम्" अयं सोमः "हंसो† यथा" "गणं" जनसङ्घं स्वगतिविशेषेण स्वनेन वा प्रविशति, तद्वत् "विश्वस्य" सर्वस्य स्तोतृजनस्य "मतिं" स्तुतिं बुद्धिं वा "अवीवशत्" वशं नयति; स च सोमः "अत्यो न" अश्व इव "गोभिः" गव्यैरदकै र्वा "अज्यते" सिच्यते स्निग्धीक्रियते ॥ २ ॥

अथ तृतीया।

१ २ १ १ २ १ १ २ १ २ ३ १ २
आदीन्वितस्यपोषणोहरिꣳहिन्वन्त्यद्रिभिः।

१ २ १ २ ३ १ २
इन्दुमिन्द्रायपीतये ॥ ३ ‡ ॥ २१

---

* ऋ० वे० ९, ८, २२, २।

† 'हंसः—आदित्यः'—इति वि०।

‡ ऋ० वे० ९, ८, २२, २। अथैव च पुनः ५, २, ४, २। परं तत्र तु "धनञ्जय सख"—इति पाठः।

"आत्" अभिष्व "ईम्" एनं "हरिं" हरितवर्णम् "इन्दुम्" सोमं "क्षितस्य" ऋषेः "योषणाः"* अङ्गुलयः "अद्रिभिः" ग्रावभिः "हिन्वन्ति"। किमर्थम्? इन्द्राय इन्द्रस्य "पीतये" पानार्थम् ॥ ३ ॥ २१

१ र २ र र १ २
॥ सꣳहितम् ॥ प्रसोमासोम । दा२च्युताः । अ

१ २ १ २
वा२ । सा२३यिनो । मा२घोनाम् । सू२३ताः ।

१ ७र २
वा२यिदा । धेआ२३ । हाउवा३ । का २३४

५
मूः (१) ॥ १४ ॥ [१]

१ र २र १र १ २
॥ आग्नुभार्गवम् ॥ प्रसोमासोम । दच्यू३ताः ।

१ र २ १ ३ ५ १ २
आवसिनोइ । मा२घो२३४नाम् । सुतावा१यि । दा२ ।

३र २ १ ५ ५
धेआइ । का२३४मोहाय(१) ॥ २० ॥ [२] २१

---

* 'योषणाः—युमिश्रणे, मिश्रणकर्त्तारः ऋत्विजः,—दनि वि०।

† छ० मा० १प्र० २अ० १४सा०।

‡ ऊ० मा० ११५० १अ० २०सा०।

अथैकत्रिंशे चतुर्थसूक्ते*—प्रथमा।

३ १ २ ३१२ २२१२ ३ १ २
अयापवस्वदेवयूरेभन्पर्येषिविश्वतः।

२ ३ १ २
मधोर्धारामसृक्षत ॥ १ ॥†

हे सोम! "देवयुः" देवान् कामयमानः त्वम् "अया" अनया धारया "पवस्व" क्षर। ततः "रेभन्" शब्दायमानः "पवित्रं" "विश्वतः" "पर्येषि" परिगच्छसि। अनन्तरं "मधोः" मदकरस्य तव "धाराः" आत्मीयाः "असृक्षत" सृज्यन्ते ॥

अत्र द्वितीय-तृतीय-पादौ व्यत्ययेन ‡ पाठौ ॥ १ ॥

अथैकत्रिंशे पञ्चमे—प्रथमा ¶।

१ २ ३ १३ ३ २ ३ १ २ ३ १ २
पवतेहर्यतोहरिरतिक्रराॅंसिरᳬह्या।

१क २२ ३ १ २ ३ २१ १ २
अभ्यर्षंस्तोत्रभ्योवीरवद्यशः ॥ २ ॥§

---

* मूले, गानग्रन्थे, षट्कारनये, विवरणमते चेदमपि सूक्तं तृचं; तथाचेदमेव सूक्तमस्य प्रपाठकस्यान्त्यमिति।

† ऋ० वे० ७, ५, ११, ४।

‡ तथाच—"अयापवस्वदेवयुर्मधोर्धारामसृक्षत। रेभन्पर्येषिविश्वतः"—इति ऋ० पाठः।

¶ मूलादिमते त्रियस्तक् द्वाविंशति-सूक्तस्य द्वितीयेति।

§ ऋ० आ० ६, २, ३, ११ (२ भा० २२० पृ०) = ऋ० वे० ७, ५, ११, ३।

"हर्य्यतः" स्पृहणीयः "हरिः" हरितवर्णः सोमः "रंह्या" हतीयाया आकारः साधुवेगेन "ह्वरांसि" कुटिलानि अनृजूनि पवित्राणि "अति पवते" अतीत्य गच्छति। किं कुर्व्वन्? स्तोतृभ्यः "वीरवत्" पुत्रयुक्तं "यशः" "अभ्यर्षन्" अभिगमयन् पवते ॥ २ ॥

अथैकत्रिंशे षष्ठे प्रथमा *।

१ २ ३ १र २र ३ २ २ ३ १ २ ३ १र ३र

प्रसुन्वानायान्धसोमर्त्तीनवष्टतद्वचः।

३ १ २ ३ १ १ ३ २ ३ १र २र

अपस्वानमराधस॰ हतामखन्नभृगवः ॥ ३ † ॥ २२

॥ इति प्रथमः प्रपाठकः ॥

"सुन्वानाय" [षष्ठ्यर्थे चतुर्थी (२,३,६२वा०)] सुन्वानस्य अभिषूयमाणस्य "अन्धसः" अदनीयस्य सोमस्य "तत्" प्रसिद्धं "वचः" वचनं घोषं "मर्त्तः" मारकः कर्मविघ्नकारी "न प्रवष्ट" न भजतां न शृणोत्विति यावत्। तथा हे स्तोतारः! "अराधसं" साधकर्म-रहितं "ध्वानम्" "अपहत"। तत्र दृष्टान्तः—"मखं न" यथा पुरा अपराद्धं मखम् एतन्नामानं "भृगवः" अपहृतवन्तः तथा अपहतेत्यर्थः ॥

"प्रसुन्वानाय"-"सुन्वानस्य","वष्ट"-"हृत"—इति पाठौ ॥१॥२२

---

* मूलादिनये त्रियष्टक् द्वाविंशति-सूक्तस्य तृतीयेति।

† ऋ० आ० ६, २, १, ९ (२भा० १६८ पृ०) ८ ऋ० वे० ७, ५, १, १८= अत्रैवोत्तरायां पुनः ६, २, ३, १।

॥ आह्वारम् ॥ पव। तेद्वा३४। औद्वोपुर्य्यतोद्वरा यिः। अतिक्षराण्सिरण्। द्वा२३या३४। अर्षा। स्तो तभ्योवायि। रा३वद्य। ष्णा२३४५:(३) ॥ १६ * ॥[१]

॥ गौरोवितम् ॥ प्रस्तु। ष्वाना ३। यअन्धसाः। म त्तीनवष्टतद्वचा२३:। आपस्वाना३१२३म्। अरा५धमा म्। द्वातामखा३१२३म्। नभोवा। गा५वोर्द्वायि ॥

(३)॥ १७ † ॥[२]

॥ सुज्ञानम् ॥ पवतेद्वा। र्य्यतोद्वरायिः। अजिक्रा रा२। सिरण्द्विया। अभियार्षा२। स्तोतृ। भ्यो र्वा२३४औद्वोव्रा। रवद्यण्यय३उपा२३४५(२) ॥१५ ‡॥[३]

॥ काश्यीजम् ॥ पवतेद्वा। र्य्यतोद्वा२३रा३४यिः।

---

* ऊ० गा० १६प्र० २ऋ० १६सा०।

† ऊ० गा० १प्र० २ऋ० १७सा०।

‡ ऊ० गा० ६प्र० २ऋ० १५सा०।

२ २ २ २ २ २
अजिङ्करा। सिरञ्ह्रा२३या३४। अभियर्षा। स्तोतृभ्यो

२ १ ३ ५२ २ २
वीरवत्। या२। श्रा २ ३ ४। औहोवा। ज २ ३ ४

५
पा(२) ॥ १६ * ॥ [४]

२ १ २ ४ ५ ५ २ ३
॥ पौष्कलम् ॥ पवति३ह्यर्य्य। तोह्रा २ ३ ४रायिः।

२ १ २ १ २ ३ ५ २ १ ७२
अतिङ्करा। मायिरञ्ह्रा२३४या। अभाअर्षा। स्तोतृ

३ २ १ २ १ १ १ १
भ्यो२३४५वा६५६यि। रवद्यश्रा२३४५: ॥ २ † ॥ [५]२२

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य द्वितीयस्याध्यायस्य
षष्ठः खण्डः ॥ ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरोदेयाद् विद्यातीर्थ-महेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे द्वितीयोऽध्यायः ¶ ॥

---

* ऊ० गा० ६प्र० २अ० १६सा०।

† ऊ० गा० ६प्र० २अ० २सा०।

‡ 'विष्टल्लौमिकं प्रथममण्डः समाप्तम्'—इति वि०।

¶ 'समाप्तश्च प्रथमः प्रपाठकः'—इति वि० मूलादित्सर्वसम्मतञ्चैतदिति शम्।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १ ॥

॥ अथ तृतीयोऽध्यायः आरभ्यते * ॥

तत्र,

पवस्ववाचइति पञ्चर्चात्मके प्रथमखण्डे—

प्रथमर्चे—प्रथमा ।

१ २ ३ १ २ ३।४ २४ २ १ २ ३ १ २
पवस्ववाचोअग्नियःसोमचित्राभिरूतिभिः ।

३ १ १४ ३ १ २
अभिविश्वानिकाव्या ॥ १ ॥ †

हे "सोम !" "अग्नियः" मुख्यः‡ त्वं "चित्राभिः" पूजनीयैः¶ "ऊतिभिः" रक्षणीयैः सह "वाचः" अस्मदीयाः स्तुतीः

---

* 'इदानीं द्वितीयमहरारभ्यते द्वितीयश्च प्रपाठकः । पञ्चदशस्तोमिकं द्वितीयमहः'—इति वि० ।

† ऋ० वे० ७, १, २८, ५ ।

‡ 'अग्नियः प्रधानभूताः'—इति वि० । अग्निय शब्दमेवं व्याचष्टो भगवान् यास्कः—"अयगमनेनेति वायुगरणेनेति वायुसम्पादिन इति वा । अपिवायमित्येतदनर्थकमुपबन्धमाददीत"—इति ६, १५ ।

¶ 'चित्राभिः विचित्राभिः नानाप्रकारैः'—इति वि० ।

प्रति "पवस्व"। [उत्तरार्द्धे उक्तमेवार्थं विशदयति—] "विश्वानि" सर्वाणि "काव्या" काव्यानि स्तुत्यात्मकानि वाक्यानि "अभि" पवस्वेति ॥ १ ॥

अथ द्वितीया।

१ ५ ३ १ १ ३ २ २ १ १ २ १ २ ३ १ १
त्व꣡ꣳसमु꣡द्रिया अपोऽग्रियोवाचईरयन्।

१ २
पवस्वविश्वचर्षणे ॥ २ ॥ *

हे "विश्वचर्षणे" सर्वस्य द्रष्टः सोम! "अग्रियः" मुख्यः त्वं "वाचः" † "ईरयन्" प्रेरयन् "समुद्रियाः" आन्तरिक्षाणि‡ "अपः" उदकानि¶ "पवस्व" धारया क्षर ॥

"विश्वचर्षणे"-"विश्वमेजय"—इति छन्दोग-ब्राह्मणानां पाठो ॥ २ ॥

अथ तृतीया।

२ ३ १ २ २ ३ १ २
तुभ्येमाभुवनाकवेमहिम्नेसोमतस्थिरे।

१ २ ३ १ २
तुभ्यन्धावन्तिधेनवः ॥ २ § ॥ १

---

* ऋ० वे० ७, १, २९, १।

† 'अग्रियो वाचः—प्रधानभूताः ऋग्यजुःसामलक्षणाः'—इति वि०।

‡ "समुद्रः"—इत्यन्तरिक्षनामसु निघण्टौ पञ्चदशं पदम् (१, ३)।

¶ 'समुद्रिया अपः—समुद्रे भवाः आपः समुद्रियाः। द्रोणकलशः समुद्रः'—इति वि०।

§ ऋ० वे० ७, १, २९, २।

हे "कवे" क्रान्तकर्म्मन् सोम ! "तुभ्यं" तव "महिम्ने" "इमा" इमानि "भुवना" भुवनानि "तस्थिरे" तिष्ठन्ति त्वामेव पुरस्कुर्वन्तीत्यर्थः । किञ्च "धेनवः" नवप्रसूतिकाः देवानां हविःप्रदानेन प्रीणयित्र्यो गावः * "तुभ्यं" त्वदर्थमेव 'आशिरं प्रयस्व मे'—इति "धावन्ति" आगच्छन्ति ॥

"धावन्तिधेनवः"—इति छन्दोगाः, "अर्धन्तिधेनवः"—इति बह्वृचाः ॥ ३ ॥ १

अथ द्वितीयतृचे—प्रथमा ।

१ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २

पवस्वेन्दोवृषासुतःक्षुधीनोयशसोजने ।

२ ३ २ ३ १ २

विश्वाअपद्विषोजहि ॥ १ ॥ †

हे "इन्दो" सोम ! "सुतः अभिषुतः "वृषा" कामानां वर्षिता "पवस्व" धारया क्षर "जने" जनपदे "नः" अस्मान् "यशसः" यशस्विनः "कृधि" कुरु ; "विश्वा" विश्वान् सर्वान् "द्विषः" द्वेष्टॄन् शत्रून् "अपजहि" मारय त्व ॥ १ ॥

* 'धेनवः—गावः । अथवा धेनव आदित्यरश्मयः'—इति वि० ।

† ऋ० आ० ५, १, ५, २ (२भा० ३२अ०) = ऋ० वे० ७, १, २३, १ ।

अथ द्वितीया।

१ २ ३ २ ३ १ २ ३ १ २ १ २
यस्यतेसख्येवयꣳसासह्यामपृतन्यतः।

१ २ ३ १ २ ३ १
तवेन्दोद्युम्नउत्तमे ॥ २ ॥ *

हे "इन्दो" सोम! "अस्य" † अस्मिन् यागे वर्त्तमानस्य "ते" तव "सख्ये" सखित्वे मति वयं स्तोतारः "तव" त्वदीये "उत्तमे" श्रेष्ठे "द्युम्ने" अन्ने तृप्तिं प्राप्ताः [तथाच यास्कः—"द्युम्नं द्योततेर्यशो वान्नं वा (निरु० नै० ५, ५)"—इति] "पृतन्यतः" युद्धमितः शत्रून् ‡ः "सासह्याम" अभिभवेम ¶ ॥

द्वितीय-तृतीयपादौ व्यत्ययेन पाठौ ॥ २ ॥

अथ तृतीया।

१ २ ३ १२ २२ ३ २ ३ २ ३ १ २
यातेभीमान्यायुधातिग्मानिसन्तिधूर्वणे।

१ २ ३ २
रक्षाममस्यनोनिदः ॥ ३ § ॥ २

* ऋ० वे० ७, १, २३, ४।

† मूलपाठस्तु "यस्य"—इति; विवरणस्थतापि तथैव स्वीकृतम्, पदपाठ-गान-ग्रन्थादावपि तथैव श्रूयते।

‡ 'पृतन्यतः—पृतनाः सेनाः, ताभिर्यं योद्धुमिच्छन्ति ते स्थिताः वीरपुरुषाः'—इति वि०। "पृतनाः"—इति सङ्ग्रामनामसु निघण्टौ अष्टादशं पदम् (२, १७।

¶ 'सासह्याम—सहेम'—इति वि०।

§ ऋ० वे० ७, १, २३, ५,।

हे "सोम!" "ते" तव "या" यानि "भीमानि" अत्यूर्जां भयङ्कराणि "तिग्मानि" तीक्ष्णानि "आयुधा" आयुधानि * "धुर्वणे" अन्नवधार्थं सन्ति तैः "आयुधैः" "समस्य" सर्वस्य अघोः "निदः" निन्दायै† "नः" अस्मान् "रक्ष" पालय ॥३॥ २

अथ तृतीयतृचे—प्रथमा।

१२ १२ १ २ १२ ३१२
वृषासोमद्युमाँ असिवृषादेववृषव्रतः।
२ २ १ १
वृषाधर्म्माणिदध्रिषे ॥ १ ॥ ‡

हे "सोम!" "वृषा" कामानां वर्षिता त्वं "द्युमान्" दीप्तिमान् "असि"। अपिच हे "देव" द्योतमान सोम! "वृषा" त्वं "वृषव्रतः" वर्षणशीलकर्मासि। किञ्च हे सोम! "वृषा" त्वं "धर्माणि" देवानां मनुष्याणाञ्च हितानि कर्माणि "दध्रिषे" धारयसि ॥

"दध्रिषे"-"दधिषे"—इति पाठौ ॥ १ ॥

---

* 'अत्यन्तदृष्टिप्रासतोमरादीनि'—इति वि०।

† 'निदः—नितरां दहति निदः, तस्य सम्बोधनं निदः'—इति वि०।

‡ ऋ० आ० ऋ० ६, १, २, ८ (२भा० ६१ ४०) = ऋ० वे० ७, १, १९, १।

अथ द्वितीया ।

१ १ ३ १ ३ २ २ १ ३ १ ३ १ २ १ २
वृष्णस्तेवृष्णश्शवोवृषावनंवृषासुतः ।
१ २ २ १ १ २ २
सत्वंवृषन्वृषेदसि ॥ २ ॥ *

हे "वृषन्" कामानां वर्षक सोम ! "वृष्णोः" वर्षितुः † "ते" तव "शवः" बलं ‡ "वृषणं" वर्षणशीलं भवति "वनं" तव भजनमपि, "वृषा" वर्षणशीलं "सुतः" अभिषुतः तव रसोऽपि "वृषा" वर्षणशीलः "स त्वं" "वृषेदसि" वर्षणशील एवासि भवसि ॥

"सुतोमदः"—इति, "सत्वंसत्यम्"—इति च पाठौ ॥ २ ॥

अथ तृतीया ।

१ ३ १ १ ३ २ ३ १ २ १ २ ३ १ २
अश्वोनचक्रदोवृषासङ्गाइन्दोसमर्वतः ।
१ २ ३ १ २
विनोरायेदुरोवृधि ॥ २ ¶ ॥ ३

हे "इन्दो" सोम ! "वृषा" त्वं "अश्वोन" अश्ववत् "सचक्रदः" सङ्क्रन्दसे । अपिच "गाः" पशून् "अर्वतः" अश्वांश्च अस्मभ्यं

---

* ऋ० वे० ७, १, २९, २ ।

† 'वृष्णोः —वृषु सेचने (भ्वा० पर०) सेचन-समर्थस्य ते'—इति वि० ।

‡ "शवः"—इति बलनामसु निघण्टौ तृतीयं पदम् (२, ९) ।

¶ ऋ० वे० ७, १, २९, ३ ।

सम्प्रयच्छसीति शेषः । किञ्च "नः" अस्माकं * "राये" धनाय "दुरः" द्वाराणि "विहधि" विहतानि कुरु ॥ १ ॥ २

अथ चतुर्थतृचे—प्रथमा ।

२ २ १ २ २ १ १ २ १ २
वृषाह्यसिभानुनाद्युमन्तन्त्वाहवामहे ।
१ २ २ १ २
पवमानस्वर्दृशम् ॥ १ ॥ †

हे सोम ! त्वं "वृषासि हि" अभिमत-फलानां वर्षिता भवसि खलु । तस्मात् हे "पवमान" पूयमान वा सोम ! "स्वर्दृशं" सर्वस्य [सूर्यस्य वा] द्रष्टारं [सर्वैर्देवैर्द्रष्टव्यं वा] "भानुना" तेजसा "द्युमन्तं" दीप्तिमन्तम् अतिशयेन तेजस्विनमित्यर्थः [स्तुतिमन्तं वा], "त्वा" त्वां वयं "हवामहे" यज्ञेषु आह्वयामहे ॥ १ ॥

अथ द्वितीया ।

२ १ २ १ २ १ २ १ २ २ १ २
यदद्भिःपरिषिच्यसेमर्ज्यमानआयुभिः ।
१ २ २ १ २ १ २
द्रोणेसधस्थमश्नुषे ॥ २ ॥ ‡

---

* 'नः-अस्माभ्यम्'—इति वि० ।

† ऋ० आ० ५, २, ५, ४ (२भा० ३३पृ०) = ऋ० वे० ७, २, १, ४ ।

‡ ऋ० वे० ७, २, १, १ ।

हे सोम! त्वम् "आयुभिः" मनुष्यैः * ऋत्विग्भिः "मृज्यमानः" अतिशयेन शोध्यमानः सन् "अद्रिः" वसतीवर्याख्याभिः "यद्" यदा "परि सिच्यसे" परितः सिच्यमानो भवसि, तदानीं "द्रोणे" द्रोणकलशेन गृह्यमाणः सन् "सधस्थं" सह तिष्ठन्त्यत्रेति सधस्थं स्थानं ग्रहचमसादिकम् "अशुषे" व्याप्नोषि॥

"मृज्यमानआयुभिः"-"मृज्यमानोगभस्त्योः"—इति, "द्रोणे"-"द्रुणा"—इति च पाठो॥ २॥

अथ तृतीया।

१ २ ३ २ ३ १ २
आपवस्वसुवीर्य्यम्मन्दमानःस्वायुधः।

३ १ २ ३ १ २
इन्होषिन्दवागहि॥ ३ †॥ ४

हे "स्वायुध"! यज्ञे 'स्फ्य-कपालादीनि दशायुधानि-इत्यभिधीयन्ते, शोभनानि तानि यस्य स तथोक्तः। यद्वा धनुरादीन्यायुधानि यस्य सः, तादृश हे सोम! त्वं "मन्दमानः" मोदमानः सन् [अन्तर्णीतण्यर्थः] देवान् स्वयं मादयन् ‡ "सुवीर्यं" शोभनवीर्योपेतं पुत्रादिकमस्माकम् "आ पवस्व" पवतिर्गत्यर्थः, आ प्रापय। किञ्च हे इन्दो! ग्रहेषु चमसेषु रक्षणशील सोम!

---

* "आयवः"—इति निघण्टौ मनुष्यनामसु सप्तदशं पदम् (२ ३)।

† ऋ० वे० ७, २, १, ५।

‡ 'मन्दमानः—शोध्यमानः तप्यमानोवा'—इति वि०।

"दृह उ" दृहैव * अस्मदीये यज्ञे "सु आगहि" सुष्ठु † आगच्छ ॥ ३ ॥ ४

अथ पञ्चमतृचे—प्रथमा ।

१२ २२११२ ३२
पवमानस्यतेवयम्पवित्रमभ्युन्दतः ।
२ १ २८
सखित्वमावृणीमहे ॥ १ ॥ ‡

हे सोम ! "पवित्रम् अभ्युन्दतः" पवित्रमभिदयतः ¶ "पवमानस्य" क्षरतस्य "ते" तव "सखित्वं" सख्यं वयम् अमहीयवः आङ्गिरसाः स्तोतारः "आ वृणीमहे" प्रार्थयामहे ॥ १ ॥

अथ द्वितीया ।

१२३१२२१ २ ३ १२ २१ २
येतेपवित्रमूमयोभिक्षरन्तिधारया ।
१ २
तेभिर्नःसोमम्मृडय ॥ २ ॥ §

हे सोम ! "ते" तव "ये" ऊर्मयः तरङ्गाः ‖ "पवित्र"

---

*,† 'उ, सु—इति द्वावपि पदपूरणौ,—इति वि० ।

‡ ऋ० वे० ७, १, १८, ४ ।

¶ 'अभ्युन्दतः—आर्द्रं कुर्वन्—इति वि० ।

§ ऋ० वे० ७, १, १८, ५ ।

‖ 'ऊर्मयः—लहरीयाः, सोमसङ्घाताः —इति वि० ।

"धारया" "अभि क्षरन्ति" तेभिः तैः ऊर्मिभिः "नः" अस्मान् "मृड़य" सुखय ॥ २ ॥

अथ तृतीया।

१ २ ३ १८ २८ १ २ २ १ १ २ १ २

सनःपुनानआभररयिंवीरवतीमिषम्।

१ २ ३ १ २

ईशानःसोमविश्वतः ॥ ३ * ॥ ५

हे सोम ! "विश्वतः" सर्वस्य जगतः "ईशानः" ईश्वरः "सः" अभिषुतः "पुनानः" पूयमानः त्वं "नः" अस्मभ्यं "रयिं" धनं "वीरवतीं" पुत्राद्युपेतम् "इषम्" † तम् "आभर" आहर ॥ ३ ॥ ५

इति सामवेदार्थप्रकाशे उत्तरार्चस्य तृतीयस्याध्यायस्य प्रथमः खण्डः ‡ ॥ १ ॥

———000———

* ऋ० वे० ७, १, १९, १।

† 'इषं—इष्टिमन्नं वा—इति वि०।

‡ 'उन्नं वर्द्धिष्यमाणम्'—इति वि०।

अथ द्वितीयखण्डे *—

प्रथमतृचे—प्रथमा।

२ २ २१ २ १ २ २१२
अग्निन्दुतंवृणीमहेहोतारंविश्ववेदसम्।
२ २३१२ २१२
अस्ययज्ञस्यसुक्रतुम्॥ १॥ †

[अग्नेर्दूतत्वमेतन्मन्त्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नायते—'अग्निर्देवानां दूत आसीदुशनाकाव्योऽसुराणाम्'—इति] तादृशं देवं "दूतम्" अग्निम् अस्मिन् कर्म्मणि हवीमहे भजामः। कीदृशं "होतारं" देवानामाह्वातारं "विश्ववेदसं" सर्वधनोपेतं [बहुव्रीहौ विश्वं सञ्ज्ञायाम् (६, २, १०६)"—इति पूर्वपदान्तोदात्तत्वम्] "अस्य" प्रवर्त्तमानस्य यज्ञस्य निदानत्वेन "सुक्रतु" शोभन-कर्माणं शोभन-प्रज्ञं वा॥ १॥

अथ द्वितीया।

२१२ २ १२ २१२ ३ १२
अग्निमग्निꣳहवीमभिःसदाहवन्तविश्पतिम्।
३ १२ ३२
हव्यवाहम्पुरुप्रियम्॥ २॥ ‡

---

* 'हवामीमाख्यानि'—इति वि०।

† ह० मा० १, १, १, २ (१भा० ९७ पृ०) = ऋ० वे० १, १, २१, १।

‡ ऋ० वे० १, १, २२, २।

[यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदादाहवनीयादिस्थानभेदाद्वा बहुविधत्वमभिप्रेत्य] "अग्निम्-अग्निम्"—इति वीप्सा तं "हवीमभिः" आह्वानकरणैर्मन्त्रैः "सदा हवन्त" निरन्तरमनुष्ठातार आह्वयन्ति *। कीदृशम्? "विश्पतिं" विशां प्रजानां होत्रादीनां पालकं "हव्यवाहं" यजमान-समर्पितस्य हविषः देवान् प्रति वोढारम् अतएव "पुरुप्रियं" बहूनां देवानां प्रीत्यास्पदम्॥ [अग्निमग्निम्—"नित्यवीप्सयोः (८, १, ४)"—इति वीप्सायां द्विर्भावः; "तस्य परमाम्रेडितम् (८, १,२)"—इत्युत्तरस्य आम्रेडित-संज्ञायाम् "अनुदात्तञ्च (८, १, ३)"—इत्यनुदात्तत्वम्। हवीमभिः—'ह्वेञ् स्पर्द्धायां शब्दे च (भ्वा०, उभ०); आह्वानकरणभूतेषु मन्त्रेषु स्वव्यापार-स्वातन्त्र्यात् कर्तृत्वविवक्षया "अन्येभ्योऽपि दृश्यन्ते (३, २, ७५)"—इति कर्तरि मनिन्; तस्य छान्दस ईड़ागमः; बहुलं छन्दसि (६, १, ३४)"—इति धातोः सम्प्रसारणम्; पर-पूर्वत्वं; गुणावादेशौ; नित्त्वादाद्युदात्तत्वं (६, १, १८)। सदा—"सर्वैकान्येत्यादिना (५, ३, १५)" सर्वशब्दाद्दाप्रत्ययः "सर्वस्य सोऽन्यतरस्याम् (५, ३, ६)"—इति सभावः; व्यत्ययेनाद्युदात्तत्वम् (३, १, ८५)। हवन्त—ह्वेञो लट् झस्य अन्तादेशः (७,१,३); टेरेभावश्छान्दसः (६, ४, ७६) अपि "बहुलं छन्दसि (६, १, ३४)"—इति सम्प्रसारणम्; "तिङ-

---

* 'हवीमभिः—होतव्यैः सदा हवन्तः आह्वयन्तः; यानि होतव्यानि हवींषि, तैः पुरतोऽवस्थितैः सदाह्वयन्त इति वि०।

तिङः (८, १, २८)"—इति निघातः। विश्पतिं—"पत्यावैश्वर्ये (६, २, १८)"—इति पूर्वपदप्रकृतिस्वरे प्राप्ते, "पराद्यिश्छन्दसि (६, २, १९९)"—इत्युत्तरपदाद्युदात्तत्वम्। हव्यवाहम्—'वह प्रापणे (भ्वा०, उभ०), "वहश्च (३, २, ६४)"—इति णिव प्रत्ययः ; कृदुत्तरप्रकृतिस्वरत्वम् (६, २, १३९)। पुरूणां प्रियं—समासान्तोदात्तत्वम् (८, १, २२३) ॥ २ ॥

अथ तृतीया।

१ २ १ २ ३ १ २ ४ २ ३ १ २
अग्नेदेवाꣳइहावहजज्ञानोवृक्तबर्हिषे।
२ ३ १ १ २ १ २
असिहोतानईड्यः ॥ ३ * ॥ ६ †

हे "अग्ने !" "जज्ञानः"‡ अरण्योरुत्पन्नः त्वं "वृक्तबर्हिषे" आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय। तं 'यजमान मनुग्रहीतुम् "इह" कर्मणि हविर्भुजो देवानाह—"नः" अस्मदर्थं "होता" देवानामाह्वाता त्वम् "ईड्योसि" स्तुत्यो भवसि ॥ ३ ॥ ६

द्वितीयतृचेऽग्न—प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १ २
मित्रंवयꣳहवामहेवरुणꣳसोमपीतये।
२ ३ २ ३ १ २
याजातापूतदक्षसा ॥ १ ॥ §

* ऋ० वे० १, १. २२. ३। † "आग्नेय माज्यमुक्थम्"—इति वि०।
‡ 'जज्ञानः—जायमानः. अथवा यजमानः'—इति वि०।
¶ 'इदानीं मैत्रावरुणमृच्यते—इति वि० आज्यमिति शेषः।
§ य० वे० ३३, ४९=ऋ० वे० १, २. ८. ४।

"वयम्" अनुष्ठातारः "सोमपीतये" * सोमपानार्थं ["दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम्] "मित्र" "वरुण" च उभावाह्वयामः। कीदृशावुभौ ? "या जाता" यौ जातौ सन्तौ प्रदेशं प्रादुर्भवन्तौ, "पूतदक्षसा" शुद्धबलौ †। [पूञ् पवने (क्रया०, उभ०) ; "निष्ठा (३, २, १०२)"—इति क्तः, स्युकः किति (७, २, ११)"—इति इट् प्रतिषेधः। पूतं दक्षो ययोस्तौ "बहुव्रीहौ प्रकृत्या (६, २, १)"—इति पूर्वपद-प्रकृतिस्वरत्वम् ॥

"याजाता"-"जज्ञाना"—इति पाठौ ॥ १ ॥

अथ द्वितीया।

३ २ १ १ १ २ १ २ ३ २ ३ १ २ ३ १ २
ऋतेनयावृतावृधावृतस्यज्योतिषस्पती।

२ ३ १ २ २
तामित्रावरुणाहुवे ॥ २ ‡ ॥

"यौ" मित्रावरुणौ "ऋतेन" सत्यवचनेन¶ यजमानानुग्रह-कारिणा "ऋतावृधौ" ऋतमवश्यम्भावितया सत्यं कर्मफलं तस्य वर्द्धकौ "ऋतस्य" सत्यस्य प्रशस्तस्य "ज्योतिषः" प्रकाशस्य "पती" पालकौ § [श्रुत्यन्तरे मित्रावरुणयोरदिति-पुत्रत्वेन श्रुतत्वात्

* "मन्त्रे घसह्वरणशवृदहादृचः कृगमिजनिभ्यो ले:"—इति पा० २। ३। ६६।

† "पूतदक्षौ—पूतत्वेन दक्षत्वेन च सम्पन्नौ"—इति वि०।

‡ ऋ० वे० १, २, ८, ५।

¶ "ऋतेन—यज्ञेन—इति वि०।

§ "ज्योतिषः नक्षत्रजातस्य ज्योतिष्टोमस्य वा पती"—इति वि०।

दादयादित्येष्वन्तर्भूतत्वेन ज्योतिषः पालकत्वं युक्तम्, श्रुत्यन्तरे च अष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रश्च वरुणश्चेत्यादिकमाम्नातम् तौ मित्रावरुणौ। तथाविधैर्मित्रावरुणैः "सुपां सुलुगिति (७, १, ३९) पूर्वसवर्णदीर्घ आकारः] "हुवे" आह्वयामि। [ह्वेञ आत्मनेपदोत्तमपुरुषैकवचने सम्प्रसारणे (६, १, ३४) पूर्वरूपत्वे च (६, १, १०८) "बहुलं छन्दसि (२, ४, ७३)"—इति श्लपोलुक्; टेरित्त्वम् (२, ४, ३९); "गुणे प्राप्ते "क्ङिति च (१,१,५)"—इति प्रतिषेधः; उवङादेशः (६, ४, ७७); "तिङतिङः (८, १, २८)"—इति निघातः॥ २॥

अथ तृतीया।

१ २ ३ १ २ २ १र २र ३ १ १
वरुणःप्राविताभुवन्मित्रोविश्वाभिरूतिभिः।

१ २ ३ १ १
करतान्नःसुराधसः॥ ३ *॥ ७

अयं "वरुणः" देवः अस्माकं "प्राविता भुवत्" प्रकर्षेण रक्षको भवतु। "मित्रः" च "विश्वाभिः ऊतिभिः" सर्वाभिः प्राविता भुवत्। तावुभावपि "नः" अस्मान् "सुराधसः" प्रभूतधनयुक्तान् "करतां" कुरुताम्। [डुकृञ् करणे (उभ०) भौवादिकः, लोटस्तस्, तसस्ताम्, अकर्त्तरि शप्, गुणोरपरत्वम्,

* ऋ० वे० १, २, ८, ६।

ग्पः पित्त्वादनुदात्तत्वम् (२, १, ४); तिङश्च लसार्वधातुक-स्वरेण (६, १, १८६) धातुस्वरं (६,१, १६२) शिष्यते ॥३॥ ७

इन्द्रमिन्नाथिनइति चतुर्ऋचं तृतीयं सूक्तम् *,

तत्र प्रथमा।

२ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ १ २
इन्द्रमिन्नाथिनोबृहदिन्द्रमर्केभिरर्किणः।
२ ३ १ २
इन्द्रंवाणीरनूषत ॥ १ † ॥

"गाथिनः" गीयमान-सामयुक्ता उद्गातारः "इन्द्रमित्" इन्द्रमेव "बृहत्" "त्वामिद्धवामहे (क्षु० आ० ३, १, ५, २)" —इत्यस्यामृच्युत्पन्नेन बृहन्नामकेन (आ० गा० १, १, २७) सान्ना "अनूषत" स्तुतवन्तः। [णु स्तुतौ (तु०, प०); "णो नः (६, १, ६५)"—इति नत्वम्; स्तुङि व्यत्ययेनात्मनेपदम् (३, १, ८५); झस्य अदादेशः (७, १, ५); सिच इड्भावः उकारस्य दीर्घत्वं छान्दसम् (६, १, १३३); धातोः कुटादित्वात् सिचो ङित्त्वेन (१, २, १) गुणाभावः (१, १, ५)] "अर्किणः" अर्चन-हेतु-मन्त्रोपेता होतारः "अर्केभिः" उक्थ-रूपैर्मन्त्रैरनूषत। ये त्ववशिष्टा अध्वर्यवः ते "वाणीः" वाग्भिः" यजूरूपाभिः इन्द्रम् अनूषत [अर्कस्य मन्त्रपरत्वं यास्केनोक्तम् (५, ४) 'अर्कोमन्त्रोयदनेनार्चन्तीति'] ॥ १ ॥

* 'ऐन्द्रमाग्नेयमिदं'—इति वि०।

† ऋ० आ० ३, १. १, ५ (१भा० ४१० पृ०) = ऋ० वे० १, १, १३, १।

अथ द्वितीया।

१ २२७ २ २ २ १ २ ३ १ २ ३ १ १
इन्द्रद्धर्य्योस्सचासम्मिश्लआवचोयुजा।

१ २ १ १ १ ३ १ १
इन्द्रोवज्रीहिरण्ययः ॥ २ * ॥

"इन्द्रद्धत्" इन्द्रएव "हर्य्योः" हरिनामकयोरश्वयोः "सचा" सह युगपत् "आ सम्मिश्लः" सर्वतः सम्यक् मिश्रयिता। कीदृशयोर्हर्य्योः? "वचोयुजा" इन्द्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः। अयम् "इन्द्रः" "वज्री" वज्रयुक्तः "हिरण्यय" सर्वाभरणभूषितइत्यर्थः ॥ २ ॥

अथ तृतीया।

२ ३ १ २ ३ १ २
इन्द्रवाजेषुनोवसहस्रप्रधनेषुच।

३१ ३१ २ २ १ २
उग्रउग्राभिरूतिभिः ॥ २ † ॥

हे "इन्द्र!" "उग्रः" शत्रुभिरप्रधृष्यः त्वम् "उग्राभिः" अप्रधृष्याभिः "ऊतिभिः" अस्मद्द्वेष्यपरपक्षाभिः "वाजेषु" युद्धेषु "नः" अस्मान् "अव" रक्ष। तथा "सहस्रप्रधनेषु च" सहस्र-सङ्ख्याक-गजाश्वादि-लाभयुक्तेषु महायुद्धेष्वपि रक्ष ॥ २ ॥

---

* ऋ० आ० प० १, २, २ (२भा० २६० पृ०) = ऋ० वे० १, १, १३, २।

† ऋ० आ० प० १, २, ४ (२भा० २६० पृ०) = ऋ० वे० १, १, १३, ३।

अथ चतुर्थी।

१ २ ३ २ ३ १ १ ३ १८ १२ २१
इन्द्रोदीर्घायचक्षसआसूर्यꣳरोहयद्दिवि।

२७ २१ ३
विगोभिरद्रिमैरयत्॥ ४ *॥ ८ †

अयम् "इन्द्रः" "दीर्घाय" प्रौढाय निरन्तराय "चक्षसे" दर्शनाय "दिवि" द्युलोके "सूर्यमारोहयत्" पुरा हत्वासुरेण जगति यदापादितं तमस्तन्निवारणेन प्राणिनां दृष्टिसिध्यर्थम् आदित्यं द्युलोके स्थापितवानित्यर्थः। स च सूर्य्यः "गोभिः" स्वकीय-रश्मिभिः "अद्रिम्" मेघम् "व्यैरयन्" विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः[अथवा इन्द्रएव "गोभिः" जलैर्निमित्तभूतैः "अद्रिं" मेघं "व्यैरयन्" विशेषेण प्रेरितवान्। पञ्चदश-सङ्ख्याकेषु रश्मि-नामसु 'खेदयः' (१) 'किरणाः' (२) 'गावः' (३)—इति पठन्ति (निघ० १, ५); विंशतिसङ्ख्याकेषु मेघनामसु 'अद्रिः'(१) 'गावा'(२)—इति पठितम् (निघ० १, १०)॥ ४॥ ८

---

* ऋ० मं० १, १, १३, ४।

† 'इदानीमैन्द्राग्नभाज्यम्'—इति वि०।

अथ तृचात्मके चतुर्थसूक्ते—

प्रथमा।

१ २ ३ १र २र २१ १ २ १र २र

इन्द्रेअग्नानमोबृहत्सुवृक्तिमेरयामहे।

१ १र २र ३१२

धियाधेनाअवस्यवः॥ १ *॥

"अवस्यवः" रक्षणकामाः वयम् "इन्द्रे" देवे "अग्ना" अग्नौ च "बृहत्" महत्† "नमः" हविर्लक्षणमन्नं ‡ "सुवृक्तिं" सुप्रवृत्तां स्तुतिञ्च ¶ "आदीरयामहे" प्रेरयामः। तथाच "धिया" कर्मणा युक्ता § "धेनाः" ‖ [वाङ्नामैतत् (निघ० १, ११, ३८)] स्तुतिरूपा वाचश्च अभिप्रेरयामः॥ १॥

अथ द्वितीया।

१र २र१२ ३ १र २र ३१२

नाहिप्रभ्वन्तईडतइत्थाविप्रामऊतये।

३ २ १ १ १

सबाधावाजसातय॥ २ **॥

---

* ऋ० वे० ५, ६, १७, ४।

† 'बृहत्—महत्'—इति वि०।

‡ 'नमः—नमस्कारम्'—इति वि०।

¶ 'सुवृक्तिं—शोभनां वृक्तिं वरणम्'—इति वि०।

§ 'धिया बुद्ध्या'—इति वि०। "धीः"—इति कर्मनामसु निघण्टौ एकविंशतिनमं पदम् (२, १)।

‖ 'धेनाः—धेट् पाने (भ्वा० प०), पानधर्माः'—इति वि०।

** ऋ० वे० ५, ६, १७, ५।

"ता हि" तौ खलु * इन्द्राग्नी "यज्ञमन्तः" बहवः "विप्रासः" मेधाविनः जनाः "ऊतये" रक्षणाय "इत्थम्" अनेन प्रकारेण "ईड़ते" स्तुवन्ति। तथा "सबाधः" समानं परस्परं बाध्यमाना जनाः "वाजसातये" अन्नसातये अन्नलाभाय ताविन्द्राग्नी ईड़ते। यद्वा 'वाजसातिः'—इति सङ्ग्रामनाम (निघ० २, १७, ३६) सङ्ग्रामार्थम् ॥ २ ॥

अथ तृतीया।

१ २ ३ १ २१२३१२
तावाङ्गीर्भिर्विपन्यवःप्रयस्वन्तोहवामहे।

३१२ ३१२
मेधसातासनिष्यवः ॥ २ † ॥ ९

"विपन्यवः" स्तोत्रमिच्छन्तः "प्रयस्वन्तः" हविर्लक्षणेनान्वे-नोपेताः ‡ "सनिष्यवः" सनिं धनमात्मन इच्छन्तः वयं "मेध-साता" मेधानां यागानां ¶ "सातौ" सम्भजने निमित्तभूते

---

* 'द्यौति यस्मादर्थे'—इति वि०।

† ऋ० वे० ५, ६, १०, ६।

‡ 'प्रयस्वन्तः—प्रकर्षेण यजमानम् ऋत्विजम् प्रति गच्छन्तः'—इति वि०।

¶ "मेधः"—इति निघण्टौ यज्ञनामसु चतुर्थं पदम् (३, १७)।

सति हे इन्द्राग्नी ! "ता" तौ "वां" युवां "गीर्भिः" स्तुतिभिः "हवामहे" ॥

"विपन्यवः"-"विपन्यवे"—इति पाठौ ॥ ३ ॥ ९

इति सामवेदार्थप्रकाशे उत्तरार्चस्य तृतीयस्याध्यायस्य द्वितीयः खण्डः * ॥ २ ॥

वृषापवस्वेति तृतीयखण्डे †—

प्रथमतृचे—प्रथमा ।

१ १ ३ १२ ३ १ १ ३ १
वृषापवस्वधारयामरुत्वतेचमत्सरः ।
२ १ १ १ १ १ १
विश्वादधानओजसा ॥ १ ‡ ॥

हे सोम ! त्वं "वृषा" स्तोतृणामभिमत-फलस्य वर्षकः सन् "धारया" त्वदीयया "पवस्व" द्रोणकलशमागच्छ [पवतिर्गतिकर्मा (निघ० २, १४, १०८) जागतस्त्वं यदा अस्माभिः इन्द्राय दीयसे तदा "मरुत्वते" सहाया मरुतो यस्य सन्ति तस्मै इन्द्राय "मत्सरः" मदकरश्च भव । कीदृशः ? "विश्वा" विश्वानि सर्वाणि व्याप्तानि वा धनानि "ओजसा" आत्मीयेन बलेन

---

* 'उक्तं प्रातःसवनम्'—इति वि० ।

† 'इदानीं माध्यन्दिनं सवनमभिधीयते'—इति वि० ।

‡ ऋ० आ० ५, २, ४, ३ (२मा० १०ऋ०) ऋ० वे० ७, १, २, ४ ।

युक्तः सन् स्तोतृभ्यः तानि "दधानः" प्रयच्छंस्त्वं मादयिता भवेति समन्वयः ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ २ ३ २ १ २ २ १ २
तञ्चाधर्त्तारमोण्योऽ३ऽध्यवमानꣳसदृङ्ङम्।

३ १ २ २ १ १
हिन्वेवाजेषुवाजिनम्॥ २ * ॥

हे "पवमान" पूयमान पुनान वा सोम! "ओण्योः" [द्यावापृथिवी नामैतत् (निघ० ४, ३०, १५)] तयोः "धर्त्तारं" धारकम् अतएव "सदृङ्ङं" सर्वस्य सूर्यवद् द्रष्टारं, सर्वैर्दृष्टव्यं वा। "वाजिनं" बलवन्तं तं पूर्वोक्तगुणं प्रसिद्धञ्च "त्वा" त्वां "वाजेषु" सङ्ग्रामेषु त्वां प्रेरयामि [यद्वा "वाजेषु" विषयेषु प्रेरयामि, अन्नादिकं प्रयच्छेत्यर्थः †॥ २॥

अथ तृतीया।

२ २ ३ १ ३ २उ ३ १ १ ३ १ १
अयाचित्तोविपानयाहरिःपवस्वधारया।

२ ३ १ २
युजंवाजेषुचोदय॥ ३ ‡॥ १० ¶॥

---

* ऋ० वे० ७, २, ३, १।

† 'वाजेषु—अन्नेषु। सप्तम्येषा, अधिकरणभूतेषु। वाजिनं अन्नवन्तं वेगवन्तं वा'—इति वि०।

‡ ऋ० वे०७, २, ३, २।

¶ 'इह यौक्ताश्वं साम'—इति वि०। 'यौक्ताश्व-प्रभृतीनि सामानि तेषां नाम्नैवार्षप्रतिपत्तिः'—इति च वि०।

हे "पवमान" सोम ! "अया" * [अय पय गतौ (भ्वा०, आ०) पचाद्यच् (२, १, १२४), इतौयाया आकारः (७, १, ३९)] कर्मार्थमितस्ततो गच्छन्तीभिः "विपा" [विप प्रेरणे (चु०, उभ०) हवींष्यग्नौ प्रेरयन्तीति विपा अङ्गुलयः । एकवचनं छान्दसं प्रत्येक-विवक्षया वा] एताभिर्मदीयाभिरङ्गुलिभिः "चितः" ज्ञातः निर्गतः अभिषुतः "हरिः" हरितवर्णः त्वं "धारया" सन्ततया "पवस्व" द्रोणकलशं महांश्च गच्छ । किञ्च "युजं" † सखायम् इन्द्रं "वाजेषु" सङ्ग्रामेषु ‡ "चोदय" प्रेरय । यदास्माभिरिन्द्रार्थं सोमा दीयन्ते तदानीमिन्द्रः स्तुत्यानेन हृष्टः सन् शत्रून् हन्तीत्यर्थः ॥ ३ ॥ १०

॥ यौक्ताश्वम् ॥ औहोहोहायि । वृषा । पवस्वा३ धारायाऽ३ । मारुऽरुत्वा२३४तायि । ओयि । चमां२३ । चमारुत्सा२३४राः । औहोहोहायि । विश्वा । दधा२ ना२३४ओ । जासा२३४औहोवा ॥(१) औहोहोहायि । तन्त्वा । धर्त्तारा३मोणायोऽः । पावा२ मा २ ३ ४ ना ।

---

* 'अया—अनया धिया विश्वस्य पालयित्र्या'—इति वि० ।

† 'युजं—योक्तृम्'—इति वि० ।

‡ 'वाजेषु—अन्नेषु'—इति वि० ।

ओयि । स्तुवा२३ । स्तुवा२ह्वं२३४शाम् । औहोहोवा

यि । हिन्वायि । वाजा२यिषू२३४वा । जायिना२३४

औहोवा ॥(२) औहोहोहायि । अया । चित्तोवी३पा

नाया३ । हारा२यिः । पा२३४वा । ओ । स्वधा२३ ।

स्वधा२रा२३४या । औहोहोहायि । युजाम् । वाजा२यि

षू२३४चो । दाया२३४औहोवा । ओयि । ज्वर

आ(३) ॥ १८ * ॥ [१]

॥ सन्तनि ॥ वृषाहाउ । पावस्वधा३१उवा२३ । रा

२३४या । मरुत्वतेचमत्सरा१: । विश्वाहाउ । दाधान

ओ३आउवा२३ । जा२३४सा ॥(१) तन्त्वाधर्त्तारमोण्योः

पवमानस्तुवर्ह्वा२३४५म् । हिन्वेहाउ । वाजेषुवा३

१उवा२३ । जा२३४यिनाम् ॥(२) अयाचित्तोविपानया

---

* ऋ० गा० १म० २ऋ० १९सा० ।

१ १ १ २ १ १ १ १ १ १ २ १ १
हरिःपवस्वधारया२३४५। युजाण्ऽहाउ। वाजेषुचोऽया

५
उवा२३। दा२३४या(३) ॥ १ * ॥ [२]

२ १ १ १ २ १ ५
॥ ऐडसौपर्णम् ॥ वृषापवोवा। स्वाधारा२३४या।

१ १ २ १ ० १ ५ १
मरुत्वतायि। चमा२त्मा२३४राः। वा२यिश्वा। दा२.

२ १ २ १ २ ४ ५ १ २ १ २
३धा। नाभोजसा। औ३ह्होवा ॥(१) तन्त्वाधर्तोवा।

१ २ १ ५ २ १ २ १ ७ ३ ५
रामोणा२३४योः। पवामाना। सुवा२र्ऽ२३४ग्राम्।

२ १ २ १ ४ ५
दा२यिन्वे। वा२३जायि। षूवाजिनाम्। औ३ह्होवा ॥(२)

१ २ १ १ १ २ ३ ५ १ १ १ १
अयाचिष्टोवा। वायिपा२३४या। हरायिःपवा।

७ ३ ५ १ २ १ २ १
स्वधा२रा२३४या। यू२जाम्। वा२३जायि। षूचोदया।

२ ४ ५ ४
औ३ह्होवा। ह्वोषूई। डा(३) ॥ २ † ॥ [३]

१ १ २ १ १ १ २
॥ रोहितकुलीयोत्तरम् ॥ वृषाँपवस्वधा। रया२।

१ २ १ १ २ १ १ २ २
मरुत्वतेचमत्मा२३राः। वायिश्वा२दाधा२३। नभ्रो२३४

* ऊ० गा० ४प्र० १अ० १खा०। † ऊ० गा० ४प्र० १अ० २खा०।

५ ४ ५ १ २ २१२१ २
वा। जाऽसोऽच्छायि ॥(१) तन्त्वाधर्त्तारमो। णियो

१ २ २१ २ १ १
२:। पवमानसुवर्ह्२३शाम्। हायिन्वे२वाजा२३यि।

२१ ५ ४ ५ २१२ २ १ १
षुवो२३४वा। जाऽयिनोऽच्छायि ॥(२) अयाचित्तोविपा।

२ १ २१२ २ १ १
नया२। हरिःपवस्वधारा२३या। यूजा२वाजा२३यि।

२ १ ५ ४ ५
षुचो२३४वा। दाऽयोऽच्छायि(३) ॥ ३ * ॥[४]

५ २ १ ४ ५२ २१ २
॥ आमच्छीयवम् ॥ वृषोपा३वस्वधारया। मरुत्वा१

२ १२ २ १ २
जा२यि। यमा२३त्मराः। विश्वादधा। नओ२३जसा

५ २ २ ४२ ५२ २ १
उ। वा३ ॥(१) तन्त्वाधा३र्त्तारमोणियोः। पवामा१

१ २ १२ २ १ १
ना२। सुवा२३र्हंशाम्। हिन्ववाजायि। षुवा २ ३

२ ५ २ ४२ ५२ २ १
जिनाउ। वा३ ॥(२) अयाचा३यित्तोविपानया। च्छरा

२ १ २ १ २ १
यिःपा१वा२। स्वधा२३रया। युजंवाजायि। षुचो२

२ २२ १ १ १ २
३दयाउ। वा३। स्तौषे२३४५(३) ॥ १ † ॥ [५]

---

* ऊ० गा० ४प्र० १ष० ३सा०। † ऊ० गा० ६प्र० २ष० १सा०।

॥ हाविष्मतम् ॥ हाउवृषापवस्वधारयाहाउ। मरु

त्वताइयि। चामत्सा२३४राः। ऐ२ह्वो१आ २ ३ यिह्वी।

विश्वादाइधा। नओ। जा २ सा २ ३ ४ औह्वोवा ॥(१)

ह्वाउतन्त्वाधर्त्तारमोण्योर्ह्वाउ। पवमानाइ। सूवर्ह २३

४ग्राम्। ऐ२ह्वो१आ२३यिह्वी। हिन्वेवाइजायि। षु

वा। जा२यिना२३४औह्वोवा ॥(२) ह्वावयाचित्तीविपान

याह्वाउ। हरिःपवाइ। स्वाधारा२३४या। ऐ२ह्वो१आ

२३यिह्वी। युजांवाइजायि। षुचो। दा२या२३४औह्वो

वा। ह्वविष्मते२३४५(३) ॥ १ * ॥ [६]

॥ यौक्ताश्वोत्तरम् ॥ वृषाऔह्वोह्वोह्वायि। पवा ३

स्वाधा१रायाइ। मारु२त्वा२३४तायि। चमाइ। ओयि।

चमा२त्सा२३४राः। विश्वाऔह्वोह्वोह्वायि। दधा२ना

---

* ऋ० मा० ७अ० १ख० १सा०।

५ १ ३ ५ ४ ४ २ ४ ४ १
२३४ओ । जा२सा२३४ओहोवा ॥(१) तन्त्वाओहोहो

२ २ १ २ २ १ ३ ५
हायि । धर्त्ता३रामो१णायो३: । पावा२मा२३४ना ।

३ २ १ ७ १ ५ २ ४ ४ १
सुवा३ । ओयि । सुवा२र्हं २३४शाम् । हिन्वाओहो

२ १ २ ३ ५ १ ३ ५ ४ ४
होहायि । वाजा२यिषू२३४वा । जा२यिना२३४ओहो

४ ४ १ २ ४ ५ १ २
वा ॥(२) अयाओहोहोहायि । चित्ता३वायिपा१ना

२ १ २ ५ २ १ ७
या३ । हारा२यि:पा२३४वा । स्वधा३ । ओ । स्वधा

३ ५ ४ ४ १ २ १ २
२रा२३४या । युजाओहोहोहायि । वाजा२यिषू२३४

५ १ ३ ५ ४ २ २
चो । दा२या२३४ओहोवा । ओयि । जू२३४

५
वा(३) ॥ २ * ॥ [७]

१ २ १ २ १
॥ आजिगम् ॥ वृषापावा । स्वधाराया । मरुत्व

१ ७ २ १ २ १ २
ते । चामत्सा२३रा: । विश्वादाधा । नओजा२३सा३

१ २ १ २ १ २ १ ७
४३ ॥(१) तन्त्वाधार्त्ता । रमोणायो: । पवमान । स्व

---

* ऋ० गा० ७म० १अ० २सा० ।

१ २ १२ २
ह्ँ२३शाम्। हिन्वेवाजायि। षुवाजा२३यिना३४३म्॥(२)

१ २ १ २ १ २ १ २
ऋयाचायिस्तो। विपानाया। हरिःपव। स्वाधा१रा२

२ १ २ १२ २ १
३या। युजांवाजायि। षुचोदा२३या३४३। ओ२३४५

ई। डा(३)॥ १४ *॥ [८]

२ २ २ ४३ ४२५
॥ स्वारसौपर्णम्॥ वृषापवस्वधारा३या। मरुत्वतेच्च

२ १ ३ ५ १ २ २ १२
मा। ङम्। त्सा२३४रा:। वायिश्वा३उवा। दधा।

२ १ ५ ४ ५ २ २ २ २
नओ२३४वा। जा५सोई्हायि॥(१) तन्त्वाधर्त्तारमोणा

२ ३४५२ २ १ ३ ५ १
३या३योः। पवमानस्तुवा। ङम्। ह२३४शास्। हायि

० २ २१२ २१ ५ ४ ५
न्वा३उवा। वाजे। षुवो२३४वा। जा५यिनोई्हायि॥(२)

२ २ २ २ ३४ ३४५२ १ ३
ऋयाचित्तोविपाना३र्या। हरिःपवस्वधा। ङम्। रा२

५ १२ २ २१२ २१ ५ ४
३४या। यूजा३उवा। वाजे। षुचो२३४वा। दा५

५
योई्हायि(३)॥ १५ †॥ [९]

---

* उ० गा० ११प्र० २ख० १४सा०। † ऊ० गा० ११प्र० २ख० १५सा०।

॥ सुरूपोत्तरम् ॥ वृषापवौहो२ । इया । स्वधारा
या२ । मरुत्वतौहो२ । इया । चमत्सारा२: । विश्वा
दधौहो२ । इया । नओजा२३सा३ ४ ३ ॥(१) तन्त्वा
धत्ताहो२ । इया । रमाणायो२: । पवमानौहो२ ।
इया । सुवर्ग्या२म । हिन्वेवाजौहो२ । इया । षु
वाजा२३यिना ३ ४ ३म् ॥(२) अयाचित्तौहो२ । इया ।
विपानाया२ । हरिःपवौहो२ । इया । स्वधाराया२ ।
युजंवाजौहो२ । इया । षुचोदा२३या३४३ । ओ २ ३
४५ई । डा(३) ॥ १८ * ॥ [१०]

॥ सुरभःपावमानम् ॥ हाहाउवृषापवा । हा३ । हा
इयि । स्वाधा२रा २ ३ ४ या । मरुत्वतेचमा१त्सा३रा: ।
विश्वादा२३४धा । ओमो३ । नओवा । जापुसोई३हा

---

* ऊ० गा० १८प्र० १अ० १८सा०

१ ३ ५ १ २ २ २ १
बि ॥(१) रामो२णा२३४योः। पवमानसुवा१र्द२ग्राम्।

२ ३ ५ १ २ ४ ५ ४
ह्विन्ववा२३४जायि। ओमो३। षुवोवा। आप्ययिनो६

५ २२ २ २ २ १
हायिं ॥(२) हाहावयाचित्ताः। हा३। हाइयि। वा

२ ३ ५ १ २ ५ १ २
यिपा२ना२३४या। हरिःपवस्वधा१राया। युजंवा२३४

५ १ २ ४ ५ ४ ५
जायि। ओमो३। षुचोवा। दाप्ययो६हायि(३)॥१८*॥[११]

१ २२ १ २ १२ २२ १ २२ १
॥ हरिश्रीनिधनम्॥ वृषापवस्वधारया। वृषापवा।

२ १ २ २ १ १ २ ३
स्वधारया२। मरुत्वतेचमाहो२। त्मारा२३:। हाउ

१ २ १२ ३ ५ २ २ ४
वा। विश्वादा२३धा। नओ। जा२सा२३४ओहोवा॥(१)

१ २ १ २ २ १२ २२ १ २२ १ २
तन्त्वाधर्त्तारमोणियोः। तन्त्वाधर्त्ता। रमोणियो२:।

१ २ २ १ १ २ १
पवमानसुवाहो२। हशा२३म्। हाउवा। ह्विन्वेवा

२ १२ २ ५ २ २ १
२३जायि। षुवा। जा२यि। ना२३४ओहोवा॥(२) अ

१२ २ १२ २ १२ २२ १ २२ १ २ १
यात्तोविपानया। अयाचित्ताः। विपानया२। हरिः

---

* ऋ० गा० १८५ऋ० १ख० १९मा०।

२ १ १ २ १ २
पवस्वधाह्हो२। राया२३। ह्हाउवा। युजांवा२३जा

१२ ३ ५ २ २ १ १ १
यि। षुचो। दा२या२३४औह्होवा। ह्हरी३स्त्री२३

१ १
४ ५:(३)॥ १ *॥ [१२]

१ २२ १ २ १२ २ २ १
॥ गौषूक्तम् ॥ वृषापवस्वधौ। हौह्होवाह्हायि। रया।

२ १ १ १
मरुत्वतेचमौ२। ऊवायि। ऊवा२यि। त्सारा२:। वि

२ २ २ १ १
श्वादधानऔ२। ऊवायि। ऊवा२यि। जासा२३।

१ १ ५२ २ १ २ १ २ १२ २
हो२वा२३४औह्होवा॥(१) तन्त्वाधर्त्तारमौ। ह्हौह्होवा

२ १ २ १
ह्हायि। णियोः। पवमानसुवौ२। ऊवायि। ऊवा२

१ १ २ २ १ १
यि। दृशा२म्। ह्हिन्वेवाजेषुवौ२। ऊवायि। ऊवा

१ १ ३ ५२ २ २ १२
२यि। जासा२३। ह्हो२वा२३४औह्होवा॥(२) अया

२ १२ १ १२ २ २ १ २
चित्तोविपौ। ह्हौह्होवाह्हायि। नया। ह्हरिःपवस्वधौ

१ १ २ २ २
२। ऊवायि। ऊवा२यि। राया२। युजंवाजेष्

---

* ऊ० गा० २०प्र० १अ० १सा०।

१ १ १ १ ३
चौ२। ऊवायि। ऊवा२यि। दाया२३। ह्वा२वा२

५ २ २ १ १ २ १ १ १ १ १
३४औहोवा। अग्निराऊता२३४५:(३) ॥ ६ * ॥ [१३]

१ २ २ १ २ १
॥ श्राकलम् ॥ वृषापवा२स्वधारया। मरुत्वतीचमत्सा

२ १ १ २ १ २ १ २
२३राः। वायिश्वा२। दाधानओ२३। ऊम्। जा३

५ १ २ २ १ २
४ ५ सोऽहायि ॥(१) तन्त्वाधर्त्ता२रमोणियोः। पवमान

२ १ ० १ १ १ २ १
सुवह२ ३ग्राम्। हायिन्वे२। वाजेषुवा २ ३। ऊम्।

२ ५ १ २ २ १
जा३४५यिनोऽहायि ॥(२) अयाचित्ता२विपानया। हरि

२ १२ २ १ १ २ २ १
रिःपवस्वधारा२३या। यूजा२म्। वाजेषुचो२३। ऊम्।

२ ५
दा३४३योऽहायि(३) ॥ १० † ॥ [१४] १०

अथ द्वितीयर्चे—प्रथमा।

२ ३ १ २ २ १ २ ३
वृषाशोणोअभिकनिक्रदद्गा

३ १ २ २ २ ३ २
नदयन्नेषिपृथिवीमुतद्याम्।

---

* ऊ० गा० २१प्र० २अ० ८सा०। † ऊ० गा० २०प्र० २अ० १०सा०।

१ २ ३ १२ २२ ३ १
इन्द्रस्येववग्नुरा शृण्वआजौ
१२ १ २ ३ १ ३ २
प्रचोदयन्नर्षसिवाचमेमाम् ॥ १ * ॥

"शोणः" शोणवर्णः † "वृषा" कश्चिद् वृषभः "गाः" पशून् "अभि" लक्ष्य "कनिक्रदत्" ‡ शब्दं करोति [एवं "गाः" स्तुतीः "अभि कनिक्रदत्" अभिशब्दायमानः]। तदेवाह— "नदयन्" शब्दमुत्पादयन् हे सोम ! त्वं "पृथिवीम्" "उत" अपिच "द्याम्" एतौ लोकौ "एषि" गच्छसि । किञ्च "वग्नुः" [वग्नु वाङ्नामैतत् (निघ० १, ११, २५) तस्य] वाक्सु शब्दः "आजौ" सङ्ग्रामे "इन्द्रस्येव" इन्द्रशब्द इव "शृण्वे" सर्वैः श्रूयते । ततः "प्रचेतयन्" आत्मानं सर्वेषां प्रज्ञापयन् "इमां" "वाचम्" "अर्षसि" समन्तादागमयसि उच्चैः शब्दायत इत्यर्थः ॥ १ ॥

अथ द्वितीया ।

२२ १ १२३१२
रसाय्यःपयसापिन्वमान
३१२ ३१२२ १ २
ईरयन्नेषिमधुमन्तमꣳशुम् ।

---

* ऋ० वे० ७, ४, १३, १ । † 'शोणः—वज्रवर्णः'—इति वि० ।

‡ "दाधर्त्ति-दर्द्धर्त्ति-दर्द्धर्षि--बोभूतु--तेतिक्ते-ऽलर्क्या--ऽऽपनीफणत्--संसनिष्यदत् कनिक्रत्-कनिक्रदद्-भरिभद्-दरिध्वतो-दविद्युतत्-तरित्रतः—सरीसृपतं—वरीवृजन्. मर्ज्यया-ऽऽगनीगन्तीति च (७, ४, ९५)"—इति पाणिनिस्मरणात् क्रन्दे र्लुङि च्लेरङ्

११ ३१२ ३१
पवमानसन्तनिमेषिक्षण्वन्

१२ ३१२
निन्द्रायसोमपरिषिच्यमानः ॥ २ * ॥

हे सोम ! "रसाय्यः" [रसेरोणादिक आय्य-प्रत्ययः (उ०, ३, ८६)] आस्वाद्यः † "पयसा" "पिन्वमानः" क्षरंस्त्वम् "ईरयन्" "मधुमन्तं" माधुर्योपेतम् "अंशुम्" रसभावम् "एषि" प्राप्नोषि ["अंशुमष्टमात्रो भवति"—इति यास्कः (निरु० ,)]। अनेन सोमरसोऽभिधीयते। किञ्च हे सोम। "परिषिच्यमानः" अद्भिः परिषिक्तो भवंस्त्वं "पवमानः" पवित्रे पूयमानः सन् "सन्तनिं" [तनु विस्तारे (त०, प०) इ-प्रत्ययः] सन्ततां धारां "क्षण्वन्" कुर्वन् "इन्द्राय" इन्द्रार्थम् "एषि" गच्छसि ॥ २ ॥

अथ तृतीया।

२१२ ३१२ २२
एवापवस्वमदिरोमदायो

३१२३१२ ३२
दग्राभस्यनमयन्वधस्नुम् ।

२१२३१२ ३१२
परिवर्णम्भरमाणोरुशन्तं

२१२ २१२ ३२
गव्युर्नीषर्षपरिसोमसिक्तः ॥ ३ * ॥ ११

द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च। लुङ् यास्य "छन्दसि लुङ्-लुङ्-लिटः (३, ४, ६)"—इति धात्वर्थ-सम्बन्धमात्रे सार्वकालिकः।

* ऋ० वे० ७, ४, १३, ४। † 'रसाय्यः—रसवान्'—इति वि०।

‡ ऋ० वे० ७, ४, १२, ४।

हे सोम! "मदिरः" मदकरः त्वम् "उदग्राभस्य" * ["क्रिया ग्रहणं कर्त्तव्यम्"—इति कर्मणः सम्प्रदानसञ्ज्ञा। चतुर्थ्यर्थे बहुलमिति षष्ठी] उदग्राभम् उदकग्राहिणं मेघं "नमयन्" हृष्टयर्थं प्रह्वीकुर्वन्। कीदृशम्? "वधस्नुम्"† हन्तबधेन प्रस्रवन्तम् "मदाय" मदार्थमेव "पवस्व" पात्रेषु क्षर। किञ्च "रुशन्तम्" आरोचमानं श्वेतं "वर्ष" "परि भरमाणः" परितो बिभ्रत् "सिक्तः" पवित्रे सिच्यमानः त्वं "गव्ययुः" अस्माकं गा इच्छन् "पर्येषि" परिगच्छ॥

"वधस्नुं"-"वधस्नैः"—इति पाठौ। ३॥११

॥ इक्षवदाग्निष्ठम्॥ औक्षोवाहा ३ क्षोयि। इक्षा।
वृषाग्नीणो। अभिक। निक्रदद्गाः। नदयन्नायि। षौ
३ पृथि। वीमुतद्याम्। इन्द्रस्येवा। वग्नुरा। शृण्व
आजाउ। प्रचोदयान्। अर्षसि। वा३४३। चा३मा
५ यिमा ६५६म्॥(१) रसायियाः। पयसा। पिन्वसा
ना:। ईरयन्नायिषी३मधु। मन्तमꣳशूम्। पवमाना।

---

* 'उदग्राभस्य—उदक-सङ्घातस्य वधस्नुम्, उदकसङ्घातस्य वधः येन क्रियते भवति परिवर्त्तः सोमेन स वधस्नुः'—इति वि०।

† मन्त्रे तु प्रायो वधोऽन्त्यस्यवकारादिर्दृश्यते।

२ १ २ ४ ५ २ १र २ १ २
सन्तनिम्। एषिक्षण्वान्। इन्द्रायसो। मा३परि। षा

२ ४ २र १र १
३४३यि। च्या३मा५ना६५६ः॥(२) एवापवा। स्वा ३

१ २ ३ ४ ५ २ १ र २ १ २ र २
मदि। रोमदाया। उदग्याभा। स्या ३ नम। यन्वध

५ २ १ २ १ र २ ३ ४ ५ २ १र
स्नुम्। परिवर्णाम्। भरमा। णोरुशन्ताम्। ओहो

१ २ १ ३ २ १ र २ १ ४
वा ह्वा३ हो३यि। इह्वा। गव्युर्न्नीआ। षा३परि। सो३

२ ४
४३। मा५सा५यिक्ता६५६ः(३) ॥ २ * ॥ [१]

२ १ २ २ १र २ १
॥ पार्थम् ॥ ओ३हो३ह्वोयि। वृषाशोणो। अभिक।

१ २ ३ ४ ५ २ १ २ १ २ ३ ४ ५
निक्कदङ्गाः। नदयन्नायि। षी३पृथि। वीमुतद्याम्।

२ १र २ १ र २ २ ४ ५ २ र १ २
इन्द्रस्येवा। वग्नुरा। शृण्वञ्राजाउ। प्रचोदयान्। अ

१ २ २ ४ २ र १
र्षसि। वा३४३। च्या३मा ५ यिमा६५६म्॥(१) रसायि

२ १ र १ २ ३ ४ ५ २र १ २ १
याः। पयसा। पिन्वमानाः। ईरयन्नायि। षी३मधु।

१ २ ३ ४ ५ २ १र २ १ २ ३ ४ ५
मन्तमꣳशूम्। पवमाना। सन्तनिम्। एषिक्षण्वान्।

---

* उ० गा० २प्र० १च० ९सा०।

२ २ १ २ १ २ २ ४
इन्द्रायसो । माऽपरि । षाऽ४ऽयि । च्याऽमाऽ५ऽनाऽ६

२ २ ४ १ २ १ २ ३ ४ ५ १
५६: ॥(२) एवापवा । स्वाऽमदि । रोमऽशया । उद

१ २ २ १ २ ३ ५ २ १ २ १
याभा । स्याऽनम । यन्वधस्नूम् । परिषणाम् । भर

२ २ ३ ४ ५ २ १ २ १ २
मा । णोरुशताम् । ओ३ हो३ होयि । गव्युत्रोंआ ।

२ १ २ १ ४
षाऽपरि । सो३ऽ४ऽ । माऽसाऽ५ऽयिक्ताऽ६ऽ५६:(३) ॥ ६* ॥[२]११

इति सामवेदार्थप्रकाशे उत्तरार्चस्य तृतीयस्याध्यायस्य
तृतीय: खण्ड: † ॥ ३ ॥

अथ चतुर्थ खण्डे ‡ प्रगाथरूपे —

प्रथमसप्तौ—प्रथमा ।

१ २ १ २ २ १ १ २ ३ १ १
त्वामिद्धिहवामहेसातौवाजस्यकारव: ।

२ ३ १ २ ३ १ २ ३ २ ३ १ ७ ३ १ २
त्वांवृत्रेष्विन्द्रमत्यतिन्नरस्त्वाङ्काष्ठास्वर्वत: ॥ १ ¶ ॥

---

* ऊ० गा० ७प्र० १अ० ६सा० ।

† "उक्तोमाध्यन्दिन:"—इति वि० ।

‡ 'या ज्योतिष्टोमे देवता परिभाषा साम्नां सैवात्रापि"—इति वि० ।

¶ ह० आ० ३, १, ५, २ (१भा० ४८१ पृ०)=ऋ० वे० ४, ७, १७, १ ।

"कारवः" स्तोतारो वयं "वाजस्य" अन्नस्य "सातौ" सम्भजने निमित्तभूते सति, हे "इन्द्र!" "त्वाम् इत् हि" त्वामेव "हवामहे" स्तुतिभिराह्वयामहे। हे इन्द्र! "सत्पतिं" सतां पालयितारं श्रेष्ठं त्वां "नरः" अन्येऽपि मनुष्याः "हव्येषु" आवरकेषु शत्रुषु सत्सु "हवन्ते" आह्वयन्ति, तज्जयार्थम्। अपिच "अर्वतः" अश्वस्य सम्बन्धिनीषु "काष्ठासु" यथा अश्वः काष्ठया तिष्ठति तासु "काष्ठासु" सङ्ग्रामेषु युद्धकामास्त्वामेवाह्वयन्ति, अतो वयं त्वामेवाह्वयाम इत्यर्थः॥

"सातौ"-"साता"—इति पाठो॥ १॥

अथ द्वितीया।

१२।१ ३ २ २१ २ ३ १ २
सत्वन्नश्चित्रवज्रहस्तधृष्णुयामहस्तवानोऽद्रिवः।

१ १८ ३ १२ ३ १ २ ३ १३ ३ २ ३ १ २
गामश्वंरथ्यमिन्द्रसंक्षितंसहावाजंन्नजिग्युषे॥२*॥ १२

हे "चित्र" चायनीय! "वज्रहस्त" वज्रबाहो! "अद्रिवः" वज्रवत्† [यद्वा आदृणात्यनेनेत्यद्रिरयमिन्द्रस्तद्वत्] एवम्भूत हे इन्द्र! "धृष्णुया" धृष्णुः शत्रूणां धर्षयिता‡ "महः" महान्

---

* ऋ० वे० ४, ०, २७, २।

† 'अद्रिवः—वज्रवन्। अथवा अद्रय' पर्वताः। अथवा अभिषवपाषाण'। ते अद्रिव'—इति वि०। अत्र "मतुवसो रु सम्बुद्धौ छन्दसि (८, ३, १)"—इति रुत्वम्।

‡ 'धृष्णुया -धारणशीलया बुद्ध्या प्रज्ञया वा—इति वि०।

म तादृशस्त्वं "स्तवानः" अस्माभिः स्तूयमानः सन् "गाम्" "रथ्य"" रथवाहम् "अश्व"" च "सं किर" सम्यक् प्रयच्छ। "जिग्युषे" जितवते पुरुषाय भोगार्थं "सत्वा" महत् प्रभूतं * "वाजं न" अश्वमिव यथा शत्रून् जितवते भोगार्थं बहु प्रयच्छसि तद्वत् †॥ २॥ १२

॥ वारवन्तीयम्॥ तुवामिद्वाओहोहायि। हावामा२३
५ २ र र र १ ५ १र र
४हायि। सातौवाजस्यकारावो२३४हायि। त्वांवृत्रेषि
१ ४र ४र ५ १ ३ ५ २
न्द्रमत्यतिन्नाश४। ओहोवा। इहा२३४हायि। उरु
१ ५ २१र २र १ ७ १ ४र ४र ५
वांश२३४राः। तुवाङ्का। ष्ठासुअर्वा ३ ४। ओहोवा।
१ ३ ५ ४र २ ५र ५
इहा२३४हायि। ओहो३१२३४। ताः। एह्यावहा।(१)
२ र र र १ २ १ ५
तुवाङ्काओहोहायि। सूअर्वा२३४ताः। सत्वान्ना२ ३ ४
५ १ २ ४र ४र ५ १ ३
हायि। चित्रवज्रहस्तधृष्णू३४। ओहोवा। इहा२३४
५ २ ३ ५ २ १ १ १०र २
हायि। उरुवा२३४या। महस्त। वानोअद्रा ३ ४।

---

* 'सत्वा—सदा'—इति वि०।

† 'वाजम्—अन्नम्। न जिग्युषे—न शब्द उपमार्थीयः, यथा जिग्युषे; गमनशीलाय वणिजि यथा धनमुत्पद्यते तद्वत् त्वमस्मासु देहीत्यर्थः।

३र ४र ५ १ ३ ५ ३र १
औहोवा। इहा २ ३ ४ हायि। औहो३१२३४। वाः।

५र ५ २ र र १ २ १
एहियाइहा ॥(२) महस्तवाऔहोहायि। नोअद्रा२३४

५ २र १ ५ १ १
यिवाः। गामाश्वा२३४इहायि। रथियमिन्द्रसङ्का३४।

३र ४र ५ १ ३ ५ २ ३ र २ १र २र
औहोवा। इहा२३४हायि। उरुवा२३४रा। सत्रावा।

१ ७ २ ३र ४र ५ १ ३ ५ ३र २
जान्नजिग्यू३४। औहोवा। इहा२३४हायि। औहो

५र ५ ४
३१२३४। षायि। एहियांइहा। होपूर्ई। डा(३) ॥१ ३*॥[१]

२र र र १ १ २
॥ कण्वबृहत् ॥ औहोतुवामिद्वा३ए। हवामा१हो

३र २ १ र २र र १ २
२३४यि। हाहोयि। सातौवाजस्यकारवः। तुवांवा१

३र २ १ २ १ २
र्वा२३४। हाहोयि। षूइन्द्रसत्। पतायिन्ना१रा२३४ः।

३र २ १ २ ३र २ १ १ १
हाहोयि। तुवाङ्गा१ष्ठा२३४। हाहो। सुआ३। वा

५ ५ २र र र र
२३४ताः। उरुवाइहाउ। वा ॥(१) औहोतुवाङ्गाष्ठा

२ १ २ ३र २ १ १
३ए। सुआर्वा१ता२३४ः। हाहोयि। सात्वन्नृषि। त्र

* ऋ० गा० २२५० १अ० १२मा०।

१ २ ३ २ १ १ ३ २
वाज्रा१हा२३४। हाहो। स्तधाष्णू१या२३४। हाहो

१ १ ३ २ ३ २ १
यि। महास्ता१वा२३४। हाहो। नोआ३। ट्टा२३४

५ ५ ३ २ २ १
यिवाः। उऊवा६हाउ। वा॥(२) औहोमहस्तवां३ए।

२ १ १ ३ २ १ १ १
नोआद्रा१यिवा२३४ः। हाहोयि। गामश्नवम्। रथा

२ ३ २ १ २ ३
यिया१मा२३४। हाहोयि। द्रसाङ्का१यिरा२३४। हा

२ १ २ ३ २ २ ३ २ १
होयि। सत्रावा१जा२३४म्। हाहो। नजा३यि। म्यू

५ ५
२३४षायि। उऊवा६हाउ। वा(३)॥१७*॥[२]१२

अथ द्वितीयसूक्ते प्रगाथे—

प्रथमा।

२ १२ २१३ १ १ ३ १ २ २१२ ३ २
अभिप्रवःसुराधसमिन्द्रमर्च यथाविदे।

१ २ ३ १ २ २१२ ३१२ ३१२ २ १ २
योजरित्भ्योमघवापुरुवसुस्सहस्रेणेवशिक्षति॥१ ॥

„पुरुवसुः" पश्वादिबहुधनोपेतः, यज्ञबाहुल्यात् बहुनि वासको वा "मघवा" धनवान् "यः" इन्द्रः "जरित्भ्यः"

---

* ऊ० गा० २२प्र० १अ० १७सा०।

† ऋ० मा० २, १, ५, २ (१मा० ४८१ पृ०)=ऋ० वे० ६, ४, १४, १।

स्तोतृभ्यः अस्मभ्यं "सहस्रेणेव" सहस्रसङ्ख्याकेन धनेनेव "शिक्षति" [शिक्षतिर्दानकर्मा (निघं० ३, २०, ८)], पश्वादि-बहु-धनम् अस्मभ्यं प्रयच्छतीत्यर्थः। स इन्द्रः "यथाविदे" यथा-स्माभिर्विज्ञायते तथा हे ऋत्विजः! "वः" यूयं "सुराधसं" शोभनधनोपेतम् "इन्द्रम्" ऐश्वर्य्ययुक्तं देवम् "अभि" आभि-मुख्येन "प्र अर्च" प्रकर्षेणार्चत ॥ १ ॥

अथ द्वितीया।

२ १ २ २ १ २ ३ १ २ २ ३ १ २ २ १ २
शतानीकेवप्रजिगातिधृष्णुयाहन्तिवृत्राणिदाशुषे।

३ १ २ ३ १ २ २ २ १ २ ३ १ २
गिरेरिवप्ररसास्यपिन्विरेदत्राणिपुरुभोजसः॥ २* ॥१३॥

"धृष्णुया" ‡ धृष्णुः धर्षणशीलः पुरुषः "शतानीकेव" यथा शतसङ्ख्याकानि शत्रुसैन्यानि "प्रजिगाति" जयार्थं प्रक-र्षेण गच्छति, तद्वत्; इन्द्रः "दाशुषे" यजमानार्थं "वृत्राणि" यज्ञविघातकान् शत्रून् प्र जिगाति ततस्तान् "हन्ति"। किञ्च "पुरुभोजसः" बहुधनस्य "अस्य" इन्द्रस्य सम्बन्धीनि "दत्राणि" दत्तानि धनानि "प्र पिन्विरे" यजमानार्थं प्रकर्षेण वर्त्तन्ते। तत्र दृष्टान्तः—"गिरेरिव" यथा गिरेः सकाशात् "रसाः" उदकानि पिन्विरे प्रवर्त्तन्ते तद्वत्॥ २ ॥ १३

---

* ऋ० वे० ६, ४, १४, २।

† 'वामदेव्यं, मैत्रावरुणं साम। मैत्र्यं, अत्रिसामं'—इति वि०।

‡ 'धृष्णुया—धारणस्वभावया'—इति वि०।

४ २ ४ ५ २ ६ २ ३२ ४ २ ५
॥ श्यैतम् ॥ अभिप्रवःसुरा। धमा ३ ४ ओहोवा।

१ २ १ ७ ५ ५ १२ २
आयिन्द्रमर्च्च। यथाविदा३३४यि। ओ३ह्वा। योजरि

१ २ १ २ १ ३ ५ २ १ २
तृभ्यः। माघा२३वा। पुरू२। वा२३४सूः। सहस्तेणा

२ २ १ ३ ५ २ २
यिवा३शा। ऊम्मायि। त्वा २ ता २ ३ ४ ओहोवा ॥(१)

४ २ २ ४ २ ५ ३ ३ ३ २ ४ २ ५ १ ३ २ २ १
सहस्तेणेवशि। क्षता३४ओहोवा। सहस्तेणे। वशा

७ ५ ५ २ १ २ २ १
यित्वता२३४यि। ओ३ह्वा। शतानीकेव। प्राजा २ ३

२ १ ३ ५ १ २ २
यिगा। तिधा२। षण् २ ३ ४ या। हन्तिवृत्राणी३दा।

१ २ ४ २ २ ३ ५ ३ २ ४ ५ २
ऊम्मायि। शूरषा२३४ओहोवा ॥(२) हतिवृत्राणिदा।

३ २ ३ २ ४ २ ५ १ २ २ १ ७
शुषा३४ओहोवा। हान्तिवृत्रा। णिदाशुषा२ ३ ४ यि।

५ ५ २ १ २ २ १ २ १
ओ३ह्वा। गिरेरिवप्र। रासा२३आ। स्यपा २ यि।

३ ५ १ २ २ २ १
न्वा२३४यिरायि। दत्राणिशूरा३भो। ऊम्मायि। जा २

३ ४ २ २ २ ५
सा२३४ओहोवा। वा२३४सू(३) ॥ ३* ॥ [१]

---

* ऊ० गा० २प्र० १अ० ३सा०।

॥ अभीवर्त्तः ॥ अभा३यिप्रा३ वःसुराधसोवा। आ
यिन्द्रमर्च। यथावा १ यिदा २यि। योजरितृ३१२३४।
भ्योमघवा। पुरूवा१सू२:। सहास्रे१णा२यि। वज्रा
३यि। त्रा२३४५। जा२३४५यि॥ १) सहा३स्रे३णेव
शिक्षतोवा। सात्वमेणे। वशायित्रा१ता२यि। आता
नीका३१२३४यि। वप्रंजिगा। तिधार्ण्यू१या२। हन्ता
यिवा१र्त्ता २। णिदा ३। भू२३४५। षा२३४५यि॥(२)
हन्ता३यिवा३र्त्ताणिदा३मुषोवा। हान्तिवृत्रा। णिदा३मू
१षा२यि। गायिरे१रिवा३१२३४। प्ररमात्र। स्यपायिन्वा १
यिरा२यि। दत्राणा१यिपू २। रुभो ३। जा२३४५।
सा२३४५:(३)॥ ०॥ [२]

॥ ध्यैवनौधसम्॥ अभिप्रवःसुरा। धमा३४त्रौद्धोवा।

१ १ १ ७ ५ ५ २
आयिन्द्रमर्वा। यथाविदा२३४यि। ओ६ह्वा। यो २ ३
२ १ २ १२ १ १३ ५ १
जा। रीतृभ्यः। मघ। वा। पूरुषा२३४सूः। सा २ ३
२ १ र२ १ ५ ३ ५ ४ ३र ४र५
ष्टा। सेणेवशो२३वा। ष्टा२३४ती ॥(१) सहस्रेणे वशि।
३ २ ७र ४र ५ १ ९र र १ ७
ऋता३४औहोवा। साहस्रेणे। वशायिऋता २ ३ ४ यि।
५ ५ १ २ १र २ १ २ १
ओ६ह्वा। ष्टा२३ता। नोकेव। प्रजि। गा। तायि
२ ३ ५ १ २ १र २ २ ५
धाष्णु२३४या। ह्वा२३न्तायि। वार्त्राणिदो २ ३ ४ वा।
३ ५ ३ ४ ३र ४ ५र ३ २ ७र ४र ५
ष्टु२३४षे ॥(२) हन्तिवृत्राणिदा। ष्टुषा ३ ४ औहोवा।
१ २ र १ ७ ५ ५ १
ह्वान्तिवृत्रा। णिदाष्टुषा२३४यि। ओं६ह्वा। गा२३यि
२ १ २ १ २ १ २ ३ ५
रेः। आयिव। प्रर। साः। आ। स्थापिन्वा२ ३ ४ यिरा
१ २ १ २ १ ५ ३
यि। दा२३त्रा। णायिपुरुभो २ ३ ४ वा। जा २ ३ ४
५
साः(३) ॥ ११ * ॥ [३]

२ १ २ १र
॥ वाङ्निधनं क्रौञ्चम् ॥ अभायिप्रावा३१२३४:। स्तुरा।

* ऊ० गा० २१प्र० १अ० ११सा०।

२ १ २ १ १ २ ५ २ २ ५ २ १
धसाइम्। इन्द्रमर्वा३१२३४। यथा। विदा३यि। योजा

१ २ ४ ५ २ २ २ १ २
रितू३१२३४। भ्योमघवापुरु। वज्र३:। सहस्रे णा३

५ २ १ २ १
१२३यि। वशा५यिच्छताउ ॥(१) सहस्रे णा३१२३४यि।

५ २ १ २ ५ २ १
वशि। च्छता३यि। सहस्रे णा३१२३४यि। वशि। च्छता

२ १ २ ३ ५ ५२ २ १
३यि। शतानीका३१२३४यि। वप्रजिगातिधृ। ष्णु या

२ १ २ ४ २ १
३। हन्तायिवार्चा३१२३। णिदा५म्रुषाउ ॥(२) हन्ता

२ ५२ ३ १ २ १ २
यिवाचा३१२३४। णि। दा। म्रुषा३यि। हन्तिवृंचा

५२ २ २ २ १ २
३१२३४। णिदा। म्रुषा३यि। गिरेरायिवा३१२३४।

२ ४२ ५ २ १ २ १ २ ४
प्ररसाम्रस्यपि। न्विरा३यिद्चाणायिपू३१२३। रुभो५ज

साउ। वा ॥(३) ॥ १५ ॥ [४] १३

---

* ऋ० मा० २१अ० १ ख० ५ सा०।

अथ तृतीयप्रगाथे—

प्रथमा ।

२ ३१२ २२ ३ १ २
त्वामिदाह्योनरोपीप्यन्वज्रिन्भूर्णयः ।

१२३ १ ५ ३२ २१ ३१२३१२
सइन्द्रस्तोमवाहसइहश्रुध्युपस्वसरमागहि ॥ १ * ॥

हे "वज्रिन्" वज्रवन्निन्द्र ! यं "त्वाम्" "भूर्णयः" हविर्भरण-शीलाः "नरः" कर्मणां नेतारो यजमानाः "इदा" अद्य "ह्यः" पूर्वेद्युश्च "अपीप्यन्" सोममपाययन्। हे इन्द्र ! "सः" त्वं "स्तोमवाहसः" स्तोत्रवाहकस्य मम स्तोत्रम् "इह" यज्ञे "श्रुधि" शृणु "सस्वरं" गृहञ्च ["दुर्याः"(९) "स्वसराणि"(१०)—इति (निघ० ३, ४) गृहनामसु पाठात्] "उपागहि" उपागच्छ ॥

"स्तोमवाहसः"—इति छन्दोगाः, "स्तोमवाहसाम्"†—इति बह्वृचाः ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १ २ ३ १ २
मन्त्वासुशिप्रिन्हरिवस्तमोमहेत्वयाभूषन्तिवेधसः ।

२३१२ ३ १ २ २ १ २
तवश्रवाꣳस्युपमान्युक्थ्यासतेषिन्द्रगिर्वणः ॥ २ ‡ ॥ १४

---

* ऋ० सा० ४, १, १, १० (१भा० ६१० ४०) ऋ० वे० ६, ७, ३, १ ।

† अतएव छन्दआर्चिक व्याख्यावसरे 'अस्माकम्'—इति वक्तव्यवचनान्त व्याख्यातम् ।

‡ ऋ० वे० ६, ७, ३, २ ।

हे "सुशिप्रिन्" शोभनहनो ! "हरिवः" हरिनामकाश्वो-पेतः !" "गिर्वणः" गीर्भिर्वननीयेन्द्र ! "त्वया" त्वयि "विधस्तः" परिचारकाः "आ भूषन्ति" * आभवन्ति, "मत्सव" सोमेन मादय आत्मानम् किञ्च "तम्" त्वा वयम् "ईमहे" याचामहे । किं वाच्यम् ? इत्यत्राह—"सूतेषु" सोमेषु अभिषुतेषु सत्सु "तव" "अवांसि" अन्नानि † "उपमानि" उपमानभूतानि, हे "उक्थ्य" प्रशस्य ! ‡ तव प्रसादात् मन्विति ॥

"सशिप्रिन्"-"सशिप्र"—इति पाठौ ॥ २ ॥ १४

॥ माधुच्छन्दसम् ¶ ॥ त्वामिदा । ह्वोयि । ह्वियोनं
५ ५ २ १ ० १ २ ३ ५ १
राईए । अपायिष्यन्वा । ज्ञायिन्भूर्णा२ ३ ४ याः । स
२ १र २र १ २ ३र २ ३र २
इन्द्रस्तोमवाहसः । इहाश्धा । औह्वो ३ ४ वाह्वांयि ।
१ २ ३र २ ३र २ १र २
उपास्वासा । औह्वो३४वाह्वा । रमागा२३ह्वा३४३यि ॥(१)
३ ४ ५ र २ ३ ४र ५ ५ २ १ २ १ २
उपस्वसा । हो । रमागह्वीए । उपास्वसा । रामा
२ ५ १ र २ १ २
गा २ ३ ४ ह्वो । मश्वासुशिप्रिन्हरिवः । तमायिमाह्वा ।

---

* 'श्लाघां कुर्वन्ति'—इति वि० ।

† 'अवांसि—अन्नानि पयांसि वा'—इति वि० ।

‡ 'उक्थ्य—उक्थैः मन्त्रजनीय'—इति वि० ।

¶ 'माधुच्छन्दसं मामाच्छावाकस्य'—इति वि० ।

औहोइ४वाहायि। त्वयाभूषा। औहोइ४वाहा। ति
वेधाइ३साइ४३: ॥(२) त्वयाभूषा। हो। तिवेधसाइ६ए।
त्वयाभूषा। तिवेधाइ३४साः। तवश्रवाऽस्युपमा। नि
यूथ्याया। औहो २ ३४वाहायि। सुतायिषूवा। औ
होइ४वाहायि। द्रगिर्वाइ३णा ३ ४ ३:। ओइ३ ४ ५ई।

डा (३) ॥ ४ * ॥ [१]

॥ मानवोत्तरम् ॥ हौवायि। त्वामिदाह्योनरः। हो
वायि। आपीप्यन्वज्रिन्भूर्णयः। साइन्द्रस्तो। मावा
ह्वसाइ१:। इहाइ२३४ऽधायि। उपास्वाइ३साइ। राइ
माइ३४औहोवा। गाइ३४ह्वी ॥(१) हौवायि। उपस्व
सरमागहि। हौवायि। ऊपस्वसरमागहि। मात्खासु
ग्नि। प्रायिन्हरिवाइ१:। तमाइयिमाइ३४हायि। त्वया

* ऊ० गा० २प्र० १अ० ४सा०।

१ ० ० १ ३ ४५ २ ७ ५
भू२३षाइ। ता२यिवे२३४औहोवा। धा२३४सा:॥(२)

१ २ २१ २१ १ १ २ २
ह्वोवायि। त्वयाभूषन्तिवेधसः। ह्वोवायि। त्वायाभूष

२ ७ १ २ १ ७ २ ७ १
न्तिवेधसः। तावश्रवा। साउपमा३१। नियू२क्षा२३४

५ २ १ २ १ ३ ५ २ २ ३
या। सुतायिषू२३वाइयि। द्रा२गा२३४औहोवा। वा२

५
३४धाः (३)॥ ८ * ॥ [२] १४

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य तृतीयाध्यायस्य
चतुर्थः खण्डः† ॥ ४ ॥

पञ्चमखण्डेः—

प्रथमर्चे—प्रथमा ।

२ ३ २ ३ १ २ ३ १ २ ३ १ २
यस्तेमदोवरेण्यस्तेनापवस्वान्धसा ।

३ १ २ ३ २
देवावीरघशꣳसहा ॥ १ ¶ ॥

---

* ऋ० मा० १८प्र० २अ० ८सा० ।

† 'उक्थं माध्यन्दिनं सवनम्'—इति वि० ।

‡ 'तृतीयसवनमभिधीयते'—इति वि० ।

¶ ऋ० मा० ५, २, ४, ४ (२मा० १४ ४०)=ऋ० वे० ८, १, २१, ४ ।

हे सोम ! "ते" तव "देवावीः" देवकामः "अघशंसहा" राक्षसानां हन्ता "वरेण्यः" सर्ववरणीयः "मदः" मदकरः "यः" रसः विद्यते, "तेन" "अश्वमा" अदनीयेन "पवस्व" क्षर ॥ १ ॥

अथ द्वितीया।

१ २३ १२३ २३ २ ३१ २ ३ १ २
जघ्निर्वृत्रमभित्रियꣳसस्निर्वाजन्दिवेदिवे।

१ २ ३१ २
गोषातिरश्वसाअसि ॥ २ * ॥

हे सोम ! त्वम् "अभित्रियं" अभित्रभवं † "वृत्रं" शत्रुं "जघ्निः असि" हन्ता भवसि। किञ्च "दिवे दिवे" प्रतिदिनं "वाजं" ‡ सङ्ग्रामं "सस्निः" सम्भक्तोऽसि ¶। अपिच "गोषातिः" गवां सातिर्दातासि, "अश्वसाः" अश्वानां दाता चासि।

"गोषातिः"--"गोषाउ"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० ८, १, २१, ५।

† 'अभित्रियम्—अभित्रकर्मकर्त्तारम्'—इति वि०।

‡ 'वाजमिति द्वितीयैकवचनम्, षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् ; वाजस्य अन्नस्य'—इति वि०।

¶ 'सस्निः—साधनस्वभावः'—इति वि०।

अथ तृतीया ।

१ २ ३ १ २ १ २ ३ २३ १ २
सम्मिश्लोअरुषोभुवःसूपस्थाभिर्न्नधेनुभिः ।

१ २ ३ २उ २ २
सीदन्छ्येनोननयोनिमा ॥ ३ * ॥ १५ †

हे सोम ! त्वं "सूपस्थाभिः" शोभनोपस्थानाभिः "धेनुभिः" गोभिः [गोर्विकारैः पयोभिरित्यर्थः] "सम्मिश्लः" सम्मिश्रितः "श्येनः न" यथा श्येनः शीघ्रमागत्य स्थानमासीदति तद्वत् "योनिं" स्वकीयं स्थानम् "आसोदन्", "न" [—इति सम्प्रत्यर्थे] इदानीम् "अरुषः भुवः" आरोचमानो भव ॥

"भुवः"-"भवः"—इति वा पाठो ॥ ३ ॥ १५

अथ द्वितीयर्चे—प्रथमा ।

३ २ ३ १ ३ २उ ३ १ २ २ १ ०
अयम्पूषारयिर्भगस्सोमःपुनानोअर्षति ।

२ ३ १ २ ३ १ २ ३क २र ३ १ २ ३ २
पतिर्विश्वस्यभूमनोव्यख्यद्रोदसीउभे ॥ १ ‡ ॥

"पूषा" पोषकः सर्वेषां "भगः" भजनीयः "रयिः" धनहेतुः "अयं" सोमः "पुनानः" पवित्रे पूयमानः सन् "अर्षति" कलश-

---

* ऋ० वे० ८, १, २२, १ । † 'उक्था गायत्रौ'—इति वि० ।

‡ ऋ० सा० ९, २, १. २ (२भा० १५२ऋ०)=ऋ० वे० ७, ५, २. २ ।

मभिगच्छति। तथा "विश्वस्य" सर्वस्य "भूमनः" भूतजातस्य "पतिः" पालयिता "सोमः" "उभे रोदसी" द्यावापृथिव्यौ "अक्षत्" स्वतेजसा प्रकाशयति। अनेन लोकद्वयवर्त्तित्वं सूचितम् ॥ १ ॥

अथ द्वितीया।

१ १ १ १ २ २ २ १ १ १ २
समुप्रियास्रनूषतगावोमदायघृष्वयः।

१ २ २ १२ २२ २ १ २
सोमासःकृण्वतेपथःपवमानासइन्दवः ॥ २ * ॥

"प्रियाः" प्रियतमाः "घृष्वयः" अत्यन्तदीप्ताः, [यद्वा 'अहं प्रथमतः स्तौमि', 'अहं पुरस्तात् स्तौमि'—इति परस्परं स्पर्द्धमानाः] "गावः" स्तुति-लक्षणा वाचः † "मदाय" सोमस्य मदार्थं "समनूषत" संस्तुवन्ति; "उ" प्रसिद्धौ ‡ [यद्वा गावो धेनवः सोमस्य मदाय शब्दायन्ते]। ततः "पवमानासः" पूयमानाः "इन्दवः" दीप्ताः "सोमासः" सोमाः पथः मार्गान् "कृण्वते" चरणार्थं कुर्वन्ति ॥ २ ॥

---

* ऋ० वे० ७, ५, २, २।

† 'गावः—० ० ०सोमसम्बन्धीनि स्तोत्राणि उदकानि वा'—इति वि०।

‡ 'उ—इति पदपूरणः —इति वि०।

अथ तृतीया।

१ २८ १ १८ १८ २ १ १ २ १ २

यत्र्ओजिष्ठस्तमाभरपवमानश्रवाय्यम्।

१ १८ २ २ २ १ १ ८७ १ १ २

यःपञ्चचर्षणीरभिरयिंयेनवनामहे ॥ २ * ॥ १६ †

"ओजिष्ठः" ओजस्वितमः "यः" तृतीयो रसोऽस्ति तं "श्रवाय्यं" श्रवणीयं रसम् "आभर" अस्मभ्यमाहर। किञ्च "यः" रसः "पञ्च चर्षणीः" ‡ पञ्चजनान् निषादपञ्चमान् चतुरो-वर्णान् "अभि तिष्ठति"। अपिच "येन" रसेन वयं "रयिं" धनं च "वनामहे" सम्भजामहे ¶ [यद्वा येन त्वां रयिं याचा-महे] तमाभर ॥ २ ॥ १६

५ ३८ २ ४ ५ ३८

॥ गौरीवितम् § ॥ अयम्। पूषा ३। रयिर्मगाः। सो

२ २ १ २ ४

मःपुनानोऽवर्षताऽयि। पातिर्विश्वा३१ २ ३। स्वभूमम

१ २ ४ ५ ४ ५

माः। वायव्यद्रो३१२३। दसोवा। ऊमोऽहायि।(३)

॥ ८ ॥ ॥ [१]

* ऋ॰ वे॰ ७, ५, २, ४। † "ओजिष्ठौ ककुभिष्ठौ"—इति वि॰।

‡ 'पञ्चचर्षणीः—चर्षणयोमनुष्याः। चत्वारोमनुर्निजः, पञ्चमो यज्ञियः।

¶ 'रयि—धनं। येन वनामहे—येन सोमेन हविषा रयिं धनं लभामः। वनति र्यत्रापि कृत्यर्थे तथाप्यत्र लाभार्थे द्रष्टव्यः—इति वि॰।

§ 'तथागौरीवितम्'—इति ऋ॰ पु॰। ॥ ऋ॰ गा॰ १२म॰ १ऋ॰ ८ऋच॰।

॥ तृतीयंक्रौञ्चम् ॥ अयम्पूषा। ह्वो। रयिर्भगा ६ ए। सोमा२:पुना२। नआ३४५। षा२३४ती। पतिर्वि स्वसंभूमना२३४५:। वियख्या२३द्रो। दसीऊ२३भां३४ ३यि ॥(१) समुप्रियाः। ह्वो। अनूषता ६ ए। गावो२ मदा२। यघा३४५। षा२३४याः। सोमास:क्रणवतेप थाऽ१:। पवमा२३ना। मन्दा२३वा३४३: ॥(२) यओ जिष्ठाः। ह्वो। तमाभरा६ए। पावा२मानाः। अवा ३४५। यो२३४याम्। यःपञ्चचर्षणीरभीऽ१। रयिंया२ ३यिना। वनामा२३ह्वा ३ ४ ३ यि। ओ२३४५ई। डा।(३)

॥ ६ * ॥ [२]

॥ गौरीवितम्† ॥ अयम्। पूषा३। रयिर्भगाः। सो मःपुनानोअर्षतार३यि। पातिर्विश्वा३१२३। स्वभू५मनाः।

---

* ऋ० गा० २प्र० १अ० ६सा०। † 'महागौरीवितम्'—इति ख० पु०।

१ ३ ४ ५ ४ ५
वायव्याद्रो ३१२३। दसोवा। ज५भो६हायि ॥(१)

५ ३२ ५२५ १२२ २
समु। प्रियाइः। अनूषता। गावोमदायधुष्वया२३ः।

२ २ ४ १ २२
सोमांसःका३१२३। एवता५यिपथाः। पावमाना३१२३।

४ ५ ४ ५ ५२ ३२ ४२
सञ्ओवा। दा५वो६हायि ॥(२) यञ्ओ। जिष्ठाइः। तमा

५ १२ २ १ २
भरा। पवमानश्रवायिया२३म्। याःपच्चा ३ १ २ ३।

१ २२ ४ ५ ५
षणा५यिरभायि। रायिंयेना३१२३। वनोवा। मा५

५
द्रो६हायि(३) ॥ ८ * ॥ [३]

३२ २ ४२ ५ २ ४
॥ ग्नावाश्वम् ॥ अया३१म्। पू३षा। रयिः। भा३गः।

१ १ २ २ १ १ २
एह्िया। सो। मःपुनानो। अ। षता२यि। ऐहि

१ २ ४ ५ २२ १
या२। पतिर्विश्वास्या३भू३। मा२३४नाः। ऐहा२यि।

२ १ २ ४ २ ५
एह्िया२। वियख्यद्रोदा३सी३। ज३४५भो६हायि ॥(१)

३ २ ४२ ५२ २ ४ ५ १
सम्३१। प्रो३याः। अनू। षा३त। एह्िया। गा।

---

० ज० गा० ७प्र० १अ० ८सा०।

र र २ १ १र र र १
सोमदाया । घृ । षयार्२: । एद्दियार्२ । सोमास:का

२ ४ ५ २र १र
र्वाइताइयि । पा२३४था: । ऐहार्२यि । एद्दियार्२ ।

१र २ ४ २ ५ २ १
पवमानासाइआइयि । दा३४५वोऽहायि ॥(२) यंसो३

२ ४ ५र २ ४ ५ १
१.। जाइयिष्ठ: । तमा । भाइर । एद्दिया । पा । व

र २र १ १र १ १
मानआ । वा । यियार्२म् । एद्दियार्२ । य:पच्चार्षा३

४ ५ २र १र
षीइ: । आ२३४भायि । ऐहार्२यि । एद्दियार्२ । रयिं

१र २ ४ २ ५
र्येनावाइनाइ । मा२३४५हीऽहायि(३) ॥ १०* ॥ [४]

२ १ १र र १ र
॥ आसिताद्यम् ॥ अयम्पूषारयायि: । भगा: । सो

र र २ १ १र
म:पुनानोअर्षा२इतायि । पातार्२यिस्वार्२ । सुभूमना: ।

१ १ २ १ ५ ४ ५
वायार्२ख्याद्रोर्२ । दसोवाइओ२३४वा । ऊ५भोऽहा

१ २ १र २ १ र र र
यि ॥(१) समुप्रियाअनू । षता । गावोमदायघृषा२इ

२ १ १र १
या: । सोमार्२सा:कार्२ । एवतेपथा: । पावार्२माना

---

* ऋ० मा० ११प्र० २अ० १०सा०

ई। सखीवाइयो२३४वा। दा५योई३हायि ॥(२) यज्ञो
जिष्ठस्तमा। भरा। पवमानस्यबाम्रा२३याम्। याःपा
ई३म्बाम्बा२। षणीरभायि। रायी३यायिना२। वनो
वाइओ२३४वा। मा५होई३हायि(३) ॥ २० * ॥ [५]

॥ निषेधम् † ॥ अयम्पूषारा ३ यिर्भगाः। सोमाःपुना।
सोअर्षता२यि। इहाइ। पाताइयिर्वायिस्वा। हाडो
२३४हा। स्वभूमा२३नाः। इहा ३। वाया ३ ख्याद्रिं।
हाडो२३४हा। दसी३ऊ५भा६५६यि ॥(१) समुप्रियाम्रा
३नूषता। गावोमदा। यघृषया२ः। इहा ३। सो
माइसाःका। हाडो२३४हा। एवतेपा२३थाः। इहाइ।
पावाइमाना। हाडो २ ३ ४ हा। सम्राइयिन्दा५वा ६
५६ः ॥(२) यम्रोजिष्ठस्ताइमाभरा। पवामाना। अवा

* ऋ० मा० ११म० ३ख० २०सा०। † "निषेध.'—इति ख० पु०।

१ १२ १ २ ४५ २ ३ ५
यिया२म्। इहा३। याःपा३स्वाचा। हाहोर२३४हा।

२ ३ १ २ १२ १ २ ४ ५ २ ३
षणीरा२३४भायि। इहा३। रायी३यायिना। हाहोर२३

५ ३२ ४ ३१ १
४हार२३४हा। वना३मा५हा६५६यि। हे२३

१.१
४५(३)॥ २ *॥ [६]

४ ३ २ ४ २ ४ ५
॥ यज्ञायज्ञीयम्॥ अयाऽ५म्। षाइराइयिर्भागाः।

१ २ १ २ २ १ १
सोमःपुना। नो३आर्षा३तायि। पता२यिर्वि। स्वस्या

२ १ २ २ १ २ ३२
२३भू। ऊम्मायि। मा३नाः। वायव्यद्रोदसी २ उभा

१ २ १ २ २ २ २
उ॥(१) भायिसाम्। उप्रियाअनूषतगावोमदा। या

१ २ २ १२ १ २ १
३घार्ष्वा३याः। सोमा२सः। क्ण्वा२३ता। ऊम्मायि।

२ २ १ २ २ ३२ १ २ १२
पा३थाः। पावमानास आ२यिन्दवाउ॥(२) वायाः। ओ

२ २ २ ३ २ १ १ १
जिष्ठस्तमाभरपवमाना। आ३वाआ३याम्। यःपा२च्च।

---

* ऋ० गा० १३५० १अ० २सा०।

१ १ २ २ १ २
चर्षा२३णा। ऊम्मायि। आ३भायि। रायिंयेनवना२

२ २ १ १ १
मद्दाउ। वा३४५(३) ॥ १३ * ॥ [७]

२ १ २र १र २र १ २ र १ २
॥ यद्दाङ्ष्ठीयम् ॥ अयम्पूषारयिर्भगः। अयम्पूषोवा।

१ २ २ २
रयिर्भगाः। सोमःपू२३ना। नोऽर्षतायि। पतिर्वा२३

२ १र २ १र २
यिश्वा। स्वभूमनाः। वियख्या२३द्रो। दसीऊ२३भा३

१ २१र २र १ २ १र
४३यि ॥(१) समुप्रियाअनूषत। समुप्रियोवा। अनूष

र र २ १ र र २
ता। गावोमा२३दा। यघृष्वयाः। सोमासा२३:कां।

१र १ १ २ १
एवतेपथाः। पवमा२३ना। सइन्दा२३वा३४३: ॥(२) य

र २ १र २ र १ २ १र
ओजिष्ठस्तमाभर। यओजिष्ठोवा। तमाभरा। पवमां

२ १र २ १र
२३ना। अवायियाम्। यःपच्चा२३चा। षणीरभायि।

२ १र २ १
रयिंमा२३यिना। वनामा२३च्चा३४३यि। ओ२३४५ई।

डा (३)॥ १४ † ॥ [८]

• ऊ० गा० १५प्र० १अ० १९सा०। † ऊं० गा० २२प्र० १अ० १७सा०।

॥ क्रौञ्चाद्यम् ॥ अयम्पूषौच्छो। रायिर्भगाः। सो
मःपुनाइ। नोआइर्षापूताई ५ ६ यि। पतिविश्वौच्छो।
स्थाभूमनाः। वियख्यद्रोइ। दासीइजपूभाइ५ईयि ॥(१)
समुप्रियौच्छो। आनूषता। गावोमदाइ। याघाइर्षापू
षाइ५ईः। सोमासःकौच्छो। एवातेपथाः। पवमानाइ।
साआइयिन्दापूवाइ५ईः ॥(२) यओजिष्ठौच्छो। तामाभ
रा॰। पवमानाइ। आवाइआपूयाई५ईम्। यःपच्चचौ
च्छो। पाणीरभायि। रयिंयेनाइ। वानाइमापूहाई५
ईयि (३)॥ १७ * ॥ [८]

॥ ऐडकौत्सम् ॥ अयंच्छौपू२३। पारयिर्भगईया।
सोमःपुनानोअर्षति। पातिर्विश्व। स्वभूमा२३नाः। वा
याइच्छा। स्वाद्रोइच्छा। दसीऊ२३भाइ४३यि ॥(१) स

ऋ० गा० १५प्र० १ऋ० १७सा०

२ १ ४२ २ ५ १२ २२ १ २ १ २ १
मूर्द्धिप्रीर२३। याश्चनूषतईया। गावोमदायघृष्वयः। सो

२ २ १२ २ १ २ २ १ २ २
मासःछ। एवतेपा२३थाः। पावाइछा। मानाइछा।

१ २ ३ २ २ १ ४ २
सइन्दा२३वा३४३: ॥(२) यश्चोहीजा२३यि। छस्तमाभर

५ १ २२ १२ २ १ २ १२
इया। पवमानश्रवायियम्। याःपञ्चच। षणीरा२३

१ १ २ २ १ २ २ १२
भायि। रायी३ंछायि। यायिनाइछायि। वनामा२.

२ १
३छा३५३यि। ओ२३४५ईं। डा (३)॥ ५ * ॥ [१०]

२ २ २ २ २
॥ मधुश्चुन्निधनम्॥ अयम्पूषारयिर्भगाइण। सोमःपु

१ २ २ २ ऽ २ २ १
नाइनोअर्षताइयि। छाइछा। औ३छो३ वा। आयि

१ २ २ २ ऽ २
छी२। पतिर्विश्वाइस्याभूमनाइः। छाइछा। औ३छो

२ १ १ २ २ १ ऽ
३षा। आयिछी२। वायव्यछो३। छाइछायि। औ

२ २ १ १२ ३ ५२ २
३छो३वा। आयिछी२। दसी। ऊर्भा२३४ औछो

२ २ २ २ ऽ १७ २
वा ॥(१) समुप्रियाअनूषताइ। गावोमदाइयाघृष्वयाइः।

---

* ऊ० गा० २०प्र० १अ० ५मा०।

२ २ ऽ २ २ १ २ २ १
हाइ३ह्वा। औइ३होइ३वा। आयिह्वी२। सोमासःकृ२ण्वा

२ २ २ २ ऽ २ २ १ १
तिपथाइः। हाइ३ह्वा। औइ३होइ३वा। आयिह्वी२। पा

२ २ २ २ ऽ २ २ १
वमानाइ३। ह्वाइ३हायि। औइ३होइ३वा। आयिह्वी२।

१ ३ ५२ २ २ २ २
सद्। दा२वा२३४औ३होवा ॥(२) यमोजिष्ठ्त्वमाभरा

२ २ १ २ २ २ ऽ २
३ए। पवमानाइ३आवायियाइ३म्। ह्वाइ३हा। औइ३होइ

२ १ १ २ २
वा। आयिह्वी२। यःपञ्चचाइ३र्षणीरभाइ३यि। ह्वाइ

२ ऽ २ २ १ १ २ २ २
३ह्वा। औइ३होइ३वा। आयिह्वी२। रायियेनाइ३। ह्वा

२ ऽ १ २ १ १२ ३
३ह्वायि। औइ३होइ३वा। आयिह्वी२। वना। माइ३ह्वा

५२ २ २ १ ३ १ १ १ १
२३४औ३होवा। मधुश्चुतां२३४५ः(३) ॥ १८ * ॥ [११]

१२ २ २ २ १ २
॥ कण्वबृहत् ॥ औ३होअयम्पूषाइ३ए। रयायिर्भा१गा२

३२ २ १२ २२ १२ २ १ २
३४ः। ह्वाइ३होयि। सोमःपुनानोअषतिं। पतायिर्वा१यि

३२ २ १ २ ४२ २ १ २
स्वा२३४। होइ३होअभूमा१ना२३४ः। ह्वाइ३होयि। वियाख्या

* ऋ० मा० २०म० २अ० १८सा० ।

१ह्वो२३४। ह्वावो। दसौ३। ज२३४भायि। उ ऊवा
ऽह्वाउ। वा ॥(१) औह्वोसमुप्रियाइए। अनूषा१ता२
३४। ह्वाह्वोयि। गावोमदायघृष्वयः। सोमासा१:कां२
३४। ह्वाह्वो। एवतायिपा१था२३४:। ह्वाह्वोयि। पवा
मा१ना२३४। ह्वाह्वो। सम्राइयि। दा२३४वाः। उ
ऊवाऽह्वाउ। वा ॥(२) औह्वोयओजिष्ठाइए। तमाभा
१रा२३४। ह्वाह्वोयि। पावमानअवायियम्। यःपाञ्चां
१चा२३४। ह्वाह्वो। षणायिरा१भा२३४यि। ह्वाह्वोयि
रयार्यंया१यिना२३४। ह्वाह्वो। वनाइ। मा२३४ह्वायि।
उऊवाऽह्वाउ। वा(३) ॥ ९ * ॥ [१२] १९

अथ तृतीयतृचे—प्रथमा।

वृषामतीनाम्पवतेविचक्षणः
सोमोअह्नाम्प्रतरीतोषसान्दिवः।

---

* ऋ० गा० २१प्र० २अ० ९सा०।

३ १२ २१ २ १ २ ३
प्राणासिन्धूनाङ्कलशाँ२अचिक्रद
१ २ २ २ २ २१ २ २ १ २
दिन्द्रस्यहार्द्यावि३शन्मनीषिभिः ॥ १ * ॥

अयं "सोमः" "पवते" अभिषूयते। कीदृशः सोमः? "मतीनां" मतयः स्तोतारः तेषां "वृषा" वर्षकः, "कामानां" "विचक्षणः" विद्रष्टा, "अङ्काम्" उषसां "दिवः" द्युलोकस्य आदित्यस्य वा "प्रतरीता" प्रवर्द्धयिता किञ्च "सिन्धूनां" स्यन्दमानानाम् उदकानां "प्राणा" प्राणयिता चेष्टयिता [अनितेः (अदा० प०) शानचि, "बहुलं छन्दसि (२, ४, ७३)"—इति शप्विकरणस्य लुक्, सुपां सुलुगित्याकारः (७, १, ३९)] "कलशान्" "अचिक्रदत्" शब्दं करोति प्रवेष्टुम्। किं कुर्वन्? "इन्द्रस्य" "हार्दि" हृदयम् "आविशन्" प्रविशन् "मनीषिभिः" मनसेषितृभिः स्तुतिभिः स्तुत इति शेषः। व्यवहित मपि मनीषिभिरित्येतत् पवतइत्यनेन सम्बध्यते ॥

"अङ्काम्"-"अङ्कः"—इति, "उषसाम्"-"उषसः"—इति, "प्राणा"-"क्राणा"—इति, "अचिक्रदत्"-"अवीवशत्"—इति च पाठाः ॥ १ ॥

---

* ऋ० आ०९, २, २, ६ (२भा० १८५ पृ०)=ऋ० वे० ७, २, १५, ४।

अथ द्वितीया।

२ १ २ २ २ २ १
मनीषिभिःपवतेपूर्व्यष्कवि*नृ-

२२१२उ २ १ २
भिर्यतःपरिकोशाँअसिष्यदत्।

३ २ ३ १ २ ३ १ ३ २ ३ २ ३
वितस्यनामजनयन्मधुक्षर--

१ १ २ २ ३ १ २ ३ १ २
न्निन्द्रस्यवायुँसख्यायवर्द्धयन्॥ २†॥

अयं सोमः "मनीषिभिः" मेधाविभिः अध्वर्यादिभिः "पवते" पूयते। यद्वा अयं मनीषिभिर्द्धाराभिः "पवते" क्षरति। कौदृशोऽयम्? "पूर्व्यः" पुराणः "कविः" मेधावी "नृभिः" नेतृभिः अध्वर्यादिभिः "यतः" सन् "कोशान्" कलशान् प्रति "परि असिष्यदत्" परितः स्यन्दते स्रवति। "वितस्य" विषु स्थानेषु लोकेषु विस्तृतस्य "इन्द्रस्य" यजमानस्य सम्बन्धि "नाम" नामकमुदकं "जनयन्" उत्पादयन् "मधु" मधुरं रसं "क्षरन्" क्षरति। किं कुर्वन्? इन्द्रस्य "सख्याय" सखित्वाय "वायुं" "वर्द्धयन्" प्रहर्षं कुर्वन्॥

"असिष्यदत्"-"अचिक्रदत्"—इति पाठौ, "युवां"-"वायोः"—इति च, "वर्द्धयन्"--कर्त्तवे"—इति च॥ २॥

---

* "पूर्व्यः कवि"—इति मु० पाठः। † ऋ० वे० ७, ३, १६, १।

अथ तृतीया।

२१ २ २ २ २ १ २
अयमपुनानउषसोअरोचय

२२१ २२ २२
दयꣳसिन्धुभ्योअभवदुलोककृत्।

२२उ २१२ १ २ २ २२
अयन्निःसम्नदुदुहानआशिरꣳ

१ २ ३१२ ३१ १ २२
सोमोह्रदेपवतेचारुमत्सरः॥ २ * ॥ १७ †

"अयं" सोमः "पुनानः" पूयमानः "उषसः" "अरोचयत्" अदीपयत्। अयं "सिन्धुभ्यः" स्यन्दमानेभ्यः वसतीवरीभ्यः ‡ "अभवत्" समृद्धो भवति। "उ"—इति पूरणः। कीदृशो-ऽयम्? "लोककृत्" लोकानां कर्त्ता [वर्षकर्त्तृत्वाद्रेतोधारकत्वाच्चास्य लोककर्त्तृत्वम्]। "अयं" सोमः "त्रिःसप्त" एकविंशतिं गाः ¶ कक्षमुखेन "आशिरं" "दुदुहानः" दुहानः [दोहस्य प्रयोजकत्वात् कर्त्तोपचारः] "मत्सरः" मदकरः "चारु" रमणीयं "पवते" चरति। किमर्थम्? "ह्रदे" ह्रदाय ह्रदय-गमनाय॥

"अरोचयत्"-"विरोचयत्"—इति पाठो॥ २॥ १७

---

* ऋ० वे० ७, २, १६, २। † 'यामं साम'—इति वि०

‡ 'समुद्रेभ्यो वा'—इत्यधिकं वि०।

¶ 'प्रतिसवनं सप्तसप्त गावः ०'०'—इति वि०।

॥ याममम् ॥ आ२यि। इया। वृषामतायिना१म्प
४ २३५ १२ ४ ७ २
वता२३यि। वा३यिचक्षणः। सोमोअक्षाम्प्रतरीतो२३।
४ २२ ३४ १२ ४ ७ ४ २
षा३सान्दिवः। प्राणासिन्धूना१ङ्कल्गा७२३। आ३च्चि
३५ १ ७ २ ४
क्रदत्। इन्द्रस्यहार्दियाविशा२३न्। मनाइयिषा५यिभा
१२ ७ २ ४ २३५
६५६यिः ॥(१) मनीषिभायिःपवतेपू२३। वी३यःकवि।
१ ७ २ ४ २३५ १ -
नृभिर्यताःपरिकोशा७२३। आ३सिष्यदत्। चितस्यना
७ ४ २३५ १ ७
मजनया२३न्। मा३धुश्चरन्। इन्द्रस्यवायु७सखिया२
२ ५ १ ७
३। यवा३र्द्धा५या६५६न् ॥(२) अयम्पुनानउषसो२३।
४ २८ ३५ १ २ ४ २८
आ३रोचयत्। अय७मिन्धूभ्यो१अभवा२३त्। ऊ३र्णो
३५ १ ७ ४ २८ ३५
कक्षात्। अयन्त्रिस्साप्तदुहा२३। ना३आंशिरम्। आ
१ २ २ ७ २ २ ४
२यि। इया। सोमोहृदायिपवतेचा२३। रुमा३त्मा
५रा६५६:(३) ॥ १० * ॥ [१]

---

० ऋ० २प्र० १अ० १०सा०।

॥ ऐडयामम् ॥ वृषा॒मातीं२३। नाम्यवाता२३ यि।

ए३। विचक्षणए३। सोमोऽआक्षा२३म्। प्रतरायिता२

३। ए३। उषसान्दिवए३। प्राणासायिन्धू२३। नाङ्क

लाश्णा॒ए२३। ए३। अचिक्रदद ३। इन्द्रस्याहा २ ३।

द्रियावायिश्णा२३न्। ए३। मनीषिभिरे३४३ ॥(१) मनी

षायिभा२३यिः। पवतायिपू२३। ए३। विंयःकविरे३।

नृभिर्याता२३ः। परिकोश्णा॒ए २ ३। ए३। असिष्यदद

३। चितस्याना२३। मजनाया२३न्। ए३। मधुच्च

रन्ते३। इन्द्रस्यावा२३। यु॒ए॒सखीया२३। ए३। यव

र्द्धयन्ने३४३ ॥(२) अयम्पूना२३। नउषासा२३ः। ए३।

अरोचयदे३। अय॒ए॒सायिन्धू२३। भ्योअभावा२३ त्।

ए३। उलोकछदे३। अयन्तायिःसा२३। मदुदूढा२३।

१ २ २ २२ २ १ १ १
ए३। नआशिरमे३। सोमोऽहार्ह २ ३ यि। पवताय्यि

२ १
चा२३। ए३। हमत्सरए३४३। ओ २३४५ई। डा(३)॥

॥ ५ * ॥ [२]

४ २ ४ ९ ४ ५
॥ यज्ञायज्ञीयम्। वृषाऽ५म। ता३यिना३पवताय्यि।

१ २ २ २ २ १ २ २
वायिचक्षणःसोमोऽन्हाम्प्रतरीतो। षा३मान्दा३यिवाः।

१२ १ २ २ २ २ १
प्राणा२सिन्धूनाङ्कलशाꣳअचिक्र। ददा२३यिन्द्रा। ङ्क

२ २ १ २ ३ २
म्मायि। स्या ३ हा। दीयाविघ्नन्मना २ र्यिषिभाउ॥(१)

१ १ १२ २ २ २
भायिर्म्मा। नीषिभिःपवतेपूर्व्यःकविर्न्नृभिर्यतःपरिकोशाꣳ।

२ १ २ २ १ १ २
षा३साय्यिष्या३दात्। त्रिता२स्यनामजनयन्मधुक्षं। रत्नं

२ १ २ २ १ २
२३यिन्द्रा। ङ्कम्मायि। स्या३वा। यूꣳसखियायवा२

३ २ १ २ १ २ २ २
र्ह्यया३उ॥(२) याना। यम्पुनानउषसोऽरोचयदयꣳसि

२ १ २ १ १
न्धुभ्योऽभवात्। ज३लोका ३ कृत्। अया२न्निःसन्नदुदु

---

* ऊ० गा० ८म० १अ० ५सा०।

३ २ २ १ २ २
ह्वानआगि । रण्सो२३माः । ऊम्मायि । वा३ हीयि ।

१ २२ १२ १११२
पावतेचारुमा२त्सराउ । वा२३४५(३) ॥ १७* ॥ [३] १७

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य तृतीयस्याध्यायस्य

पञ्चमः खण्डः ॥ ५ ॥

एवाहीति-षष्ठे खण्डे ‡:—

प्रथमतृचे—प्रथमा ।

३ १ २२ ३ २ ३ १ २२३,२ ३ २
एवाह्यसिवीरयुरेवाशूरउतस्थिरः ।

३ २ ३ २ ३ १ २
एवातेराध्यम्मनः ॥ १ ¶ ॥

हे इन्द्र ! त्वं "वीरयुः" वीरान् युद्ध-कर्मणि समर्थान् शत्रून् हन्तुं कामयमानः "एव असि" भवसि खलु । "हि" प्रसिद्धौ अतएव त्वं "शूरः" सामर्थ्यवान् "एव" भवसि । "उत" अपिच "स्थिरः" सङ्ग्रामे धैर्यवान् भवसि, एकत्र स्थित्वैव शत्रून् संहरसीत्यर्थः । एवं सति "ते" तव "मनः" "राध्य"

---

* ऊ० गा० १६प्र० १अ० १७सा० ।

‡ 'यन्नाग्नेयीयमग्निष्टोमसाम । एष्वाकमुक्थ्यम् । एवाह्यसि वामदेवीयवं द्वितीयमुक्थ्यम्'—इति वि० अवेति शेषः ।

¶ ऋ० आ० ३, १, ४, १० (१भा० ४७५पृ०) ऋ० सं० ६, ६, २०, २ ।

स्तुतिभिः आराधनीयम् "एव"। यतोऽनेन मनसा त्वं अत्रबधं सङ्ग्रामे धैर्यादिकं करोषीति तव मन एव सर्वैः स्तुत्यमित्यर्थः ॥ १ ॥

अथ द्वितीया।

३ २ ३ १ २ ३ १२ २ १ १
एवारातिस्तुवीमघविश्वेभिर्द्धायिधातृभिः।

१ १ ३ १ २
अधाचिदिन्द्रनस्सचा ॥ २* ॥

हे "तुविमघ !" [तुविरिति बहु-नाम (निघ०२,१,१)] बहुधन इन्द्र ! "विश्वेभिः" सर्वैः "धात्रभिः" कर्मधारकैः [यद्वा, देवानां हविर्दानेन पोषयित्रभिः सर्वैः यजमानैः] तव "रातिः" गवाश्वादि-दानं "धायि" तैर्धार्यत एव [दधातेर्लुङि कर्मणि रूपम्]। "चित्" एवार्थे†। "अध"‡ अनन्तरमेव हे इन्द्र ! एवंविधस्त्वं "नः" अस्माकं यष्टॄणामपि "सचा"¶ धनादि-दानेन कर्म-सहायो भव ॥

"इन्द्रनस्सचा"--"इन्द्रमेसचा"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० ६, ६, २०,३।

†, ‡ 'अधा चित्—इति पद पूरणः'—इति वि०। सायणमते तु अधेत्यव्यय मधेत्यर्थे, "निपातस्य च (६,३,१३६)"—इति दीर्घे भवति "अधा"—इति।

¶ 'अथवा सचा सखा'—इत्यधिकं वि०।

अथ तृतीया।

२उ ७ १ २ ३१८ २८
मोषुब्रह्मेवतन्द्रयुर्भुवोवाजानाम्पते।
१ २ ३ २ ३ १ २
मत्स्वासुतस्यगोमतः॥ ३ *॥ १८

हे "वाजानाम्पते" अन्नानाम्पते! बलानां वा, हे इन्द्र! "तन्द्रयुः" † निष्कारणं निवृत्तकर्मवत्त्वादालस्ययुक्तः "ब्रह्मेव" ब्राह्मणइव त्वं "मा उ षु भुवः"‡ सुष्ठु मा भव, सर्वदास्मत्-कर्म-रतो भवेत्याशासनम् ¶। तदेवाह—"सुतस्य" अभिषुतस्य, ततः "गोमतः" गव्येन क्षीरेण दध्ना वा मिश्रणवतः सोमस्य पात्रेण "मत्स्व" माद्य हृष्टो भव॥ ३॥ १८

५८ ८ २ ४ ५८ २८ १
॥ उक्थामद्वीयवम्॥ एवाहो ३ अस्मिवीरयूः। एवा
२ १ २ १ २८ ८ १
पशू१रा२ः। उता२३स्थिराः। आयिवातेरा। धिया
२ ५८ ८ २ ४ ५८ २ १
२३म्मनाउ। वा३॥(१) एवारा३तिस्तुवीमघा। विश्वा

---

* ऋ० वे० ६, ६, २०, ४।

† "उ षु"—इति पदपूरणौ। मा इति प्रतिषेधः, तन्द्रयुरित्याख्यातेन सम्बन्धितव्यः; मा तन्द्रयुः मालस्यं कुरु'—इति वि०।

‡ "भुवः वाजानां पते'—भुवर्लोकस्य अन्नानां धनानां चाधिपते भुवर्ग्रहणञ्च प्रदर्शनार्थं सर्वेषां लोकानां पते'—इति वि०।

¶ अत्रच। अस्यामृचि ब्राह्मणानामालस्य-स्वभावो वर्णितः।

२ १ २ १ २ १ २ १
यिभा१यिद्वा२। यिधा२३तृभायिः। आधाचिदायि।
२ ५ २ ४ ५
द्रना२३:सचाउ। वा३ ॥(२) मोषुब्रा३ह्मे वतन्द्रयूः।
२ १ २ १ २ १ २ १
भुवोवा१जा२। नार३म्यतायि। मात्स्वासुता। स्वगो
२ २ १ २ १ २ १
२३मताउ। वा३। स्तोषे२३४५(३) ॥ ११ * ॥ [१]

५ २ २ ४ ५ ४ ५ १ २ १
॥ सौभरम् ॥ एवा३ह्वो३असिवीरयोवा। एवांशू२
१ ७ १ ६ ५ १ २ २ २
राउता२३। ह्वो। स्था२३४यिराः। एवातेरा। धिया
ऽ २ १ ३ ५ २ ५ ४ ६ ४
३ऽह्वा३यि। मा२ना२३४औह्वोवा ॥(१) एवा३रा ३ ति
५ ४ ५ २ १ २ १ ७ १ ३
स्तुवीमघोवा। विश्वेभा२यिद्वायिधा२३। ह्वो। तू२
५ १ २ ऽ २ १ २
३४भायिः। अधाचिदि। द्रना३ह्वा३यि। सा२च्चा२३४
५ २ ५ ४ २ ४ ५ ५ ४ २ १ २
औह्वोवा ॥(२) मोषू३ब्रा३ह्मे वतन्द्रयोवा। भुवोवा२
१ १ २ ५ १ २
जाना२३म्। ह्वो। पा२३४तायि। मत्स्वासुत। स्व

---

* ऋ० गा० २म० १अ० ११सा० ।

ऽ १ १ ३ ५२ २ २ १ १
गो३ह्वा३यि। मा२ता २ ३ ४ औदोवा। ऊ २ ३ ४ ५

(३) ॥ २ * ॥ [२] १८

द्वितीयतृचे—प्रथमा।

२ ३ १ २ ३ १ २ ३ १ २
इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः।

३ १ २ ३ २ ३ १ २ ३ १२ ३ १ २
रथीतमꣳरथीनांवाजानाꣳसत्पतिम्पतिम् ॥ १† ॥

"विश्वाः" सर्वाः "गिरः" अस्मदीयाः स्तुतयः "इन्द्रम्" "अवीवृधन्" वर्द्धितवत्यः [वृधेर्ष्णिचि चङि "उर्ऋत् (७, ४, ७)" —इत्यनुवृत्तौ "नित्यं छन्दसि (७, ४, ८)"—इति ऋकारस्य ऋकार-विधानात् लघूपधगुणाभावः, निपातस्वरः (८, १ २८)] कीदृशमिन्द्रम् ? "समुद्रव्यचसं" समुद्रवद् व्याप्तवन्तं, "रथीनां" रथ-युक्तानां योद्धृणां मध्ये "रथीतमम्" अतिशयेन रथ-युक्तं, "वाजानाम्" अन्नानां "पतिं" स्वामिनं, "सत्पतिं" सतां सन्मार्ग-वर्त्तिनां पालकं ["पत्यावैश्वर्ये (६,२, १८)"—इति पूर्वपदप्रकृतिस्वरत्वम्] ॥ १ ॥

---

* ऊ० गा० २१प्र० २अ० २सा०।

† ह० आ० ४, २, १, २ (१भा० ६९७ पृ०)=ऋ० वे० १, १, २१, १।

अथ द्वितीया ।

३ १ २ ३ १ ३ १ २
सख्येतदिन्द्रवाजिनोमाभेमशवस्पते ।

२ ३ १ २र १ १ २ १ १ २
त्वामभिप्रनोनुमोजेतारमपराजितम् ॥ २ * ॥

हे "शवस्पते" † बलस्य पालकेन्द्र ! "ते" तव "सख्ये" अनुग्रहप्रयुक्ते सखित्वे वर्त्तमाना वयं "वाजिनः" अन्नवन्तः भूत्वा "मा भेम" शत्रुभ्यो भीतिं प्राप्ता मा भूम । अतः "त्वाम्" अभयहेतुम् "अभि प्र नोनुमः" सर्वतः प्रकर्षेण स्तुमः [णु स्तुतौ (अदा०, प०), "णोनः (६, १, ६५)"—इति नत्वम्, यङोलुक् (२, ४, ७४), प्रत्ययलक्षणेन (१, १, ६२), "सन्यङोः (६, १, ९)"—इति द्विर्भावः, "गुणो यङ्लुकोः (७, ४, ८२)"—इत्यभ्यासस्य गुणः, प्रत्ययलक्षणेन धातुसञ्ज्ञायां (३, १, ३२) लटोमस् (३, ४, ७८), अदादिवद्भावात् शपोलुक् (२, ४, ७२)] । कीदृशं त्वाम् ? "जेतारं" युद्धेषु जयशीलं अपराजितं क्वापि पराजय-रहितम् ॥

"प्रनोनुमः"-"प्रणोनुमः"—इति पाठौ ॥ २ ॥

---

* ऋ० वे० १, १, २१, २ ।

† 'अन्नस्य यज्ञसोवाधिपते' - इति वि०

अथ तृतीया ।

३ १२ २२ ३ २ ३ १ १२ ३ १ २
पूर्वीरिन्द्रस्यरातयोनविदस्रुन्ध्यूतयः ।

३ १२ १२३ १ २ ३ २ ३ १ २ ३ १
यदावाजस्यगोमतस्तोतृभ्योमꣳहतेमघम् ॥ ३ * ॥ १९†

॥ इति द्वितीयस्यार्द्धः प्रपाठकः ॥

"इन्द्रस्य" सम्बधिन्यः "रातयः" धन-दानानि "पूर्वीः" अनादि-काल-सिद्धाः, अस्येन्द्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः ; एवं सति इदानीन्तनोऽपि यजमानः "स्तोतृभ्यः" ऋत्विग्भ्यः "गोमतः" गो सहितस्य "वाजस्य" अन्नस्य पर्याप्तं "मघं" धनं "यदा" "मंहते" दक्षिणारूपेण ददाति, तदानीं "रातयः" बहु-धन-दान-पूर्वकाणीन्द्रस्यात्म-विषयाणि रक्षणानि "न वि दस्यन्ति" विशेषेण नोपक्षीयन्ते । ["यदा"-"यदि"—इति पाठौ । "मघ"", "रेक्णः", "रिक्थं"—इत्यादिष्वष्टाविंशति-सङ्ख्याकेषु धननामसु (निघ० २, १०) मघशब्दः पठितः । "दाति"-"दाशति"—इत्यादिषु दशस्तु दानकर्मसु "मंहते"—इति पठितम् (निघ० ३, २०, १०) । पूर्वीः—पुरु शब्दस्य "वोतोगुणवचनात् (४, १, ४४)"—इति ङीष्, आद्योकारस्य दौर्घस्छान्दसः, जसि "दीर्घाज्जसिच (६, १, १०५)"—इति निषेधं बाधित्वा "वा छन्दसि (६, १, १०६)"—इति पूर्वसवर्णदीर्घत्वम्, ङीषः प्रत्ययस्वरेणोदात्त-

---

* ऋ० वे० १, १, २१, ३ । † 'आष्टादंष्ट्रकमुख्यम्'—इति वि० ।

त्वम्। मंहते—मघः पित्वादनुदात्तत्वम्, तिङश्च त-सार्वधातुक-स्वरेण "तिङतिङः (८, १, २८)"—इति निघातो न भवति "निपातैर्यद्यदिहन्त (८,१,३०)"—इति निषेधात् ॥३॥१९

॥ आष्टादशर्चमाद्यम् ॥ इन्द्रं विश्वा अवीवृधन्। ऐया
ह्यायि। समुद्राऽ१व्या २। चसाङ्गा१यिरा२३ः। ऐया
२३ह्यायि। रथायिता१मा २म्। रथायिन१३म्। ऐया
२३ह्यायि। वाजाना१ंसा २त्। पतायिम्पा१ती२३म्।
ऐया२३ह्या३४३यि ॥(१) सख्ये तइन्द्रवाजिनः। ऐयाह्वा
यि। माभायिमा१श्वा २। वसास्पा१ता२३यि। ऐया२
३ह्यायि। तुवामा१भी २। प्रनोनू१मा२३ः। ऐया २ ३
ह्यायि। जेतारा१मा २। पराजा१यिता२३म्। ऐया२
३ह्या३४३यि ॥(२) पूर्वीरिन्द्रस्यरातयः। ऐयाह्यायि। न
वायिदा१स्या २। तियूता१या२३ः। ऐया २ ३ ह्यायि।
यदावा१जा २। स्वगोमा१ता २३ः। ऐया २ ३ ह्यायि।

२ १ २ १ २ १२ १
स्तोतृभ्यो१मा २ । घृतायिमा१घा२३म् । ऐया२३घाऽऽ

१
३यि । ओ२३४५ई । डा(३) ॥ १२ * ॥ [१]

१ १ १ २२ २ १२ २२ १२
॥ अष्टादशोत्तरम् ॥ इन्द्रं विश्वा अवीवृधन्नैयादौ ।

२ २ १ २ १ १२
ह्वे३वा । समुद्रव्यचसम् । गायिरा२३ । ऐया २ ३ त् ।

१ २ २ १ २ १ १२
औ२३ह्वोवा । रथायितमꣳर । थायिना२३म् । ऐया

१ २ २ १२ २ १ २ १
२३त् । औ२३ह्वोवा । वाजानाꣳसत्पतिम् । पातो २

१२ १ २ २ २ १२१
३मं । ऐया२३त् । औ२३ह्वोवा३४३ ॥(१) सख्ये तइन्द्र

२ १ २ १२२१२ २ २ १२ २ २ १
वाजिनऐयादौ । ह्वो३वा माभेमशवसः । पाता२ ३

१२ १ २ १२ १२ २ १ २ १
यि । ऐया२३त् । औ२३ह्वोवा । त्वामभिप्रनो । नूमा

१२ १ २ १२ २ १ २ १
२३ः । ऐया२३त् । औ२३ह्वोवा । जेतारमपरा । जा

१२ १ २ २ १२१२
यिता२३त् । ऐया२३ । औ२३ह्वोवा३४३ ॥(२) पूर्वीरि

२ २ १ १ १२ २२ १२ २ २ १ १२ १
न्द्रक्षरातयऐयादौ । ह्वो३वा । नविदस्यन्तियू । ता

---

* ऋ० गा० २प्र० १अ० १२सा० ।

१२ १ २ १२ २ २
या२३: । ऐया२३त् । औ२३होवा । यदावाजस्यगो ।

१ १२ १ २ १ २ १ १२ १
माता२३: । ऐया२३त् । औ२३होवा । स्तोतृभ्योम ए

१२ १ १२ १ २ २
धतें । माघा२३म् । ऐया२३त् । औ२३होवा३ ४ ३ ।

१
औ२३४५ई । डा(३) ॥ ११ * ॥ [२]

५ २ ४२ ५ ४२ ५● २ १ २
॥ कालेयम्† ॥ इन्द्र वा३यिश्वाश्ववीवृधान् । समूद्र

१ १ १ २ १ २ ५
व्या । चसङ्गिरा२३: । रथा३यि । ता२ ३ ४ । मएर ।

२ २ १२ ३२ १ २ ५ ४
था३यिनाम् । वाजानाएसौ । वा३४३ओ३४वा । पतो

५ २ १ ४ ५ ४२ ५ २२ १
५ यिम्पतायिम् ॥(१) सख्ये ता३इन्द्रवाजिनाः । माभा

२ १ २ ३ ० १ २ १
यिमशा । वसस्पता२३यि । तुवा३म् । आ२३४ । भिं

५२ २ १ १२ ३ १ २ ५ ४
प्रनो । नू३माः । जेतारमौ । वा३४३ओ३४वा । परा

५ २ १ ४ ५ ४२ ५ १ १ १
५ जिताम् ॥(२) पूर्वीरा३यिन्द्रस्यरातयाः । नवायिद्

१ २ ३२ २ १ १ १ ५२
स्या । तियूतया२३: । यदा३ । वा२३४ । जस्यगो ।

● ऊ० गा० ७प्र० १अ० ११सा० । †'मद्राकालेयम्'—इति ख० पु० ।

२ २ १र ३र २ ५र ५ ४
मा३ताः। स्तोतभ्योमौ। वा३४३ओ३४वा। क्रताइवि
४
मघाम्। ह्वोपुई। डा(३)॥ ३ *॥[३]

१ र र १ १ १
॥ नार्मधम्॥ इन्द्र विश्वाअवीवृधाइने। स। मू। द्र
१ २ १ २ २ १ ३ ५ २ १
व्या। चसाङ्गाइयिराः। रथाइयिता२३४माम्। रथा
२ र ५ १ र ५ २र
यिनाम्। औहौह्वो२३४वा। वा२३४जाहायि। नाए्
१ २ ३र र ५ १ ५र
सात्पाता। औह्वौह्वो२३४वा। पा२३४तीम्। एह्विया
५ २ र र २ र १ २
ईहा॥(१) सख्येतइन्द्रवाजिनाइए। मा। भायि। म।
१ २१ २ २ १ ३ ५ २१ २
घा। वसास्याइताये। तुवाइमा२३४भौ। प्रनोनूमा।
३र र ५ १ ५ २१ २ ३र
औहौह्वो२३४वा। जा२३४यितहायि। रमापारा। औ
र ५ १ ५र ५
ह्वौह्वो२३४वा। जा२३४यिताम्। एह्विया ई हा॥(२)
१र र र २ १ २ २ २
पूर्वीरिन्द्रस्यरातयाइए। न। वायि। द्। स्या। ति
१ २ २ १ ६ ५ २ १ २ ३र र
यूताइयाः। यद्वा२वा२३४जा। स्यगोमाता। औह्वौ

---

० ऋ० गा० २१५० १ च० ३मा०

५ १ ५ २१ १ २ २१
ह्वोरवा । स्तोरवतृहायि । भ्योमाऽहाता । ओ

२ ५ १ ५२ ५ ४
हौहोरवा । मारवघाम । एहयाईहा । होवुई ।

डा(३) ॥ २ * ॥ [४] १९

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य तृतीयस्याध्यायस्य

षष्ठः खण्डः † ॥ ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।

पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ३ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तरायन्ये तृतीयोऽध्यायः ‡ ॥

---

* उ० मा० २१प्र० २ख० १सा० । † 'इति द्वितीयमहः'—इति वि० ।

‡ "अत्र द्वितीयप्रपाठकस्यार्द्धः समाप्तः"—इत्येव मूल-पद-विवरणादि-सम्मतः न तु "तृतीयो" नापि "अध्यायः"—इति ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ २ ॥

॥ अथ चतुर्थोऽध्याय आरभ्यते* ॥

तत्र,

प्रथम-खण्डे—

एतेअसृग्रमिति प्रथमतृचे—प्रथमा ।

३ १ २ ७ १ २ ३ १ ३ १ २ ३ १ २
एतेअसृग्रमिन्दवस्तिरःपविचमाशवः ।

१ २ ३ १ २२
विश्वान्यभिसौभगा ॥ १† ॥

"तिरः पविचं"‡ तिर्यग् गच्छन्तं द्रुतापवित्रं प्रति "आशवः" शीघ्रगामिनः "एते" पवमाना "इन्दवः", सोमाः "विश्वानि" सर्वाणि "सौभगा" सौभगानि धनानि ¶ "अभि" लक्ष्य "असृग्रम्" ऋत्विग्भिः सृज्यन्ते ॥ १ ॥

---

* 'इदानीं चतुर्थमध्यारभ्यते'—इति वि० ।

† ऋ० वे० ७, १, १४, १ । ‡ 'तिरः=अधः'—इति वि० ।

¶ 'विश्वानि अभिसौभगा—विश्वानि सर्वाण्यभिसौभाग्यानि'—इति वि० ।

अथ द्वितीया ।

२ १ २ ३ २ ३ २ ३ १ २ १ २ ३ १ २
विघ्नन्तोदुरितापुरुसुगातोकायवाजिनः ।

१ २ ३ २ ३ १ २
त्मनाकृणवन्तोअर्वतः ॥ २* ॥

"वाजिनः" बलवन्तः† सोमाः "पुरु" बहूनि "दुरिता" दुरितानि "वि घ्नन्तः" विशेषेण नाशयन्तः "तोकाय" अस्माकं पुत्रायः‡ "सुगा" अतिसुखरूपाणि धनानि¶ "अर्वतः" अश्वांश्च "त्मना" आत्मना स्वयमेव "कृणवन्तः" ददत इत्यर्थः । ऋत्विग्भिः सृज्यन्त इति पूर्वेण सम्बन्धः ॥

"त्मना"-"तना"इति—इति पाठौ, "अर्वतः"-"अर्वते"—इति च ॥ २ ॥

अथ तृतीया ।

३ २ ३ १ २ ३ २ ३ क २ र २ २
कृणवन्तोवरिवोगवेभ्यर्षन्तिसुष्टुतिम् ।

१ २ ३ १ १ ३ १ २
इडामस्मभ्यंसंयतम् ॥ २ § ॥ १

---

* ऋ० वे० ७, १, २४, २ ।

† 'वाजिनः--अन्नवन्तः'—इति वि० ।

‡, ¶ 'सुगातोकाय—सुखाय पुत्रपौत्राय'—इति वि० ।

§ ऋ० वे० ७, १, २५, ३ ।

सोमाः अस्माकं "मवे" "अस्मभ्यं" च "संयत्त" यद्यस्मात् संयच्छति। तद् "वरिवः" धनम् "इडाम्" अन्नञ्च "जघ्वन्तः" कुर्वन्तः "सुष्टुतिम्" अस्मदीयां शोभनां स्तुतिम् * "अभ्यर्षन्ति" आभिमुख्येन गच्छन्ति ॥ २ ॥ १

अथ द्वितीयतृचे—प्रथमा।

१ २ ३ १ २ ३१२ ३१२ १२

राजामेधाभिरीयतेपवमानोमनावधि।

३१ २ २१२

अन्तरिक्षेणयातवे ॥ १ † ॥

"मनो अधि" मनुष्ये यागं कुर्वाणे सति‡। यद्वा मनावधि मनुर्मन्तव्यो यज्ञस्तस्मिन् "पवमानः" पूयमानः पुनानो वा "राजा" [राज-शब्देन सोमोऽभिधीयते "सोमं राजानमकृण्वन् (य० मा० २८, ७२)"—इत्यादिषु दृष्टत्वात्. स राजा] सोमः "मेधाभिः" स्तुतिभिः¶ सह "ईयते" गच्छति। कुत्र? "अन्तरिक्षेण" आकाशमार्गेण द्रोणकलशं प्रति "यातवे" यातुम्। द्रोणाभिगमन-कालेहि स्तोतृभिः स्तूयते खलु ॥ १ ॥

---

* 'सुष्टुति—सुष्ठु स्तुतिम्'—इति वि०।

† ऋ० वे० ७, १,४, १।

‡ 'मनौ अधि—मनुष्ये यजमाने निमित्तभूते'—इति वि०।

¶ 'मेधाभिः ईयते—ऋत्विग्यजमानानां प्रज्ञाभि'—इति वि०।

अथ द्वितीया ।

१ १ १ १ १ १ २ १ १ २
आनस्सोमसहोजुवोरूपन्नवर्चसेभर ।

३ १ १ १ २
सुष्वाणोदेववीतये ॥ २ * ॥

हे "सोम !" "देववीतये" देवानां पानाय देवानां कामाय वा † "सुष्वाणः" अभिषुतो वा त्वं "सहः" शत्रुभिर्भवन-समर्थं बलं "जुवः" [जु—इति गत्यर्थः ‡] शत्रून् प्रति शीघ्र-गमनं ¶ यद्वा सर्वतो गमनशीलं बलं । किञ्च ["न"—इति चार्थे §] "वर्चसे" [वर्च दीप्तौ (भ्वा०, आ०) दीप्त्यै सर्वत्र प्रका-शनाय रूपञ्च "नः" अस्मभ्यम् "आ भर" आहर प्रयच्छ ॥ २ ॥

अथ तृतीया ।

१ १ १ १ १ १ १ १ १ १ १ १
आनइन्दोशतग्विनङ्गवाम्पोषꣳस्वश्वयम ।

२ २ १ १ ३ १ २
वहाभगत्तिमूतये ॥ ३ ॥ ॥ २

---

* ऋ० वे० ७, २, ४, २ ।

† 'देववीतये ० ० ०—देवानां दानाय भक्षणाय वा'—इति वि० ।

‡ निघण्टौ गतिकर्मसु षष्ठीचतुर्थ्यन्तमत्वेन पठितम् (२, १४) ।

¶, § 'जुवः—रूपम् । न—न शब्द उपमार्थीय रूपमिव'—इति वि० ।

॥ ऋ० वे० ७, २, ४, २ ।

हे "इन्दो" पात्रेषु क्षरणशील ! दीपनशील ! वा हे सोम "शातग्विनं"* शतसहस्रसङ्ख्याकाभिः गीर्भिः युक्तं "गवां पोषं" गवादीनां पुष्टिवर्द्धनं "रयिं" शोभनाश्व-सङ्ग-सहितं "भगत्तिं" भगदत्तिं भजनीय-धन-दानञ्च † "ऊतये" रक्षणाय "नः" अस्माकम् "आवह" प्रापय । गवादीश्च तेषां हृदिं प्रयच्छेत्यर्थः ॥ ३ ॥ २

‡ तन्त्वानृम्णानीति पञ्चर्चं तृतीयं सूक्तम् ।

तत्र प्रथमा ।

१ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ २

तन्त्वानृम्णानिबिभ्रतꣳसधस्थेषुमहोदिवः ।

१ २ ३ १ २

चारुꣳसुकृत्ययेमहे ॥ १ ॥

"महोदिवः" महतोद्यलोकस्य¶ "सधस्थेषु" सहस्थानेषु स्थितं, "नृम्णानि" धनानि § "बिभ्रन्तं" अस्मदर्थं धारयन्तं "चारु" कल्याणं ‖ हे सोम ! "तं" तादृशं पवमान-लक्षणं "त्वा" त्वां "सुकृत्यया" शोभन-क्रियया "ईमहे" धनानि याचामहे** ॥ १ ॥

---

* 'शातग्विनं—शतसङ्ख्यातम्'—इति वि० ।

† 'भगत्तिं—शोभमानप्रतिपत्तिम्'—इति वि० ।

‡ ऋ० वे० ७, १, ५, १ ।

¶ 'महोदिवः—सकाशात्'—इति वि० ।

§ 'नृम्णानि—धनानि बलानि वा'—इति वि० ।

‖ 'चारु'—शोभनम्'—इति वि० ।

** "ईमहे"—इति याच्ञाकर्मसु निघण्टौ । प्रथमं पदम् (३, १९) ।

अथ द्वितीया।

१ २ २क २र ३ १ १ ३ १ २
संवृक्तधृष्णुमुक्थ्यम्महामहिव्रतम्मदम्।
३ १ २र ३ १ २
शतम्पुरोरुरुक्षणिम्॥ २*॥

हे सोम! "संवृक्तधृष्णु" संवृक्ताः सञ्छिन्नाः धृष्णवो धर्षण-शीलाः शत्रवो येनासौ संवृक्तधृष्णुः, तम्†, "उक्थ्यं" उक्थार्हं प्रशस्यम्, ‡ "महामहिव्रतं" महीय-बहु-कर्माणं, ¶ "मदं" मदकरं "शतं" बहूनि "पुरः" शत्रूणां पुराणि "रुरुक्षणिं" विनाशयन्तम्; त्वां धनानाम् ईमहे इति § सम्बन्धः॥ २॥

अथ तृतीया।

१ २ २ २ ३क२र ३ १ १ ३ २
अतस्त्वारयिरभ्ययद्राजानꣳसुक्रतोदिवः।
३ १ २ ३ १ २
सुपर्णोअव्यथीभरत्॥ ३ ॥॥

---

० ऋ० वे० ७, १, ५, २।

† 'संवृक्तधृष्णुम्—अतिशयेन संवर्त्तकं धृष्णुं धारणात्मकम्'—इति वि०।

‡ 'उक्थ्यम्—उक्थानि स्तोत्राणि यत्र विद्यन्ते स उक्थ्यः, तम् उक्थ्यं शंसम्'—इति वि०।

¶ 'महामहिव्रतं—महेति महान्तं व्रतमन्नं कर्म वा यत्र, स महिव्रतः, तं महिव्रतम्'—इति वि०। महदर्थशब्दद्वयस्यातिशयत्वं गम्यतइति भावः।

§ पूर्वचर्चि श्रुतम्।

॥ ऋ० वे० ७, १, ५, ३। "रश्मिमभिराज"—इति च तत्र पाठः।

हे "सुक्रतो" शोभनकर्मन् * पवमान सोम! "रयिः" रयिम् धनम्प्रति "अभि अयत्" † अभिगमयति "राजानं" ‡ "त्वा" त्वाम् "अतः दिवः" अमुष्मात् द्युलोकात् "अव्यथी" व्यथा-रहितः "सुपर्णः" श्येनवत् ¶ "भरत्" आहरत्। तथाच श्रूयते—'आदाय श्येनोऽभरत् सोमम् (ता० ब्रा०)'—इति॥

"अव्यथी"-"अव्यथिः"—इति पाठौ॥ ३॥

अथ चतुर्थी।

१ १ ३ १२ ३ १ २८ ३१ २
अधाह्हिन्वानइन्द्रियञ्ज्यायोमह्हित्वमानशे।

३ १ २८
अभिष्टिक्रद्विचर्षणिः॥ ४ §॥

"अधा" अथ "विचर्षणिः" कर्मणां विद्रष्टा॥ "अभिष्टि-क्रत्" यजमानानाम् अभीष्ट-फलस्य कर्त्ता सोमः** "इन्द्रियं" स्वकीयं फलं †† "ह्हिन्वानः" प्रेरयन् "ज्यायः" प्रशस्यतरं "मह्हित्वं" महत्वम् "आनशे" प्राप्नोति‡‡॥ ४॥

---

* 'सुक्रतो—सुक्रतु शोभनकर्म'—इति वि०।

† 'अयत्—आनयत्'—इति वि०।

‡ 'राजानं—सोमम्'—इति वि०।

¶ 'सुपर्णः—पक्षीभूत्वा'—इति वि०।

§ ऋ० वे० ७, १, ५, ४।

॥ 'विचर्षणिः—विविधानां पुरुषाणां स्वामी'—इति वि०।

** 'अभिष्टिक्रत्—अभिष्टिः यजमानः तं यः करोति स अभिष्टिक्रत्'—इति वि०।

†† 'इन्द्रियम्—इन्द्रस्य रूपं सोमम्'—इति वि०।

‡‡ 'आनशे—अश्नुते प्राप्नोति'—इति वि०।

अथ पञ्चमी ।

२ २ १ २ १ २ १ २
विश्वस्माइत्स्वर्दृशे साधारणꣳरजस्तुरम् ।

२ २ १ २ २ १ १
गोपामृतस्यविर्भरत् ॥ ५ * ॥ ३

"रजस्तुरम्" † उदकस्य प्रेरकम् "ऋतस्य" यज्ञस्य "गोपां" गोपयितारꣳ‡ "विश्वस्मै" सर्वस्मै "स्वर्दृशे" देवाय ¶. "साधारणम् इत्" समानम् § आवसन्तं सोमं "विः" पक्षौ ‖ श्येनो "भरत्" स्वर्गादाहरत् ॥ ५ ॥ ३

अथ ऋचात्मके चतुर्थसूक्ते—

प्रथमा ।

२ १ २ २ १ २ १ १ २ १ २
इषेपवस्वधारयाम्मृज्यमानोमनीषिभिः ।

१ २ २ १ २८
इन्दोरुचाभिगाइहि ॥ १ * * ॥

---

* ऋ० वे० ७, १, ५, ५ । "विश्वस्माइत्स्व०"—इति ख० पु० पाठः । "विश्व-स्माइत्स्व०"—इति मु० पाठः ।

† 'रजस्तुर—रज.-सयुक्तम्'—इति वि० ।

‡ गोपां—गमयाध्वानसयुतम्'—इति वि० ।

¶ 'स्वर्दृशे—स्वः स्वर्गलोकस्य, दृशे दर्शनाय'—इति वि० ।

§ 'इत्—इति पदपूरणः'—इति वि० ।

‖ 'विः—भक्षणीयम्'—इति वि० ।

** ऋ० आ० ६, १, २, ८ (२ भा० ६४ पृ०) = ऋ० वे० ७, १, ३८, २ ।

हे "इन्द्रे" सोम! "मनीषिभिः" ऋत्विग्भिः "मृज्यमानः" शोध्यमानः त्वम् "इषे" अस्माकमन्नाय "धारया" "पवस्व" क्षर। "रुचा" रोचमानेनान्धसा "गाः" पशून् "अभीहि" अभिगच्छ ॥ १ ॥

अथ द्वितीया।

३ १ १२ ३ २ ३ १ २
पुनानोवरिवस्कृध्यूर्ज्जनायगिर्वणः।
१ २ २ २ ३ १ २
हरेसृजानआशिरम् ॥ २ * ॥

हे "गिर्वणः" गीर्भिर्वननीय! "हरे" हरितवर्ण सोम! "आशिरं" † क्षीरं प्रति "सृजानः" विसृज्यमानः "पुनानः" पूयमानः त्वं "जनाय" ‡ जनार्थं "वरिवः" ¶ धनम् "ऊर्जम्" § अन्नञ्च "कृधि" कुरु ॥ २ ॥

अथ तृतीया।

३ २ २ १ २ २ १ २ ३ २
पुनानोदेववीतयइन्द्रस्ययाहिनिष्कृतम्।
३ २ ३ १ २ ३ २
द्युतानोवाजिभिर्हितः ॥ ३ ॥ ४

---

* ऋ० वे० ७, १, ३८, ४।

† 'आशिरं—क्षीरं दधि वा'—इति वि०।

‡ 'जनाय—यजमानार्थम्'—इति वि०।

¶ 'वरिवः—वरिष्ठम्'—इति वि०।

§ 'ऊर्जम्—अन्नं यशो बलं वा'—इति वि०।

‖ ऋ० वे० ७, १, ३८, ५।

हे सोम! "वाजिभिः" हविर्लक्षणान्नयुक्तैर्यजमानैः सह* "द्युतानः" दीप्यमानः "देववीतये" यज्ञार्थं "पुनानः" पूयमानः "हितः" हितकरः † त्वम् "इन्द्रस्य" "निष्कृतं" स्थानं "याहि" गच्छ ॥

"हितः"-"यतः"—इति पाठो ॥ ३ ॥ ४

इति सामवेदार्थप्रकाशे उत्तरायण्यस्य चतुर्थस्याध्यायस्य प्रथमः खण्डः ॥ १ ॥

द्वितीय-खण्डेण—

प्रथमर्चे—प्रथमा।

३ २ ३ १ २र ३ २ ३ १ २ ३ १ २

अग्निनाग्निःसमिध्यतेकविर्गृहपतिर्युवा।

२ २ ३क २र

हव्यवाड्जुह्वास्यः ॥ १ § ॥

---

* 'वाजिभिः—वाजसन्नश्च पुरोडाशादि-लक्षणं, तद्येषामस्ति ते वाजिनः ऋत्विग्यजमानाः तैर्वाजिभिः; अथवा वाजसनेयैः वाजिभिः अध्वर्युभिः'—इति वि०।

† 'हितः—निहितः स्थापित इत्यर्थः—इति वि०।

‡ 'वक्ष्यमाणमुक्थम्'—इति वि०।

¶ 'सप्तदशस्तोमिकं भेदमाह। इदानीमाज्यानि। आग्नेयम्—इति वि०।

§ ऋ० वे० १, १, २२, ६।

"अग्निः" आहवनीयाख्यः तस्मिन् प्रक्षिप्यमाणेन "अग्निना" निर्मथ्यन-प्रक्षीतेन वा सह "समिध्यते" सम्यग् दीप्यते*। "कौह्यो ऽग्निः? "कविः" मेधावी "गृहपतिः" यजमान-गृहस्य पालकः "युवा" नित्य-तरुणः "हव्यवाट्" हविषोवोढा [वहतेः "वहश्च (३, २, ६४)"—इति णिव-प्रत्ययः; णिस्वादुपधा-वृद्धिः (७, २, ११५) 'गतिकारकोपपदात् कृत् (६,२,१३९)"—इत्युत्तर-पद-प्रकृति-स्वरत्वम्] "जुह्वास्यः" जुह्वरूपेण मुखेन युक्तः† [हूयते अनयेति जुहूः "हुवः श्नुवश्च (उ०, २, ६१)" —इति क्विप्; तत्सन्नियोगाद् (३, २, १७८ वा०) दीर्घश्च; श्नुवद्भावात् द्विर्भावः; चुत्व-जश्त्वे; प्रातिपदिक-स्वरेणान्तो-दात्तः (फि०१, १); जुह्वास्यं यस्येति बहुव्रीहौ पूर्वपद-प्रकृति-स्वरत्वेन स एव शिष्यते (८, २, १); शेष-निपातः; यणादेशे "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (८, २, ४)"—इत्या-कारः स्वरितः] ॥ १ ॥

अथ द्वितीया।

१ २८ २१२ ३ १२ २१ २
यस्त्वामग्ने हविष्यतिर्दूतन्देवसपर्यति।
१ २ ३१२
तस्यसम्प्राविताभव ॥ २ ॥

---

* अग्निनाग्निः समिध्यते—अग्नोनां वेवेत्याहोन्याकरोति। तेन निर्मथ्याग्निना अग्निः समिध्यते सवनीयः'—इति वि०।

† 'जुह्वास्यः—अहुते आस्ये यस्य जुह्वास्यः। अथ जुहोति क्रिया यस्य आस्ये क्रियते। अथवा अहुनामा शुक्र आस्ये मुखे यस्य स जुह्वास्यः'—इति वि०।

‡ ऋ० वे० १, १, १२, २।

हे "अग्ने!" "देव!" "यः" "हविष्मतिः" यजमानः "दूतं" "त्वाम्" "सपर्यति" * परिचरति। तस्य यजमानस्य "पाविता" "भव त्र" अवश्यं रक्षको भव। [हूयत इति हविः "अर्ति-ह्वचि (उ०,२,१०७)"—इत्यादिना इसिः, प्रत्यय-स्वरेण इकार उदात्तः (३, १, ३), हविषः पतिः हविष्मतिः, "नित्यं समासेऽनुत्तरपदस्थस्य (८, ३, ४५)"—इति षत्वम्, "पत्यावैश्वर्ये (६, २, १८)"—इति पूर्वपद-प्रकृतिस्वरत्वम्। सपर्यति—सपर-शब्दात् "कण्ड्वादिभ्यो यक् (३, १, २७)"—इति यक्, धातुप्रकरणात् गुणप्रतिषेधार्थात् यकः किच्चाच्च सपरशब्दस्य धातुत्वात्ततोविहितस्य यक आर्धधातुकत्वे सति "अतोलोपः(६,४,४८)"—इति लोपः, "सनाद्यन्ता धातवः (३,१, ३२)"—इति धातुसञ्ज्ञायां तिप्, "कर्त्तरि शप् (३,१,६८)", तस्मिन् पूर्वस्य "अतोगुणे (६, १, ८६)"—इति परपूर्वत्वम्, यकः प्रत्यय-स्वरेणोदात्तत्वम् (३, १, ३), शपा सह एकादेशस्य "एकादेशउदात्त० (८, २, ५)"—इत्युदात्तत्वम्, "तिङतिङः (८, २, २८)"—इति निघातो न भवति "यद्वृत्तान्नित्यम् (८, १, ६६)"—इति प्रतिषेधात्] ॥ २ ॥

अथ तृतीया।

२ २ २ ३ १ २ २ १ २ २ १ २
योऽअग्निन्देववीतयेहविष्माऽआविवासति।

१ २
तस्मैपावकम्मृडय ॥ २ † ॥ ५

---

* "सपर्यति"—इति परिचरणकर्मसु तृतीयं नैघण्टुकम् (२, ५)।

† ऋ० वे० १, १, २२, २।

"हविष्मान्" हविर्युक्तो "यः" यजमानः "देववीतये" देवानां हविर्लक्षणहेतुयागार्थम् "अग्निम्" "आविवासति" अग्नेः समीपे विशेषेणागत्य परिचर्यां करोति *। हे "पावक" अग्ने! "तस्मै"† "सृज़य" तं यजमानं सुखय। [देववीतये—'वी गति-प्रजन-कान्त्यसन-खादनेषु (अदा०, उभ०)'—इत्यस्मादन्नार्थात् क्तिन्, देवानां वीति र्यस्मिन् यागे स देववीतिः, "बहुलाधो पूर्वपद-प्रकृतिस्वरत्वम्, "नञ्विषयस्थानिसन्तस्य (फि०, २, ३)"—इति पर्य्युदासाद्धविः-शब्दोदात्तः, मतुपः सर्वानुदात्तत्वात् स एव ग्रिह्यते। आविवासति—'वा गति-गन्धनयोः (अदा० प०)'—अस्मादन्तर्भावित-ण्यर्थादागमयितुमिच्छतीत्यर्थे सन्, आह्वानेच्छा; परिचर्यायां पर्यवस्यतीति विवासति-शब्दः परिचर्यार्थे निघण्टौ (३, ५, १०) पठितः, द्विर्भावः, अभ्यासस्य ह्रस्वः (७, ४, ५९), "सन्यतः (७, ४, ७९)"—इति इत्वम्, "अनित्यादिर्नित्यम् (६, १, १९७)"—इत्याद्युदात्तत्वम्, "तिङ तिङः (८, १, २८)"—इति निघातो न भवति "यङ्लुग्लुग्वि-त्यम् (८, १, ६६)"—इति प्रतिषेधात्. "तिङि चोदात्तवती (८, १, ७१)"—इत्याङो "सहसुपेत्यत्र (२, १, ४) सहेति योगविभागादाङस्तिङा सह समासे समासान्तोदात्तत्वे प्राप्ते (८, १, २२३) "परादिश्छन्दसि बहुलम् (६, २, १९९)"—इत्युत्तर-पदाद्युदात्तत्वम्। तस्मै—"क्रियाग्रहणं कर्त्तव्यम् (२, ३, १२ वा०)"—इति सम्प्रदानत्वाच्चतुर्थी ॥ ३ ॥ ५

---

* 'आविवासति—दीपयति'—इति वि०।

† 'तस्मै पावक—चतुर्थ्यर्थे वा द्वितीया-स्थाने भवति, तं पावकम्'—इति वि०।

अथ द्वितीयऽर्चे*—प्रथमा ।

२ १ २ २१,१ २ १ १ २ १ २

मित्रꣳहुवेपूतदक्षंवरुणञ्चरिशादसम् ।

१ १ १ २ २ ३ १ २

धियञ्घृताचीꣳसाधन्ता ॥ १ † ॥

अहमस्मिन् कर्म्मणि हविः-प्रदानाय "पूतदक्षं" ‡ पवित्रबलं "मित्रं" "हुवे" आह्वयामि [ह्वयतेः "बहुलञ्छन्दसि (२, ४, ७३)"--इति शपोलुकि सति "ह्वः सम्प्रसारणम् (६, १, ३२)"--इत्यनुवृत्तौ 'बहुलं छन्दसि (६, १, ३४)"--इति सम्प्रसारणे उवङादेशः, "विङतिङः (८, १, २८)"--इति निघातः]। तथा "रिशादसं" रिशानां हिंसकानाम् अदस्मत्तारम् ¶ "वरुणञ्च" हुवे । कीदृशौ मित्रावरुणौ ? "घृताचीं" § घृतमुदकमञ्चति भूमिं प्रापयति या धी यैन कर्म्मणा तां घृताचीं "धियम्" "साधन्ता" साधयन्तौ ‖ ['राध साध संसिद्धौ

---

* 'मैत्रावरुणमाज्यम्'—इति वि० ।

† य० वे० २३, ५७ = ऋ० वे० १, १, ४, २ ।

‡ 'पूतदक्षं'—पूतं मेध्यं, दक्षं क्षीघ्रम्'—इति वि० ।

¶ रिशादसं—अन्यूना हिंसकम्'—इति वि० ।

§ 'घृताचीं—'घृतमुदकमस्य प्रदानसमर्थाम्'—इति वि० ।

‖ महीधरस्त्वेवमिमां व्याचष्टे—'द्वे मधुच्छन्दोदृषी गायत्र्यौ आद्या लिङ्गोक्तदेवत्या । मित्रं वरुणञ्चाहं ऊवे आकरयामि । कीदृशम्? पूतदक्षम् पूतं पवित्रं सदाचारं दक्षयति धन पुत्रादिभिर्वर्द्धयति पूतदक्षस्तम् दक्षकर्मण्योरित्यसाधिजन्मात् कर्मणण् । रिशादसम रिशन्ति हि सर्वान् रिशा दुष्टाः तान् समन्ताद्यति नाशयति रिशादस. तम् । रिश हिंसायाम् दस उपक्षये । द्वयोर्विशेषणे । कीदृशा

(दि०,प०)'—इत्यस्मादन्तर्भावितण्यर्थाच्चटः शत्रादेशे (६,१, १६१), अनु बाधित्वा व्यत्ययेन (३,१,८५) शप्, अदुपदेशत्वात् उपरि शह-प्रत्ययस्य ल-सार्वधातुकानुदात्तत्वम्, द्वितीयाद्विवचनस्य शपश्च "अनुदात्तौ सुपितौ (३,१,४)"—इत्यनुदात्तत्वे, "धातोः (६, १, १६२)"—इति धातुस्वर एव शिष्यते, "सुपां सु-लुक्० (७, १, ३९)"—इत्यादिना विभक्तेराकाराद्देशः ॥१॥

अथ द्वितीया।

३ १ २
ऋतेनमित्रावरुणावृतावृधावृतस्पृशा।
१ २ ३ १ २
क्रतुम्बृहन्तमाशाथे ॥ २ * ॥

हे "मित्रावरुणौ!" [मित्रश्च वरुणश्चेति मित्रावरुणौ "देवता द्वन्द्वे च (६, ३, २६)"—इति पूर्वपदस्यानङादेशः, तादृशौ] युवां "क्रतुं" प्रवर्त्तमानमिमं सोमयागम् "आशाथे" आनशाथे व्याप्नुवन्तौ ["छन्दसि लुङ् लङ्-लिटः (३, ४, ६)"—इति वर्त्तमाने लिट्, नुड़भावश्छान्दसः]। केन? "ऋतेन" अवश्यम्भावितया सत्येन फलेन अस्मभ्यं फलं दातुमित्यर्थः। कीदृशौ युवाम्? "ऋतावृधौ" ['ऋतमित्युदक-नाम (निघ० १, १२, ६), सत्यं वा यज्ञं वा'—इति यास्कः†] उदकादीना-

---

युभौ? क्रियं कर्म साधयन्तौ साधयन्तौ। कीदृशीं क्रियम्? घृताचीं घृतमञ्चते क्षरते यत्र तत्'—इति।

* ऋ० वे० १, १, ४, २।

† 'ऋतमित्युदकनाम'—इत्यंशस्तु द्वितीय-पक्षविषये, 'सत्यं वा यज्ञं वा'—इति तु चतुर्थीनविषये इति विवेक्तव्यम्।

मन्यतमस्य वर्द्धयितारौ*। अतएव 'ऋतसृग्भा' उदकादीन् सृजन्तौ†। कीदृशं क्रतुम्? "हविष्मन्तम्" अङ्गैरुपाङ्गैश्चाति-प्रौढम्॥ २॥

अथ तृतीया।

३ १ २ ३ १ २८ ७ १ २३१ २
कवीनोमित्रावरुणातुविजाताउरुक्षया।
१ २ ३ १ २
दक्षन्दधातेअपसम्॥ ३ ॥ ६

"मित्रावरुणा" मित्रावरुणौ एतौ देवौ "नः" अस्माकं "दक्षं" बलम् "अपसं"¶ कर्म्म च "दधाते" पोषयतः, कीदृशौ? "कवी" मेधाविनौ, "तुवि-जाता" तुविजातौ बह्वनामुपकारक-तया समुत्पन्नौ, "उरुक्षया" बहु निवासौ [मित्रावरुणौ—मित्र: शब्दः प्रातिपदिक-स्वरेणान्तोदात्तः (फि० १, १), वरुण-शब्दो नित्स्वरेणाद्युदात्तः (६, १, १९७)। तुविजातौ—बह्वना-मुपकारकतया तत्सम्बन्धित्वेन जाता विति षष्ठीसमासे समासा-न्तोदात्तत्वम् (८, १, २२३), चतुर्थीसमासे हि "क्रौ च (६, २, ४५)"—इति क्वचित् पूर्वपदप्रकृतिस्वरः स्यात्। उरूणां बह्वनां क्षयौ उरुक्षयौ, 'क्षि निवास-गत्योः (तु० प०)'—इति धातोः क्षियन्त्यस्मिन्निति क्षय इत्यधिकरणे एव अच् प्रत्ययान्तस्य "क्षितः

---

* 'ऋताहवौ—ऋतमग्न तद् वर्द्धयतः'—इति वि०।

† 'अग्निष्टोमादिकम्'—इति वि०।

‡ ऋ० वे० १, १, ४, ४।

¶ 'अपसं—कर्म'—इति वि०।

(६, १, १६२)"—इत्यन्तोदात्तत्वे प्राप्ते "चयो निवाचे (६, १, २०१)"—इत्याद्युदात्तत्वं विहितम्, समासे तु "समासस्य (८, १, २२३)"—इत्यन्तोदात्तत्वं बाधित्वा क्षदुत्तरप्रकृति-स्वरेण (६, २, १३९) प्राप्तमुत्तरपदाद्युदात्तत्वम् यद्यपि याचादि-स्वरेणान्तोदात्तत्वेन बाध्यते तथापि "परादिश्छन्दसि बहुलम् (६, २, १९९)"—इत्युत्तरपदाद्युदात्तत्वं द्रष्टव्यम्। दक्षः—दक्षतेरुत्साहकर्मणो जित्वादाद्युदात्तः (६, १, १९७)। आप्यते फलमनेनेत्यपः कर्म, "आपः कर्माख्यायां क्त्वो नुट् च वा (उ० ४, १०९ दी० बृ०)"—इत्यन्नन्तस्य अपसम्भारेइत्यादौ निक्षा (६, १, १९७) दाद्युदात्तस्यापस्-शब्दस्यात्र व्यत्ययेन प्रत्ययाद्युदात्तत्वम् (३, १, ३)] ॥ ३ ॥ ६

अथ तृतीयतृचे*—प्रथमा।

१ २ १ ३ २ ८ ३ १ २ ८
इन्द्रेणसꣳहिदृक्षसेसञ्जग्मानोअबिभ्युषा।
३ १ २ ३ १ २
मन्दूसमानवर्चसा ॥ १ † ॥

हे मरुद्गण! त्वम् "इन्द्रेण" "सञ्जग्मानः" सङ्गच्छमानः "सं दृक्षसे हि" सम्यग् दृश्येथाः खलु, अवश्यमस्माभिर्द्रष्टव्य-

---

* 'ऐन्द्रमाज्यम्'—इति वि०।

† ऋ० वे० १, १, १२, २।

मित्यर्थः *। कीदृशेनेन्द्रेण ? "अबिभ्युषा" भीति-रहितेन कीदृशाविन्द्रमरुतौ ? "मन्दू" नित्य-प्रमुदितौ, † "समान-वर्चसा" तुल्य-दीप्ती ['पुरा कदाचित् हत्र-वध-दशायाम् इन्द्रस्य सखायः सर्वे देवा हत्र-खासेनाभिसारितास्तदानीमिन्द्रस्य हत्र-सम्बन्धि-सकल-सेना-जयार्थं मरुद्भिः सङ्गमी भूतः'—सोऽयमर्थो "हत्रस्यखसखाय (ऋ० आ० ४, १, ४, २, ६५६ पृ०)"—इति मन्त्रे सङ्गृहीतः ; 'इन्द्रो वै हत्रं हनिष्यन्'—इति ब्राह्मणे (ता०) प्रपञ्चितश्च ; इन्द्रशब्दः परमैश्वर्यवन्तं मरुद्गणञ्चाभिधत्ते, तदानीमिन्द्रस्य सम्बोधनं बहिरेवाध्याहर्त्तव्यम्। तथाचेयमृक् यास्केनैवं व्याख्याता—"इन्द्रेण हि सन्दृश्यमे सङ्गच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात्, समानवर्चसेत्येतेन व्याख्यातम् (४, १२)"—इति। सन्दृश्यसे—सम्पश्येथाः "दृशेश्चेति वक्तव्यम् (७, १, ७ वा०)"—इत्यात्मनेपदम्, दृशेः "लिङर्थे लेट् (३, ४, ७)"—इति प्रार्थनायां लेट्, थासस्से (३, ४, ८०), "लेटोऽडाटौ (३, ४, ९४)"—इत्यड़ागमः, "सिबबहुलं लेटि (३, १, ३४)"—इति सिप्, "सत्र्ग्रा-पूर्वको विधिरनित्यः (प० शे० ९३)"—इति गुणाभावः, व्रश्चादिना (८, २, ३६) षत्वम्, "षढोः कः सि (८, २, ४१)"

* 'इन्द्रेण स हि दृश्यसे मरुद्गण इति वाक्यशेषः। अथवा व्यत्ययेन आख्यायिषसे—मरुद्गणेन दृश्यसे इन्द्रः। अथवा आदित्य इन्द्रोऽभिधीयते, मरुद्गणा रश्मिगणाश्चेति: सह दृश्यसे। अथवा इन्द्रेण आदित्येन, सङ्गच्छमानः सङ्गच्छमानः'—इति वि०।

† 'मन्दू—मदन-स्वभावेन'-इति वि०।

—इति वत्वम्, "आदेश-प्रत्यययोः (८, ३, ५९)"—इति सिपः षत्वम्, बहुल-ग्रहणात् सिपः परस्ताच्छबपि भवति, सिपा व्यवधानात् पञ्चम्यादेशो न भवति, अपः पित्त्वादनुदात्तत्वम् (३, १, ४), उकारस्य ल-सार्वधातुकत्वाद् ङित्त्वम् (६, १, १८६), धातु-स्वर एव शिष्यते (६, १, १६२), हि-शब्द-योगात् "तिङ-तिङः (८, १, २८)"—इति निघातो न भवति "हि च (८, १, ३४)"—इति प्रतिषेधात्। सञ्जमानः—गमेः सम्पूर्वात् छन्दसि लुङ्लङ्लिटः (३, ४, ६)"—इति वर्त्तमाने लिट्, "समोगम्यृच्छि० (१, ३, २९)"—इत्यात्मनेपद-निघातात् लिटः कानजादेशः (३, २, १०६), द्विर्भावः (६, १, ८), हलादि-शेषः (७, ४, ६०), अभ्यासस्य चुत्वम् (७, ४, ६१), "गमहन० (६, ४, ९८)"—इत्युपधा-लोपः, कानचश्चित्त्वा-दन्तोदात्तत्वम्, गति समासे (२, २, १८), कृदुत्तरपदप्रकृति-स्वरत्वम् (६, २, १३९)। अभिष्युषा—'ञि भी भये (जु०, प०), पूर्ववल्लिट् (३, ४, ६), "शेषात् कर्त्तरि० (१, ३, ७८)" —इति परस्मैपदम्, "क्वसुश्च (३, २, १०७)"—इति लिटः क्वसुरादेशः, तस्य कित्त्वाद् गुणाभावः (१, १, ५), अभ्यासस्य कुत्व-जश्त्वे (७, ४, ६८)—(८, ४, ५४) क्वादिनियमात् प्राप्तइट् (७, २, १३) "वस्वेकाजाद्धसाम् (७, २, ६७)"—इति नियमात् निवर्त्तते नञ्समासे तृतीयैकवचने भत्वाद् "वसोः सम्प्रसारणम् (६, १, १३१)"—इति वकारस्य उकारा-देशः, "सम्प्रसारणाच्च (६, १, १०८)"—इति पूर्वरूपत्वं बाधित्वा "एरनेकाच (६, ४, ८२)"—इति यणादेशः, अव्यय-

पूर्वपदप्रकृतिस्वरत्वम् (६, २, १६८), पूर्वेण सह संहिताया मोकारस्य "एङः पदान्तादति (६, १, १०९)"—इति पररूपत्वे प्राप्ते "प्रकृत्यान्तः पादमव्यपरे (६, १, ११५)"—इति प्रकृतिभावः । मन्द—'मद स्वप्न-मोद-मद-स्वप्न-कान्ति-गतिषु' (भ्वा०, आ०.), "इदितो नुम् धातोः (७, १, ८५)"—इति नुमागमः, कुरित्यनुवृत्तौ "खरु-घसु-पीयु-नीलसु-खिगु (उ० १, ३६)"—इत्यत्राविभक्तिक-निर्देशादन्तेर्हिकुरितिपदात्त्वन्तरादुणि कुरित्युत्तम्, प्रत्ययस्वरेणान्तोदात्तः (३, १, ३), द्विवचने सौ "प्रथमयोः पूर्वसवर्णः (६, २, १०४), लृतोयैकवचने च "सुपां सु लुक्० (७, १, ३९)"—इत्यादिना पूर्वसवर्णदीर्घत्वम्, समानं वर्चो ययोरिति वा यस्येति बहुव्रीहिः, द्विवचने "सुपां सु-लुक्० (७, १, ३९)"—इत्याकारः, समान-पदस्य प्रातिपदिकान्तोदात्तत्वम् (फि० १, १), बहुव्रीहौ पूर्वपद-प्रकृति-स्वरेण (८, २, १), तदेवावशिष्यते ॥ १ ॥

अथ द्वितीया ।

१ २८१ २७ ३ १ २ १ १ २ ३ १

आदह स्वधा मनुपुनर्गर्भत्वमेरिरे ।

१ १ ३ १ २ १ १ ६

दधानानामयज्ञियम् ॥ २ * ॥

अहेत्यवधारणार्थः†] । "आत् अह" वर्णात्तीरनन्तरमेव "स्वधामनु" इतःपरं जनिष्यमाणमन्त्रमुदकं वा अनुलक्ष्य महतो

---

* ऋ० वे० १, १, ११, ४ ।

† "आदहेति च ह इति च विनिग्रहार्थौ धौ पूर्वेण सम्प्रयुज्यते । अथमहेदं करो त्वयमिद ह करिष्यतीति"—इति निरु० १, ४ .

देवाः "पुनः गर्भत्वम् या ईरिरे" मेघ-मध्ये जातस्य गर्भत्वं प्रेरितवन्तः* [प्रतिसवत्सर मेवं कुर्वन्तीति दर्शयितुं पुनः-शब्दः प्रयुक्तः]। कीदृशा मरुतः ? "यन्नियं" यन्नार्हं "नाम" "दधानाः" धारयन्तः। [सप्तसु गणेषु मरुतामौदृक् वातानामौदृक् चेत्यादीनि यज्ञ-योग्यानि नामान्यन्यत्राम्नातानि। "यज्ञः" —इत्यादिष्वष्टाविंशति-सङ्ख्याकेष्वन्ननामसु "उर्क्" (१५), "रसः" (१६), "स्वधा" (१७)—इति पठितम्, (निघ० २, ७) "अर्चिः"—इत्यादिष्वेकशत-सङ्ख्याकेषूदक-नामसु च "तेजः" (९६), "स्वधा" (९७), "अक्षरम्" (९८)—इति पठितम् (निघ० १, १२)। "आत्"-"अह"-निपातावाद्युदात्तौ (फि० ४, १२)। स्वधा—स्वं लोकं दधाति पुष्णातीति स्वधा, "आतोऽनुपसर्गेकः (३, २, ३), कृदुत्तरप्रकृतिस्वरत्वम् (६, २, १६९)। अनु-पुनः-शब्दौ निपातावाद्युदात्तौ (फि०, ४, १२)। गर्भस्य भावो गर्भत्वं प्रत्ययस्वरः (३, १, ३)। ईरिरे—अन्तर्भावितण्यर्थात् 'इण् गतौ (अदा०, प०)'—इत्यस्मादनुदात्तेतः परस्य लिटो झस्य इरेच्, चित्त्वादन्तोदात्तः (६, १, १६२), "सह सुपा (२, १, ४)"—इत्यत्र "सुपा" योगविभागादाङा सह तिङः "समासस्य (८, १, २२३)"—इत्यन्तोदात्तत्वम्, "इजादेश्च गुरुमतोऽनृच्छः (३, १, ३६)"—इत्याम् न भवति मन्त्रत्वात् † अह-शब्द-योगाविघातोभावः "तु-पश्य-

---

* 'आदित्य-रश्मय उत्पद्यन्ते, सविता सह गच्छन्ति, नै. पुनरस्तमिते सवितरि गर्भत्वं यान्ति'—इति वि०।

† "कास्प्रत्ययादाममन्ते लिटि (३, १, ३५)"—इति सूत्रादिदं 'अमन्ते'—इत्यनुवर्तते रिति भावः।

प्रस्तावैः पूजायात् (८,१,२८)"—इति निषेधात्। दधान्नः—मानबन्धित्वादन्तोदात्तत्वे प्राप्ते (६, १, १६२) "अभ्यस्तानामादिः (६, १, १८९)"—इत्याद्युदात्तत्वत्। यन्नमर्हति यन्निः यम्, "यन्नर्त्विग्भ्यां घ-खञौ (५, १, ७१)"—इति घ-प्रत्ययः "प्राग्वतेयौनौयियः फ-ढ-ख-छ-घां प्रत्ययादीनाम् (७,१,२)"—इतीयादेयः प्रत्ययस्वरेण इकार उदात्तः (२, १, २)]॥ २॥

अथ तृतीया।

१ २ ३ २ ३ १ ५ २ १ २
वीड़ चिदारुजत्नभिर्गुहा चिदिन्द्रवह्निभिः।
१ २ ३ २ ३ १ २
अविन्दउस्रिया अनु॥ ३ *॥ ७

अस्ति किञ्चिदुपाख्यानम्—'पणिभिर्देवलोकाद् गावोऽपहृताः, अन्धकारे प्रक्षिप्ताः ताश्चेन्द्रो मरुद्भिः सहाजयत'—इति। एतच्च बह्वृचानुक्रमणिकायां सूचितम्—"पणिभिरसुरैर्निगूढा गा अन्वेष्टुं सरसादेत शुनौन्द्रेण प्रेषिता ता ऋग्भिः पणयोऽमित्रीयन्तः प्रोचुः"—इति। मन्त्रान्तरेऽपि दृष्टान्ततया सूचितम्—"निरुद्धा आपः पणिनेव गावः"—इति] तदेव उपाख्यान मभिप्रेत्योच्यते—हे "इन्द्र।" "वीडु चित्"† दृढमपि दुर्गमस्थानम् "आरुजत्नुभिः"‡ अभिभञ्जनशीलैः "वह्निभिः" वोढृभिः अन्यत्र

---

* ऋ० वे० १, १, ११, ५।

† 'चित्—इति पदपूरणः। वीडु अवस्रंसिषु स्थित'—इति वि०।

‡ 'अवस्रंसिषु स्थिता अगच्छोऽपयन्ति आरुजत्नव —इति वि०।

¶ दृढनामकैरस्त्रैभि —इति वि०।

नेतुं समर्थैः मरुद्भिः सहितस्त्वं "गुहा चित्" गुंहायामपि स्थापिता "उस्रियाः" गाः "अन्वविन्दः † अन्विष्य लब्धवानसि । ["ओजः" (१), "पाजः"(२)—इत्यादिषष्टाविंशति-सङ्ख्याकेषु बल-नामसु "दक्षः"(१३) "वोलु"(१४) "क्षोभम्" (१५)—इति पठितम् । (८, ९) नव-सङ्ख्याकेषु गो-नामसु "अघ्न्या"(१), "उस्रा" (२), "उस्रिया" (३)—इति पठितम् निघ० (२, ११)। वोडु—प्रातिपदिक स्वरः (फि० १, १)। चित्—आदिरुदात्तः । आरुजद्भिः—'रुजो भङ्गे (तु० प०) इत्यस्मादौणादिकः कत्नुच् प्रत्ययः, कित्त्वाद् (१, १, ५) गुणाभावः, चित्त्वादन्तोदात्तत्वम् (६, १, १६) समासे ऽङ्गुत्तर-पदप्रकृतिस्वरत्वञ्च (६, २, १६०)। गुहा—सप्तम्यां डादेशः (७, १, ३९), "ग्रामादीनाञ्च (फि०, २, १५)"—इत्याद्युदात्तः । वङ्क्षभिः—"वह्नि-प्रि-यु-स्यु-ग्ला-हा-त्वरिभ्योनिः (उ० ४, ५१)"—इति नि-प्रत्ययः, नित्त्वादाद्युदात्तः । अविन्दः—'श्नेमुचादीनाम् (७, १, १९)"—इति नुमागमः, लुङ्-लङ्-लृङ् क्षुड्दात्तः (६, ४, ७१)। वसन्तीति उस्रियाः वसोः कर्त्तरि यक् प्रत्ययः, षत्वाभावश्च बाहुलकादृहणीयः (३, १, ८५), उक्तं हि 'यत्र पदार्थविशेष मुक्तं प्रत्ययतः प्रकृतेश्च तद् ग्राह्यम् (३, १, ८५ भा०)'—इति, इकारः प्रत्ययस्वरेणान्तोदात्तः (३, १ ३) ॥ २ ॥ ७

---

० 'उस्रिया.—आदित्यरश्मय.—इति वि० ।

† 'अविन्द. विदज्ञानं (अदा० प०) —इत्यस्यैदं रूपम् —इति, 'अतु—आतुपूर्वश्च' इति च वि० ।

अथ चतुर्थं हृचे* प्रथमा ।

१२३१ २२ ०३१ २२३२ ३२
ताऊवेययोरिदम्यप्ने विश्वम्युराकृतम् ।

३ १ ०२ १
इन्द्राग्नीनमर्डतः ॥ १† ॥

"ता" तौ तादृशौ "इन्द्राग्नी" "हुवे" आह्वये । "ययोः" इन्द्राग्न्योः "पुरा" पूर्वस्मिन् काले "कृतं" "विश्व" सर्वम् "इदं" पूर्वासृक्षु कीर्त्तितं वीर्यं "पप्ने" पन्यते ऋषिभिः स्तूयते;—ताविन्द्राग्नी हुवे इत्यन्वयः । तौ चेन्द्राग्नी न "मर्डतः" [मर्डतिः हिंसाकर्मा (निघ०२, १९, १४)] स्तोतॄन् अहिंस्रः । अतोऽस्मान् आहुतौ रक्षतामिति भावः ॥ १ ॥

अथ द्वितीया ।

२१ २३ २३ १२ ३१२
उग्राविघनिनाम्रधइन्द्राग्नीहवामहे ।

१ २ ३१२
तानोम्रडातईदृशे ॥ २‡ ॥

"उग्रा" उग्रौ उद्गूर्ण-बलौ अतएव "मृधः" शत्रून् "विघनिना" विघनितौ विशेषेण हतवन्तौ "इन्द्राग्नी" "हवामहे" आह्वयामहे । तौ चेन्द्राग्नी "ईदृशे" अस्मिन् सङ्ग्रामे "नः"

---

* 'ऐन्द्राग्नमाज्यम्'—इति वि० ।

† ऋ० वे० ४, ८, २७, ४ ।

‡ ऋ० वे० ४, ८, २७, ५ ।

अस्मान् "मृळातः" सुखयताम् [यद्वा मृळातिः उपदंयाकर्मा ; नोऽस्माकं मृळातः उपदयां कुरुताम्] ॥ २ ॥

अथ तृतीया।

१ १ २ १ २८ २ १ १ २८

हथोवृत्राण्यार्य्याहथोदासानिसत्पती।

१ २८ ३ २ ३ १ २

हथोविश्वाअपद्विषः ॥ २* ॥ ८

हे इन्द्राग्नी! "आर्या" आर्यैः कर्मानुष्ठातृभिः कृतानि "वृत्राणि" उपद्रवजातानि "हथः" हिंस्थः। तथा "सत्पती" सतां पालयितारौ सन्तौ "दासानि" दासाः कर्महीनाः† शत्रवः, तैः कृतानि चोपद्रवजातानि हथः। अपि च "विश्वाः" सर्वाः "द्विषः" द्वेष्ट्रीः शत्रुभूताः प्रजाः "अप हथः" विनाशयथः अतोऽस्माकमध्येव मेव कुरुता मिति भावः॥

"हथः"-"हनः"—इति पाठो ॥ २ ॥ ८

इति सामवेदार्थप्रकाशे उत्तरार्चस्य तृतीयस्याध्यायस्य

द्वितीयः खण्डः ‡ ॥ ४ ॥

---

* ऋ० वे० ४, ८, २८, १।

† 'दासानि—यादादीनि रक्षः-पिशाचादीनि'—इति वि०।

‡ 'उक्ता प्रातःसवनम'—इति वि०।

अथ तृतीयखण्डे*

प्रथमतृचे—प्रथमा।

३ १ २८ ३१२३१२३२३१२
अभिसोमासआयवःपवन्तेमद्यमन्दम्।

३ १ ३८ ३१२ ३१२ ३१२ ३१२
समुद्रस्याधिविष्टपेमनीषिणोमत्सरासोमदच्युतः॥ १†॥

"आयवः" गमन-शीलाः "सोमासः" सोमाः "मद्य" मद्-करं मदम् आत्मीयं रसम् "अभियवन्ते" अभितो निर्गमयन्ति। कुत्रेत्युच्यते "समुद्रस्य" अन्तरिक्षस्य "अधिविष्टपे" अधिकं समुच्छ्रिते पवित्रे यद्वा समुद्रस्य यस्मात् समुद्द्रवन्ति रसास्तस्य कलशस्य "अधि" उपरि "विष्टपे" स्थाने पवित्रे निर्गमयन्ति। कीदृशाः? "मनीषिणः" मनस ईशितारो "मत्सासः" मदकराः "मदच्युतः" मदस्राविणः॥

"विष्टपे"-"विष्टपि"—इति पाठो, "मदच्युतः"-"स्रविदः" इति च॥ १॥

अथ द्वितीया।

३ १ २८ ३ २ ३१ २ ३१३२३ २
तरत्समुद्रम्पवमानऊर्मिणाराजादेवऋतम्बृहत्।

३ २ ३१ ३१२ ३१ २३ १२ ३२०३१२
अर्षामित्रस्यवरुणस्यधर्मणाप्रहिन्वानऋतवृहत्॥२‡॥

---

* 'इदानीं माध्यन्दिनं सवनमुच्यते। ऋचोऽत्यन्ते—गायत्री वैष्टम्भादीनि सामानि, सान्तां नामत आर्षेयमुक्तम्'—इति षि०।

† ऋ० मा० ६, १, ३, ८ (२भा० ९६पृ०)=ऋ० वे० ७, ५, १४, ४।

‡ ऋ० वे० ७, ५, १५, १। "समुद्रिय."—इति च तत्र पाठः।

"पवमानः" पूयमानः "देवः" द्योतमानः "बृहत्" अत्यन्तम् * "ऋतम्" सत्यभूतः † "राजा" सोमः "समुद्रम्" अन्तरिक्षं कलशं वा "ऊर्मिणा" धारया ‡ "तरत्" तरति "हिन्वानः" प्रेयमाणः। "ऋतम्बृहत्" अत्यन्तं सत्यभूतः स सोमः "मित्रस्य वरुणस्य" मित्रावरुणयोः "धर्मणा" धारणार्थं "प्रार्षति" प्रार्षति प्रकर्षेण गच्छति ¶॥

"अर्षा"-"अर्षन्"—इति पाठौ॥ २॥

अथ अध्यास्यारूपा तृतीया।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
नृभिर्यमाणोहर्यतोविचक्षणोराजादेवःसमुद्रियः॥ ३ §॥ ८

"नृभिः" कर्म-नेतृभिः ऋत्विग्भिः "यैमानः" नियम्यमानः "हर्यतः" स्पृहणीयो "विचक्षणः" विद्रष्टा "देवः" दीप्यमानः "समुद्रियः" अन्तरिक्षे भवः॥ "राजा" सोमः इन्द्रार्थं पवते इति शेषः॥

"यैमाणः"-"यैमानः" इति पाठौ॥ ३॥ ९

---

* 'बृहत्—महत् अथवा बृहत्साम'—इति वि०।

† 'ऋतं—सत्यम् अन्नम् प्रजापतिः यज्ञं वा'—इति वि०।

‡ 'ऊर्मिणा—उदकसङ्घातेन'—इति वि०।

¶ 'अर्षा—द्रष्टा'—इति वि०।

§ ऋ० मा० ९, १, ४, ३ (२मा० ११२पृ०)=ऋ० वे० ७, ४, १७, ४।

॥ "समुद्रः"—इत्यन्तरिक्ष नामसु पञ्चदशं नैघण्टुकम् (१, ३)। 'समुद्रियः—समुद्रात्मकः'—इति वि०।

॥ पौरुमद्गम् ॥ अभिसोमासश्चायवः। औहोवा।
एह्यिया। हाउ। पवन्तेमा२दियम्मदम्। समुद्रा१
स्या२। धायिविष्टपा३यि। मानौषा२३४यिणाः। मत्सा।
रासौवाओ२३४वा। हा३हायि। मदाय्च्युताः ॥(१)
मत्सरासोमदच्युतः। औहोवा। एह्यिया। हाउ। म
त्सरासो२मदच्युतः। तरात्मा१म्२। द्राम्यवमा३। ना
ऊर्म्मा२३४यिणा। राजा। दायिवौवाओ२३४वा। हा
३हायि। ऋताय्म्बृहात् ॥(२) राजादेवऋतम्बृहत्। औ
होवा। एह्यिया। हाउ। राजादेवा२ऋतम्बृहत्। अ
र्षामा१यिचा२। स्यावरुणा३। स्याधर्म्मा२३४णा। प्र
धायि। क्वानौवाओ२३४वा। हा३हायि। ऋताय्म्बृ
हात्। होय्इ। डा(३) ॥ १४ * ॥ [१]

* ऊ० गा० २प्र० १अ० १४सा०।

॥ उभयतःस्तोभं गौतमम् ॥ हावभिसोमासस्त्रायवो

हाउ। पावन्तेम। दियाम्मदा२३४म्। हाद्दोयि। सु

मुद्रस्याधिविष्टपे। मानीषिणा३४:। हाद्दोयि। मांस

रासा३४:। हाद्दो३। मदो२३४वा। च्यु५तो६हायि ॥(१)

हाउमत्सरासोमदच्युतोद्दाउ। मात्सरासः। मदाच्यु

ता२३४:। हाद्दोयि। तरत्समुद्रम्पवमा। नाऊर्म्मि

णो३४। हाद्दोयि। राजादायिवा३४:। हाद्दो३यि।

क्रतो२३४वा। बृ५द्दो६ हायि ॥(२) हाउराजादेवक्रत

म्बृहद्दाउ। राजादेवः। क्रतम्बृहा२३४त्। हाद्दोयि।

अर्षामित्रस्यवरुण। स्याधर्मणा३४। हाद्दोयि। प्रा

च्छिन्वाना३४:। हाद्दो३यि। क्रतो२३४वा। बृ५द्दो६

हायि(३) ॥ १५ * ॥ [२]

● ऋ० मा० १म० १अ० १५सा०।

॥ हिङ्कारं वामदेव्यम् ॥ अभिसो२३मास आयवः।

पाऽवन्ते मघम्मद ओ३ समुद्रस्याधिविष्टपाऽयिमनौ ह्वोइ। ऊ

म्मा२। पा२३यिणाः। मत्सरासोमदौ ह्वोइ। ऊम्मा२।

ऽच्युता। औ३ह्वोवा ॥(१) मत्सरा २ ३ सोमदच्युताः।

मात्सरासोमदच्युतन्तरत्समुद्रम्यवमाऽनऔ ह्वोइ। ऊम्मा

२। मा२३यिणा। राजादेवाऽऋतौ ह्वोइ। ऊम्मा२।

बृहात्। औ२३ह्वोवा ॥(२) राजादा २ ३ यिवऋतम्बृ

हात्। राऽजादेवऋतम्बृहादर्षामित्रस्यवरुणाऽस्यधी ह्वोइ।

ऊम्मा२। मा२३णा। प्रहिन्वानाऽऋतौ ह्वोइ। ऊम्मा

२। बृहात्। औ२३ह्वोवा। ह्वोइ। डा(३) ॥ ७ * ॥ [३]

॥ गायत्रपार्श्वम् ॥ आभौ। सोमास आ३१उवा२३।

या२३४वाः। पवन्ते मदियम्मद ओ३ समुद्राधिविष्टपेमनीषि

---

* ऋ० गा० ४प्र० २अ० ७सा०।

२ १ १ १ १ २ १ २ ७ २ १ ४ १
ग्ना२३४५ः। मत्सारा१सा२ः। मदा३। ऊं२३वा३। ष्यू

१ १ १ १ १ २ १ २ १
ता२३४५ः॥(१) मात्सा। रासामदा३१उवा२३। ष्यू

५ ० १ २ १ १ २ १ २ १ २ ८ १
२ ३४ताः। मत्सरासोमदच्युत्तरत्समुद्रम्पवमानऊर्मि

२ १ १ १ १ २ २ १ २ २ १ ४
ग्ना२३४५। राजादा१यिवा२ः। कृता३म्। ऊं२३वा

१ १ १ १ १ २ २ १ २ १
३। बृहा२३४५त्॥(२) राजा। दायिवकृता३१उवा२

५ १ २ २ १ २ १ २ १ २ १ २ १
३। बृ२३४हात्। राजादेवकृतम्बृहदर्षामित्रस्यवरुण

१ २ १ १ १ १ २ १ २ २ १
स्यधर्म्मणा२३४५। प्रहायिन्वा१नाः। कृता३म्। ऊं

४ १ १ १ १ १
२३वा३। बृहा२३४५त(३)॥ ८ * ॥ [४]

५ २ ४ २ ५ ४ २ ५ १ २ २
॥ पौरुहन्मनम्॥ अभिसो३मास्रायवाः। पावन्ते

१ १ १ २ २ १
म। दियाम्मा१दा२म्। मादा२म्। सामुद्रस्या। धा

२ १ २ १ २ ३ ५
यि। विष्टपा३यि। विष्टपा३यि। मानीषा२३४यिषाः।

१ २ २ १ २ ३ ५ ४
मात्सरासो। मादच्यु२३४ताः। मदा ५ च्युताः॥(१)

---

* ऊ० मा० ४प्र० १ख० ८सा०।

५ २र १ २ १ १ २
मत्सरासः। मदाच्यू१ता२:। च्यूता२:। तारन्तमु।

१ २ १ २ १ १ १ ५ २
ग्राम्। पवमा३। पवमा३। नाऊर्मा२३४यिष्णा। रा

२र २ १ २ ३ ५ ४ ५र २
जादेवा:। आर्त्तम्बृ२३४हात्। ऋतापुम्बृहात्॥(२) राजा

२ ४५ ४ ५ १ २ २र १ २ १
दा३यिवऋतम्बृहात्। राजादेवः। ऋतांबृ१हा२त्। आ

२ १ १ २ १ २ १ १ १
र्षामित्र। स्या। वरुणा३। वरुणा३। स्याधर्मा २ ३

५ १ २ ३ १ २ ३ ५ ४
४णा। प्राहिन्वानाः। आर्त्तंबृ२३४हात्। ऋतापुम्बृहा

४
त्। होऽ५ई। डा(३)॥ ८ *॥ [५]

५ २ ४२५ ४२ ५ १ २र
॥ द्वैगतम्॥ अभिसो३मासआयवा:। पावस्ति म।

१ २ ३ २ ६ २ १ २ १ २
दियाम्मा१दा२म्। समू३। द्यौ३द्यो३वा। द्रस्याधिवि

२ २ १ १ ३ ५२ २
षयेमानी१षिषा२:। मत्सा२३। रा२सा२३४औद्योवा।

२ १ ३१११ ५ २ ४२५४ ५
एइ। मदा२च्युता२३४५:॥(१) मत्सरा३सोमदच्युता:।

१ २२ १ २ ३ २ ६ २ १
मात्सरासः। मदाच्यू१ता२:। तरा३त्। द्यौ३द्यो३वा।

---

* ऊ० मा० ४प्र० २च० ८सा०।

१ २ २ १२ १ २
समुद्रम्यवमानाऊ१र्मिणा२। राजा२३। दा२धिवा२३

५२२ २ १ ३१११ ५२२
४औहोवा। ए३। कृता२म्बृहा२३४५त्॥(२) राजा

१ ४५४ ५ १२२ १ २
हा३यिवकृतंबृहात्। राजादेवः। कृतांबृ१हा२न्त्।

२१ ६ २ २ १ ७
अर्षा३। हौ३। हो३वा। मित्रस्यवरुणस्याधर्माणा२।

१ १ ३ ५२ २ १ १ ३
प्रहा२३यि। न्वा२ना२३४औहोवा। ए३। कृता२म्ब हा

११ ११
२३४५त्३) ॥ १० * ॥ [६]

१ २२ २ १
॥ हारायणम् ॥ अभिसोमौहो२यिमआयवाः। पा

२ २ १ २
वन्तेमद्यमदम्। समूद्रा३स्या। धिविष्टपायि। मना

२ १ १ २२ २ १ ५
३हायि। पायिणा२ः। मत्सरासोमदोवा३ओ२३४वा।

४ ५ २२ १
च्यूतोहहायि ॥(१) मत्सरासोहो२यिमदच्युताः। मा

२२ २ २
त्सरासोमदच्युतः। तरात्सा३मू। द्रपवमा। नऊ३

२ १२ २ २ १ ५ ४
हा। मायिणा२। राजादेवकृतोवा३ओ२३४वा। बृ

* ऊ० गा० ४प्र० २ख० १०सा० ।

५ १ २ २ २ १ २ २
५ष्ठोऽयायि ॥(२) राजादेवौष्ठो २ऽयंवृषात्। राजादे

२ २ १ २
वक्षतंवृषात्। अर्षामा३यित्रा। सयवरुणा। स्यधाइ

२ १ १ २ २ १ ५ ४
हा। माणा२। प्रहिन्वानक्षतोवा३ओ२३४वा। वृ५ष्टो

५
ऽयायि(३) ॥ ११ * ॥ [७]

२ २ १
॥ अक्षिद्रम्॥ अभिमोमा। सखा३१उवा२३। या

५ १ २१ १ २ १ ३ १ १ ११ २ २
२३४वाः। पवन्तेमदियम्मदा२३४५म्। पवन्तेमा। दि

५ २ १ २ २१ २ २ २
या३१उवा२३। मा२३४दाम्। समुद्रस्याधिविष्टपेमनी

१ ३ १ १ १ १ २ १ २ २
षिणा२३४५ः। समुद्रस्या। धिवि। ष्टा। पेमना३१उ

५ २ १ २ २ १ २ १ १ १ १
वा२३यि। षौ२३४णाः। मत्सरासोमद्च्युता२३४५ः।

२ २ ५ २
मत्सरासाः। मदा३१उवा२३। च्यू२३४ताः ॥(१) मत्स

२ ५ २ १ २ २
रासाः। मदा३१उवा२३। च्यू२३४ताः। मत्सरासो

२ १ ३ १ १ १ १ २ २
मदच्युता२३४५ः। मत्सरासाः। मदा३१उवा२३। च्यू

---

* ऋ० मा० ४प्र० २अ० ११सा०।

५ १ २ १ २र र १ ३ १ १ १ २
२३४ताः। तरत्समुद्रम्ववमानजमिंणा२३४५। तरत्स

१ २ १ ५
मू। द्रम्यव। मा। नज३आउवा२३। मो२३४णा।

१र र २१ २ १ २ २र र र
राजादेवक्षतंबृहा१त्। राजादेवाः। क्षता३१उवा२३।

५ २र र र१ २ १ ३ २र र र
बृ२३४हात्। राजादेवक्षतंबृहा१त्। राजादेवाः। क्ष

५
ता३१उवा२३। बृ२३४हात्। राजादेवक्षतंबृहा१त्।

१र २ १ २
राजादेवाः। क्षता३१उवा२३। बृहात्। अर्षामित्रस्य

१ २ १ ३ १ १ १ र र १ २
वरुणस्यधर्मणा२३४५। अर्षामित्रा। स्यवरु। णा। स्य

५ १ २र १ १ १ २
धा३१उवा२३। मा २ ३४णा। प्रहिन्वानक्षतंबृहा१त्।

२ र ५
प्रहिन्वानाः। क्षता३१उवा२३। बृ२३४हात्(३) ॥१२*॥[८]

२ र र १ ५ १
॥ रौरवम् ॥ अभिसोमासा३आया२३४वाः। पाव

र र र ३ २ १ २
न्तेमद्यम्मद०समुद्रस्याधिविष्टपेमना२यिषिणाः। ओद्रा

२ १ र र २ १ २ २
३उवा। मत्सरासोमदा२३द्रायि। ओद्रा३उवा। च्यु

ऊ० गा० ४प्र० २ष० १२सा०।

२ २ ४ ५ २ ३ ३ १ ५
ता। औ३ होवा ॥(१) मत्सरासोमाइदच्यू२३४ताः।

१ ३ ३ ३ २ १
माउत्सरासोमदच्युतस्त्वरत्समुद्रम्यवमानऊर्म्मिणा। ओ

२ २ १३३३ ३ २ १ २
हाइउवा। राजादेवक्रतां२३ए्हायि। ओहा३उवा।

१ ४ ५ २३३ ३ १ ५
बृहात्। औ२३होवा ॥(२) राजादेवमाइर्त्तंव२३४धा

१ ३ ३ ३ ३ ३
त्। राजादेवक्रतंबृहदर्षामित्रस्यवरुणस्यधा २र्म्मणा।

१ २ २ १ ३ २ १
ओहा३उवा। प्रहिन्वानक्रता२३ए्हायि। ओहा३उ

२ १ ४ ५ ४
वा। बृहात्। औ२३होवा। हो५ई। डा(३) ॥१३॥[८]

१ २ २३ ३ २३१२
॥ मानवोत्तरम् ॥ होवायि। अभिसोमासआयवः।

१ ३ ७१ ३ १
होवायि। पावन्तेमद्यम्मदम्। सामुद्रस्या। धायि

७ १ ७ ३ ५ २ १
विष्टया३१यि। मनार्२यिषा२३४यिणाः। मत्सारा २ ३

२ २ ३ ५३ ३ ३ ५ १
साः। मार्२दा२३४औहोवा। च्यू२३४ताः ॥(१) होवा

२ १३३ ३ २ १ २ १ ३ ३
यि। मत्सरासोमदच्युतः। होवायि। मात्सरासोम

---

* ऋ० मा० ७म० १अ० १२सा०।

१० २ १७ २ ७ ४ ३
इन्द्युतः । आरत्समु । द्राम्यवमा३१ । नजरन्ना२३४यि

५ १८ १ २ १ ४ ३ ५८ २
ष्वा । राजादा२३यिवाइः । आ२र्त्ता २ ३ ४ औहोवा ।

३ ५ १ ८ २ २१ १ २ १
व२३४ह्वात् ॥(२) होवायि । राजादेवक्रतम्बृहत् । हो

८ २ ७८ २ १ ७ १
वायि । राजादेवक्रतंबृहत् । आर्षाभित्र । स्यावरुणा

७ ४ ३ ५ १ १ २ १ ३
३१ । स्यधार्म्मा२३४णा । प्रहायिन्वा२३नाइः । आर्त्ता

५८ २ ३ ५
२३४औहोवा । बृ२३४ह्वात्(३) ॥ १४ * ॥ [१०]

१ २ १ २ ८ २ १ २
॥ आनूपबाध्यश्वम् ॥ अभीअभी । सोमासाइआया

१ २८ १ ७ १
१वाइः । पावन्तेम । दियाम्मा १ दाइम् । साम्मू२

१ १ ८ २१ २ १ ८ २
द्रास्याइ । धिविष्टपेमनीषा२३यिणाः । मत्सारा३ सा

१ ४ २ ५ १ १ १ २
३ः । मा२३दा३ । च्यू३४५तो६ह्वायि ॥(१) मत्सामत्सा ।

८ २ १ २ १ १ १ ८ २
रासोमाइदाच्यू१ताइः । तारा२त्साम्मू२ । द्रप्वमान

१८ २ १८ २ २ १ ४
ऊम्मा२३यिणा । राजादा३यिवाइः । आ २३ त्ताइम् ।

---

* ज० गा० ७प्र० २ष० १४सा० ।

२ ४ ५ १८ १ १८ २ ८ १ २
व॒३४५हो३ह्वायि ॥(२) राजाराज्ञ । देवक्ष३तांव॒३रा

१ ८ २८ १ २ १ १
२ल्। राजादेवः। क्षतांव १रा२त्। आर्षा २ मा

१ २ १ २ १ २ २
त्रा२। स्यवरुणस्यधर्मा२३णा । प्रहायिन्वा ३ ना ३म

१ ४ २ ५
आर२३र्त्ताा३म्। व॒३४५हो३ह्वायि(३) ॥ १५ ॥[११]

४ ३ ८ ४८ ५ ८ २ २ १
॥ वात्रम् ॥ अभिसोमासत्रा । ह्वाइह्वाइयि । आर२

८ ५ १ १८ १०
३४। वायवोवा। पवाह्वो२ं। तेमाह्वो२। दायव्या

१ २ ८ १ २ ३१ २
दा२म्। सामुद्रस्या। धिवायिष्टापेमनाउवा३। ऊ

५ १ १ १ १
३४पा। षिणा२ः। मात्सा२रासा२ः। मद। च्यू

३ ५८ ८ ४ ३८ ४८ ५ ८ २ १
२ता२३४औह्वोवा ॥(१) मत्सरामोमदा। ह्वाइह्वाइयि।

१ ५ १ १८
च्यू२३४। तच्युतोवा। मत्साह्वो२यि। रासाह्वो२।

१ ७ १ २ १ २ ३ १
मादच्युता२ः। तारत्समु। द्रम्यावामा। नव्याउवा३।

२ ५ १ १ १ १
ऊ३४पा। षिणा२। राजा२दायिवा२ः। क्षतम्।

---

* ऊ० मा० ७म० २ष० १५सा०।

३ ५र र ३र ४र र २ ४ ५ २ २
वृ२ङ्हा२३४ओहोवा ॥(२) राजादेवकृतम्। ङ्हाङ्हाइयि।

१ ५ १र १र २
वृ२३४। ङ्हृङ्हृहोवा। राजाङ्हो२यि। देवाङ्हो२। आ

० १ र २ १ १ ५
सौंवङ्हा२त्। आर्षाभित्र। स्वधाउवा३। ऊ३४पा।

१ १ १ १ ३
मंणा२। प्राहा२यिन्वाना२:। कृतम। वृ२ङ्हा२३४

५र र २ ५
ओहोवा। ऊ३२३४पा(३) ॥ १६ ॥ [१२]

५ ४ २ ४ ५र ४ ५ १
॥ अभीवर्त्तम् ॥ अभा३यिसो३माऽसआयवोवा। पा

१र १ २ १ ३
वन्तेम। दियाम्मा१दा३म्। सामुद्रस्या३१२३४। धि

४ ५र २ १ २ १ १ २ २
विष्टपे। मनायिषा१यिणा२:। म२पारा१सा२:। मदा

१ ३ १ १ १ १
३। च्यू२३४५। ता२३४५:(१) ॥ १६* ॥ [१३]

५ २ ४र ५ ४ ५ २ १ १र १
॥ कालेयम्†॥ मत्सरा३सोमद्च्यूता:। मत्सारासो।

२ ३ १ १ २ ३ २ १ १ ४र ५र
मद्च्यूता२३:। तरत्समू३। द्रा२३४म्। पवमानऊ।

---

* ऊ० गा० ७प्र० २ष्टा० १६सा० । † "मद्राकालेयम्"—इति वि० ।

१ २ १२ २ ८ १ ४
माऽयिणा। राजादेवौ। वा३४३वा। ऋतापुभ्बृहात्।
५
घोपुई। ङा(२)॥ १७ * ॥ [१४]

५ २ ४८ ५ ४८ ५ १ १८
॥ गौङ्गवम्॥ अभिसो३मासआयवाः। पावा२। ते
३ २ ४ ५ २ १ ८
मदिया३म्। मादाम्। समुद्रस्याधिविष्टां२३पा२ यि।
२ २ ४ ५ २ १ ८ ८ २ १. ४
मनाऽयिषायिणाः। समुद्रस्याधिविष्टये। मनाऽयिषा
५ १ २८ १ २ २ १ ५
यिणाः। मात्सरा। सा। औ३ह्वो। मदो२३४वा।
४ ५ ५ २ ४८५४ ५ १
च्यू५तोईहायि॥१) मत्सरा३सोमदच्युताः। मात्सा२।
१८ ८ ३ २ ४ ५ १ २ १ १ ३ २
रासोमदा३। च्यूताः। तरत्समुद्रम्यवा२३मा३। नऊ
४ ५ १ २ १ ८ १२ ४ ५ १
३र्मायिणा। तरत्समुद्रम्पवमा। नऊ३र्मायिणा। रा
८ २८ १ २ २ १ ५ ४ ५
जाढे। वा। औ३ह्वो। ऋतो२३४वा। बृ५ह्वोईहा
५८ ८ २ ४ ५८ ५ १ १८ २
यि॥(२) राजादा३यिवऋतंबृहात्। राजा२। देवऋ
१ ४ ५ १८ २ १ २ १ १ ३ २
ताम्। बृहात्। अर्षामित्रस्यवरू२३णा२। स्यधा३

---

* ऊ० मा० ७अ० २आ० १७मा०।

४ ५ १ ~ २ १ २ २ २ ४ ५ १ ० २८
र्माणा। अर्षाभिचक्षवरुण। स्यधाऽर्माणा। प्राक्षिन्वा।

१ २ २ १ ५ ४ ५
ना। औ३ह्वो। क्षतो२३४वा। वृ५ह्वो६हायि(३)॥१८*॥[१५]

२ २ १ २
॥ भारद्वाजम्॥ अभिसोमा। सम्राया १ वा २:।

१ २८ १ २ १ २८
पावन्ता मद्यमदम्। समूद्रा१स्या २। धायिविष्टपे। म

१ २ १ २ १ २ ५२
नायिषा१यिणा २:। मत्सारा१सा२३:। मा२दा२३४औ

८ ३ ५
ह्वोवा। च्यू२३४ताः(१)॥१५†॥[१६]

२ ८ १ २ ३ २ ४ ५
॥ मैधातिथम्॥ अभिसोमोह्वायि। सम्राऽयावाः।

१ २ २ १ २ १ २
पवन्ता २ह्वो१यि। माऽौ३ह्वो। दायाउवा। मादाउ

१ ८ २ २ १ २ १
बा। समुद्रस्याधिविष्टपाऽौ३ह्वो। मानाउवा। षा

२ १ ८ २ २ १ २८ १ २८
यिणाउवा। मत्सरासाऽौ३ह्वो। मदा। औह्वो। वा

५ ४ ५ १ ८ १ २ २
ह्वो२३४वा। च्यू५तो६ह्वायि॥(१) मत्सरासोह्वायि। म

२ ४ ५ १ २ २ १ २
दा३च्यूताः। मत्सरा २ह्वो१यि। साऽौ३ह्वो। मादा

---

* ऋ० मा० ८प्र० २ऋ० १८सा०। † ऋ० मा० ९प्र० २ऋ० १५सा०।

उक्ष। ऽ. च्यूताउवा। तरत्समुद्रम्पवमाऔहचो। ना

आउवा। मायिणाउवा। राजादेवाऔहो। क्षता।

औहो। वाहो२३४वा। ब५ह्चोहाय्यि ॥(२) राजादेवो

हायि। क्षताऽम्बहात्। राजादा२ह्चो१यि। वाऔ२

हा। आर्त्ताउवा। बृहाउवा। अर्षामित्रसवरुणा

औ३हो। स्याधाउवा। माणाउवा। प्रहिन्वानाऔ३

ह्चो। क्षता। औह्चो। वाह्चो२३४वा। ब५ह्चोहा

यि(३) ॥ ६ ॥ [१७]

॥ उत्सेधम् ॥ अभिमामासआयवः। पव। तेमा

३४औह्चोवा। दियम्मदा२म्। ह्चा३१उवा२३। ऊ३४

पा। समू३द्रस्या। औह्चोवाह्चायि। धायिविष्टपायि।

भनीषायिणाः। ह्चा३१उवा२३। ऊ३४पा। मत्सा३रा

---

* ऊ॰ मा॰ ९प्र॰ ३च॰ ६सा॰। † "उत्सेध"—इति च॰ पु॰।

५ ४ ३ १ ४ ५ ३
* सः। औद्दोवायि। मदाऽच्यूऽताऽऽऽ

२ २ २ २ २ १ २१ १ २ १ ऽ २
ए। औहोओहोइवा। पवन्तेमद्दियम्मदम्। ओइहा।

१ २ २१२१२ १ २ ऽ २ १ २ ०
समुद्रस्याधिविष्टपेमनीषिणः। ओइहा। मत्सारा१सा

ऽ २ ऽ २ ० ऽ २ ऽ २
२:। ओइहा। ओइहाइए। औइहोयि। औइहो

२ १ ३ ५२ २ २ २ ४
इवा। मद। च्यू२ता२३४औहोवा॥(१) मत्सरासी.

२ २ २ २ २ २ २ २ १२
मद्च्युतओहाओहा३ए। औहोओहोइवा। मत्मरा

२ १ १ १ ऽ २ १ २ १ १२ १२ १२
सोमद्च्युतः। ओइहा। तरत्समुद्रम्यवमानऊर्म्मिणा।

ऽ २ १२ २ ऽ २ ऽ २ २
ओइहा। राजादा१यिवा२:। ओइहा। ओइहाइए।

ऽ २ ऽ २ २ १ ३ ऽ
औइहोयि। औइहोइवा। कृतम्। बृ२हा२३४औ

२ १२ २ १२ २ २ २ २ ६ ६
होवा॥(२) राजादेवकृतंबृहदोहाओहा३ए। औहो

२ २ १२ २ १२ १ २ १ १ १ ऽ २ १ २
औहोइवा। राजादेवकृतंबृहत्। ओइहा। अर्षा।

२ १ २ १ २ १ १२ ऽ २ १ २
मित्रस्यवरुणस्यधर्म्मणा। ओइहा। प्रहायिन्वा१ना२:।

ऽ १ ऽ २ २ ऽ २ ऽ २ २
ओइहा। ओइहाइए। औइहोयि। औइहो२वा।

१ ३ ५र र २ र १ २ १ २
ऋतम् । बृ २ हा २ ३ ४ ओहोवा । सदोविद्या २ ३

१ १
४ ५:(३) ॥ १६ * ॥ [१८]

५ २ ५र ५ ४र ५ २ १
॥ जनित्राद्यम् ॥ अभिमो३मासत्रायवाः । ऊवेहो

१ र २ १ र
२यि । पवन्तेमदियाम्मा१दा२म् । ममुद्रस्याधिविष्टपा

३ २ ३ ५ १ २ १ र २
२यि । मनार२यिषा२३४यिणाः । मत्मा३होयि । रामा

१ २ १ ३ ५र र ५ २ ४र
३हो । मद । च्यू२ता२३४ओहोवा ॥(१) मत्सरा३सो

५ ४ ५ २ १ १ र र २
मद्च्युताः । ऊवेहो२यि । मत्सरासोमदाच्यू१ता२: ।

१ ३ २ ३ ५ १र २ १
तरत्समुद्रम्पवमा२ । नऊर्म्मा२३४यिणा । राजा३होयि ।

र २ १ २ १ ३ ५र र ५र र
देवा३हो । ऋतम् । बृ२हा२३४ओहोवा ॥ २) राजा

२ ५ ५ ४ ५ २ १ १र र र १
दा३यिवऋतंबृहात् । ऊवेहो२यि । राजादेवऋतंबृ

१ र ३ २ ३ ५ १
हा२त् । अर्षामित्रस्यवरुणा२ । स्यधार्म्मा२३४णा । प्र

---

* ऋ० गा० १२प्र० २अ० १६सा० ।

ह्वाऽयिह्वोयि । म्वानाऽहो । कृतम् । व२ऽहा२३४ओ
होवा । जनित्रा२३४५म्(३) ॥ ९ * ॥ [२०]

॥ दैर्घश्रवसम् ॥ अभिसोमास आयवऽओहा । ओऽम३
ए । पवन्तेमदिय्यमदम् । ओऽहा । ओंऽहाऽए३४ ।
सम्ऽ३४द्रप्या । धायिविष्ट । पेमानीषिणाः । ओऽहा ।
ओऽहाऽए३४ । मत्साऽ४रासाऽः । मदो २ ३ ४ वा ।
च्यूऽतोऽहायि ॥(१) मत्सरासोमदच्यु,तओहाओहाऽए ।
मत्सरासोमदच्यूतः । ओऽहा । ओऽहाऽए३४ । तरा
३४सम्ऽ । द्राम्यव । मानाऊर्म्मिणा । ओऽहा । ओ
ऽहाऽए३४ । राजाजाऽ४देवाऽः । कृतो२३४वा । बृ
ऽहोऽहायि ॥(२) राजादेवकृतंबृहदोहाओहाऽए । रा
जादेवकृतंबृहात् । ओऽहा । ओऽहाऽए३४ । अर्षा

* ऋ० मा० १४प्र० १ऋ० ९सा० ।

२ १ २ १ २ ३ ४ ५
२४मिन्वा। स्यावरु। णस्याधर्म्मणा। ओइवा। ओ
२ २ ३ १ ३२ २ २ १ ५ ४
३ह्वा३ए३४। प्रह्वा३४यिन्वाना३:। क्रतो२३४वा। बृ
५
५ह्वा६ह्वायि(३) ॥ ५ * ॥ [२१]

१ २ १ २ २
॥ सन्तनि ॥ अभौह्वाउ। सोमामआ३१उवा २ ३।
५ १ २२१ १ १ २ २१२२
या२३४वाः। पवन्तेमदियम्मदंत्समुद्रस्याधिविष्टपेमनी
१ ३ १११ १ २ १ २ २
षिणा२३४५:। मत्साह्वाउ। रासोमदा३१उवा २ ३।
५ १ २२ २ १ २ २ १२ २ १ २
च्यू२३४ताः ॥(१) मत्सरासोमदच्यूतोमत्सरासोमदच्युत
१ २ १ २२ २ १ ३ १११ १२ २ १
स्तरत्समुद्रम्पवमानऊर्म्मिणा२३४५। राजाह्वाउ। दा
१ ५ १२ २ १२ १ १
यिवक्षता३१उवा२३। बृ२३४ह्वात् ॥(२) राजादेवक्षतं
१ १ २ २ २२१ २ १ २ १ १ २ १ १ १ १
बृहद्राजादेवक्षतंबृहदर्षामित्रस्यवरुणस्यधर्म्मणा२३४५।
१ २ १ २ २ ५
प्रह्वायिह्वाउ। न्वानक्षता३१उवा२३। बृ२३४ह्वात्(३) ॥

॥ ७ † ॥ [२२]

---

* ज० गा० १४प्र० २अ० ७खा०'। † ज० गा० १४प्र० २अ० ७खा०।

॥ आष्टादशोत्तरम् ॥ अभिसोमास आयवेऽयादौ ।

ओ३वा । पवन्ते मदियम् । मादा२३म् । ऐया२३त् ।

औ२३होवा । समुद्रस्याधिविष्टपेमनो । षायिणा२३: । ऐया

२३त् । औ२३होवा । मत्सरासोमद । च्यूता २ ३:॰ ।

ऐया२३त् । औ२३होवा३४३ । ओ२३४५ई । डा ३) ॥

॥ २ * ॥ [२२]

॥ आभीशवोत्तरम् ॥ अभिसोमास आयवए । ए । पव

न्ते माऽदायम्मादम् । सा२३५म् । हा३हा । द्रस्याधि

विष्टपेमानी१षिणाः । मा२३४त्सा । हा३हायि । रासो

मदो२३४वा । च्यू५तो६हायि ॥(१) मत्सरासोमदच्युत

ए । ए । मत्सरासोऽमादच्यूतः । ता२३४रात् । हाऽ

यि । समुद्रम्यवमानाऊ१र्म्मिणा । रा२३४जा । हा

* ऊ० गा० १६प्र० २अ० २मा० ।

२ १ २१ ५ ४ ५
३ हायि। दायिवक्षतोरइ४वा। बृ५हो ६ हायि ॥(२)

२२२ २ २ २ १ २
राजादेवक्षतंबृहदे। ए। राजादेवाइआत्तंबृहात्।

३ ५ २ २ १ ० २
आरइ३४र्षा। हा ३ हायि। मित्रस्यवरुणस्याधर्म्माणा।

२ ५ २ २ १ २१ ५ ४
प्रारइ३४हायि। हाइहायि। न्वानक्षतोरइ३४वा। बृ५

५
हो६हायि(३) ॥ ३ ॥ [२३]

५ २ ४२ ५२४५ १
॥ आष्कारनिधनम्† ॥ अभिसोइमासऽआयवाः। पा।

२२ १ २ १२१ ०
वन्तेम। दियारइम्मदाउ। वाइर। समुद्रस्या। धि

३२१ २१२ ५ १ २ १५२ २
विष्टपायि। मनोषारइ४यिणाः। मारइत्मा। रासोम।

१ ५ २ ४२ ५४ ५ १ २२
द्रच्यूरइ४५ताई५६ः ॥(१)मत्सराइसोमऽद्रच्युताः। मात्सरा

१ २ १२१ २ १२
सः। मदारइच्युताउ। वारइ। तरत्समू। द्रम्यव

१ २१२ ५ १ २ १२ २ १
मा। नजम्मारइ४यिणा। राइजा। देवक्ष। तंबृ

५२ २ २ ४ ५४ ५ १ २
रइ४५हाई५६त् ॥(२) राजादाइयिवक्षऽतंबृहात्। राजा

• ऋ० गा० १६म० १अ० ३सा०। † "आष्कारनिधन कार्यम्"—इति ब० पु०।

२२ १ २ १२ २ १ २ २
हे वः। अहा२३वृहाउ। वा३२। अर्वामिचा। ह्व
२ १ २ १ ५ १ २ १२ २ १
त्वा। ह्यधर्मा२३४णा। प्रा२३हायि। ल्वानक्ष। तं
२ १ १ १ १
वृ२३४५हाई५६त्। आ२३४५ष्(३) ॥ २* ॥ [२४]
२ २ २ ५
॥ मानवाद्यम् ॥ अभिसोमा। सत्रायाः२३४वाः। २।
१ २५ १ २ १ २ २
पावन्तेम। दियाममा१दा२म्। सम्। ऊ। द्रक्षाः
१ ७ २ १ ३ ५ १२ २ १
धायिविष्टपा३यि। मनाःयिषा२३४यिणाः। मत्सरासा
१ २ ५२ २ २ ५ २
२३ः। मा२दा२३४औहोवा। च्यू२३४ ताः ॥(१) मत्स
२ ३ ५ २ ३ ५ १ २२
रासाः। मदच्यू२३४ताः। मदाच्यू२३४ताः। मात्सरा
१ ३ १ २ १ ७ २
सः। मदाच्य१ताः। त। रत्। समु। द्राव्यवमा
२ ३ ५ १२ २२ २ १ १ २
३। नऊ२म्मा२३४यिणा। राजादेवा२३ः। आर्षा
५२ २ ७ ५ २ २ २
२३४औहोवा। वृ२३४हात् ॥(२) राजादेवाः। क्षतं
२ ५ २ ३ ५ १ २ २२ १ २
वृ२३४हात्। क्षतांवृ२३४हात्। राजादेवः। क्षतांव

● ज० गा० १८प्र० २अ० २खा०।

१ २ १ १ २ १
१ह्वा२त्। अ। घा। मित्र। स्व। वरुणा३। स्वधा

२ ३ १ २ ३ १ १ ३ ५३ ३
२म्मा२३४णा। प्रहिन्वाना२३:। आ२र्त्ता२३४ओहोवा।

३ ५
वृ२३४ह्वात्(३) ॥ १० * ॥ [२५]

१ २३ १ २३ १ १ २
॥ महावैष्टम्भम् ॥ अभिसोमोह्वायि। सम्रायवोवा।

१ २३ १ २ १ २ २
पावस्तेम। दियाम्मा१दा२३म्। ह्वोवा३ह्वायि समु

१ ३ २१३ २ १ १ १ २ २
द्रस्याधिविष्टपे। मनायिषा १ यिणा२३:। ह्वोवा३ह्वा

१ २ १ २ २ १
यि। मत्सारा१सा२३: †। ह्वोवा३ह्वायि। मद्। च्यू२

३ ५३ ३ १ २३ १ २ १ २
ता२३४ओहोवा ॥ १) मत्सरासोह्वायि। मद्च्युतोवा।

१ २३ १ २ १ १ २ १
मात्सरासः। मदाच्यू १ ता२३:। ह्वोवा३ह्वायि। तर

२ १ २३ १ २ १ २ १
त्समुद्रम्यवमा। नऊर्म्मा१यिणा २ ३। ह्वोवा ३ ह्वायि।

१३ २ १ २ १ १ ३
राजादा१यिवा२३:। ह्वोवा३ह्वायि। कृतम्। बृ२ह्वा२

५३ ३ १३ ३ २३ १ २ १ २ १
३४ओहोवा ॥(२) राजादेवोह्वायि। कृतंबृहोवा। रा

---

* ऋ० गा० १८प्र० २भ० १०सा०। † "मत्सारासा१२"—इति ख० पु० पाठः।

२ १२ १ १ १ १ १ १ १ १ १
जादेवः। ऋतांबृ१हा२३त्। होवा३हायि। वर्धामि
१ १ १ १ १ १ १ १ १ १
मखवद्भ्य। स्वधार्मा१णा२३। होवा३हायि। प्रद्वा
१ १ १ २ १ २
यिन्वा१ना२३। होवा३हायि। ऋतम्। वृ२हा२३४
५ २
औहोवा(३) ॥ १० * ॥ [२९] ९

अथ द्वितीयऽर्चे—प्रथमा।

३ १ २ २ १ २
तिस्रोवाचईरयतिप्रवक्ति
३ १ २ ३ १ २ २ २
र्ऋतस्यधीतिम्ब्रह्मणोमनीषाम्।
१ २ २ १ १ ३ १ २ १
गावोयन्तिगोपतिम्पृच्छमानाः
१ २ २ १ १ ३ २
सोमंयन्तिमतयोवावशानाः ॥ १† ॥

"वक्तिः" वोढा यजमानः "तिस्रोवाचः" ऋग्यजुःसामाभिकाः स्तुतीः प्रेरयति। तथा "ऋतस्य" यज्ञस्य "धीतिं" धारयित्रीं "ब्रह्मणः" परिवृढस्य सोमस्य "मनीषां" मनसईषयित्रीं कल्याणीं वाचं प्रेरयति। किञ्च "गोपतिं" वृषभं यथा गावोऽभिगच्छन्ति तद्वत् गवां स्वामिनं सोमं "गावः"

* ज० मा० १२प्र० २ख० १०सा०।

† ह० मा० ६, १, ४, १ (२भा० ११९पृ०) = ऋ० वे० ७, ४, १७, ४।

"पृच्छमानाः" पृच्छ्यः सत्यः यन्ति स्व-पयसा मिंश्रयितुम् अभिगच्छन्ति। तथा "वावशानाः" कामयमानाः "मतयः" स्तोतारश्च "सोमं" "यन्ति" स्तोतुमभिगच्छन्ति ॥ १ ॥

अथ द्वितीया।

१ २ १ २ ३ १ २ ३ २उ
सोमङ्गावोधेनवोवावशानाः

२ १ २ ३ १ २ ३ १ २
सोमंविप्रामतिभिः पृच्छमानाः ।

१ २ ३ १ १ ३ १ २ ३
सोमःसुतऋच्यतेपूयमानः

१ २ ३ २ ३ २ १ १ २
सोमेअर्कास्त्रिष्टुभःसन्नवन्ते ॥ २* ॥

"धेनवः" † प्रीणयित्र्यो "गावः" "सोमं" "वावशानाः" कामयमाना भवन्ति, "विप्राः" मेधाविनः स्तोतारः ‡ "सोमं" "मतिभिः" स्तुतिभिः ¶ "पृच्छमानाः" पृच्छन्तो भवन्ति "सुतः" अभिषुतः "सोमः" "पूयमानः" ऋत्विग्भिः "ऋच्यते"

---

* ऋ० वे० ७, ४, १७, ५।

† 'आदित्यरश्मयो धेनवः'—इति वि०।

‡ 'विप्राः—ब्राह्मणा . . . अथवा विप्रा आदित्यरश्मयः'—इति वि०।

¶ 'मतिभिः—प्रज्ञाभिः'—इति वि०।

चरति *। तथा "त्रिष्टुभः" त्रिष्टुब्रूपाः † "धर्काः" अस्माभि. क्रियमाणा एते मन्त्राः "सोमे" "सचवन्ते" सङ्गच्छन्ते ॥

"सोससुतश्चटचतेपूयमान."—इति छन्दोगाः, "सोमःसुतः पूयतेअद्यमानः"—इति बह्वृचाः ॥ २ ॥

अथ तृतीया ।

३ १ २ ३ १ २ ३
एवानःसोमपरिषिच्यमान

१ २ ३१९ ३ २
आपवस्वपूयमानःस्वस्ति ।

२ ३ १ १ ३ १८ २८
इन्द्रमाविशन्नृक्षतामदे न

३ २ ३ १ १ ३ ९ ३ १ २
वर्द्धयावाचञ्जनयापुरन्धिम् ॥ २४ ॥ १०

से "सोम !" "परिषिच्यमानः" परितः पात्रेषु सिच्यमानः पूयमानः त्वं "नः एवा" अस्माकमेव "स्वस्ति" ¶ अविनाशम् आ पवस्व प्रापय । किञ्च "ऋक्षता" महता "मदेन" मदकर-रसेन अहम् "इन्द्रम्" "आविश" प्रविश । तथा "वर्द्धया" "वाचं" स्तुति-लक्षणां § प्रसिद्धां कुरु । किञ्च

---

* 'चरते—चर् गतौ । गच्छति'—इति वि० ।

† 'त्रिष्टुप्छन्दस्काः अथवा त्रिष्टुभः त्रयी विद्यां लोभयन्ति'—इति वि० ।

‡ ऋ० वे० ७, ४, १८, १ । "रवेण"—इति च तत्र पाठः ।

¶ 'स्वस्ति—क्षेम कुरु'—इति वि० ।

§ 'वाचम्—ऋग्यजुःसामलक्षणम्'—इति वि० ।

"पुरम्धिं" बहुधियं प्रज्ञानं * "जनया" † अस्मभ्यमुत्पादय। वाक्यभेदादनिघातः ‡ ॥ ३ ॥ १०

॥ सङ्क्रोशम् ॥ हो॒यि। हो। हा३॒हो॒यि। तिस्रो
वा॒चाः। ई३॒रय। तिप्रवक्षी॒:। ऋ॒तस्यधायि। तौ३
म्न॒क्ष। सोमनीषाम्। गावोयन्तायि। गो३ पतिम्।
पृ॒च्छमानाः। सोमंयन्तायि। मतयः। वा३४३। वा
३४३। वा३ग्रा५ना६५६॒: ॥(२) सोमङ्गावो। धे३नवः।
वावशानाः। सोमंविप्राः। मतिभिः। पृ॒च्छमानाः।
सोमःसुताः। ऋ॒च्यते। पूयमानाः। सोमेअर्काः।
त्रिष्टुभः। सा३४३म्। ना३वा५ऽपूता६५६यि ॥(२) एवा

---

* 'पुरम्धिं'—पुष्टिम्'—इति वि०।

† 'ऋ॒ मन्ने एवेत्यादौ बहुत्र छान्दसं दीर्घत्वम्। तथाच—"एवा"—इत्यत्र "निपातस्य च (६, ३, १३६)"—इति दीर्घः, "वर्द्धया"—"जनया"—इत्यनयोस्तु "ह्रस्वोऽनङ्णिङः (६, ३, १३५)"—इत्यत्र "णिङः"—इति, योगविभागाद्दीर्घः।

‡ "तिङतिङः (८, १, २८)"—इति प्राप्तो निघातः "छन्दस्यनेकमपि साकाङ्क्षम् (८, १, २५)"—इति तदभावश्चार्थः।

२ १ १ २ ३ ४ ५ २१ १ २ १
नःसो। माऽपरि। षिच्यमानाः। आपवस्वा। पूऽय

२ २ ३ ४ ५ २ १ २ २ १ २ ३ ४ ५
मा। नःसुवस्ती। इन्द्रमावाय। शाऽबृ ह। तामदेना।

१ २ १ १२ २ १
होयि। हो। हाऽहोयि। वर्द्धयावा। चाऽच्छन।

२ २ ४
याऽ४३। पूऽराऽधाऽ६ऽ६यिम(३) ॥ १७ * ॥ [१] १०

इति सामवेदार्थप्रकाशे उत्तरार्चस्य चतुर्थस्याध्यायस्य
तृतीयः खण्डः † ॥ ३ ॥

अथ चतुर्थखण्डे, ‡ प्रगाथरूपे—
प्रथमसूक्ते—प्रथमा।

१ २२ २ २२ २ १ २२ २ १
यद्यावइन्द्रतेशतꣳशतम्भूमीरुतस्युः।

१ २ २ ३ २ ३ २ ३ १ २ १ १ २
नत्वावञ्जिन्त्सहस्रꣳसूर्य्यानुनजातमष्टरोदसी ॥ १ § ॥

---

* उ० मा० १प्र० १अ० १७सा०। † 'उक्तो माध्यन्दिन'—इति वि०।

‡ 'इदानीं पृष्ठान्युच्यन्ते। रथन्तर बृहत्, विरूप वैराज, शाक्वर, रैवतश्चेति पृष्ठ षडह, तस्य पृष्ठानि सधर्माकानि भवन्ति—इति वि०। 'रथघोषं, दुन्दुभ्याख्यानम्, उपवाजनम्, उरोऽग्निमन्थनम्, आर्याघोष, गवां घोषः इति पृष्ठधर्मा अभ्यासङ्गं पृष्ठ षडहे अहन्यहनि गौरीवित यावत्'—इति च वि०।

¶ ऋ० आ० १, २, ४, ६ (१ मा० ५०२५०, =ऋ० वे० ६, ५, ८, ४।

हे "इन्द्र!" "ते" तव प्रतिमानार्थं "यद्" यदि "द्यावः" द्युलोकाः "शतं" शत-सङ्ख्याकाः "स्युः" तथापि नाप्नुवन्ति। "उत" अपिच "भूमीः" भूम्यः "ते" तव मूर्त्ति-प्रतिबिम्बाय "शतं" स्युः तथापि "न" आप्नुवन्ति। हे "वज्रिन्" "त्वा" त्वाम् "सहस्रं" "सूर्याः" अगणिता अपि सूर्याः "न" "अनु" भवन्ति न प्रकाशयन्तीत्यर्थः। "न तत्र सूर्यो भाति (इ०उप०)" —इति श्रुतेः। किं बहुना जातं पूर्वमुत्पन्नं किञ्चित् त्वामनु "नाष्ट" नाप्नुते तथा "रोदसी" द्यावापृथिव्यौ नाप्नुवाते सर्वेभ्योऽतिरिच्यसे इत्यर्थः। "ज्यायान् पृथिव्या ज्यायानन्तरिक्षाद् दिवो ज्यायानेभ्यो लोकेभ्यः"—इति (इ० उप०) श्रुतेः ॥ १ ॥

अथ द्वितीया।

१ १ २ १ २ र २ १ २ ३ १ २

आपप्राथमहिनावृष्ण्यावृषन्विश्वाशविष्ठशवसा।

३ १ २ २ १ २ ३ १ २र ३ १ २ ३ १ २

अस्माꣳअवमघवन्गोमतिव्रजेवज्रिञ्चित्राभिरूतिभिः॥२*॥११

हे "वृषन्" अभिमतवर्षकेन्द्र! त्वम् "आ पप्राथ" आ पूरयसि व्याप्नोषि। कानि? "विश्वा" सर्व्वाणि "वृष्ण्या" वर्षकाणि बलानि शत्रु-सम्बन्धीनि। केन साधनेन? "महिना" महता "शवसा" बलेन स्वीयेन अथवा वृष्णोऽत्येतच्छवो विशेषणम्। तथा सति अभिमतवर्षकेण महता बलेन अस्मदीयानि बलानि पूरयसीत्यर्थः। अथ तथाज्ञात्वा हे "अविष्ठ" बल-

---

* ऋ० वे० ६, ५, ८, १।

वस्तम ! "गोमति" बहुभिः गोभिर्युक्ते "व्रजे" शत्रु-सम्बन्धि-निमित्ते सति "मक्षान्" "अव" रक्ष । हे "मघवन्" धनवन् ! "वज्रिन्" वज्रयुक्तेन्द्र ! कैः साधनैः ? "चित्राभिः" नानाविधैः "ऊतिभिः" रक्षणैरिति ॥ २ ॥

॥ महावैष्टम्भम् ॥ यद्यावओहायि। ष्टुतश्चतोवा।

१ २ २ १ २ २ १ २
शातम्भूमीः। उतासी१यू२३ः। होवा३हायि। नत्वा

२ १ २ १ २ २ १ २ १ २ १
वज्रिन्सहस्रम्। रियाआ१नू२३। होवा३हायि। न

२ १ २ २ १ ४ ५ २
जाता१मा२३। होवा३हा। ष्टरो। दा२सी२३४ओहो

१ २ २ १ २ २ १ २ २
वा ॥(१) नजातमोहा। ष्टरोदसोवा। नाजातम।

१ २ १ २ २ १ २ २
ष्टरोदा१सा२३यि। होवा३हायि। आपप्राथमहिनाः।

१ २ १ २ २ १ २
ष्णियावा१र्षा२३न्। होवा३हायि। विश्वाशा१वा२३।

१ २ २ १ ३ ५ २ २ १ २
होवा३हा। ष्टश। वा२सा२३४ओहोवा ॥(२) विश्वा

२ १ २ १ २ १ २ २ १ २
शवोह्यायि। ष्टशसोवा। वायिश्वाशवि। ष्टशावा१सा

१ २ २ १२ २ २ १
२३। होवा ३ हायि। अस्माꣳअवमघवन्गो। मतायि

२ १ १ २ १ २
ब्रा१जा२३यि। होवा३हायि। वज्रायिञ्चा१यिचा २ ३।

१ १ २ १२ ३ ५ २ २
होवा ३ हायि। भिहि। ता २ यिभा २ ३ ४ औहोवा॥

॥ १८ * ॥ [१] ११

अथ द्वितीयऋचे†—प्रथमा।

३ १ २ ३ १ २ ३ २ ३ २ ३ १ ०
वयङ्त्वात्सुतावन्त आपोनवृक्तबर्हिषः।

२ १ २ २ १ १ २ १ २ ३ १ १
पवित्रस्यप्रस्रवणेषुवृत्रहन्परिस्तोतारआसते॥ १ ‡॥

हे "वृत्रहन्" इन्द्र! "त्वा" त्वाम् "वयं घ" वयं खलु "सुतवन्तः" "आपः न" आप इव प्रवणमभिगच्छामः। "पवित्रस्य" सोमानां प्रस्रवणेषु "वृक्तबर्हिषः" तीर्णबर्हिषः स्तोतारश्च त्वां पर्युपासते॥ १॥

---

* ऋ० गा० २२प्र० १अ० १९सा०।

† 'वामदेव्यं मैत्रावरुणं साम, वैरूपं ब्राह्मणाच्छंसि, रौरवमच्छावाक साम'—इति त्रि०।

‡ ऋ० आ० ३, २, २, ९ (१ भा० ५४० ५०) = ऋ० वे० ६, ३, ७, १।

अथ द्वितीया ।

१ १ २ २उ २ १ १ २ २ २ १ १
स्वरन्तित्वासुतेनरोवसोनिरेकउक्थिनः ।

२·१ २ १ २ ३ २उ २ १ २ ३ १ १ २ २ ३ १ २
कदासुतन्तृषाणओकआगमदिन्द्रस्वर्दीववृसगः ॥ २* ॥

हे "वसो" वासयितरिन्द्र । † "त्वा" त्वां "सुते" अभिषुते सोमे "निरेके" निर्गमे ‡ "उक्थिनः" ¶ "नरः" नेतारः "स्वरन्ति" शब्दायन्ते §। अपिचेन्द्रः "सुतं" सोमं प्रति "तृषाणः" तृषन् "स्वर्दीव" स्वभूत-शब्दो इव ‖ "वसगः" वननीय-गमनो** वृषभः शब्दं कुर्वन् "कदा" "ओकः" स्थानम् "आगमत्" आगच्छेत् ॥ २ ॥

● ऋ० वे० ६, ३, ७, २ । "गमदिन्द्र"—इति मु० पाठः सायण-सम्मतश्च ।

† 'वसो निरेके—हे वसो ! प्रशस्तधन !'—इति वि० ।

‡ 'निरेके—दानवति यज्ञे । अथवा वसोनिरेक इत्येकं पदम्, तथा सति षष्ठी श्रियते—वसुनः वस्यश्च निरेके'—इति वि० ।

¶ 'उक्थिनः—उक्थानि सामानि, तेनद्धन्त'—इति वि० ।

§ 'स्वरन्ति सामभिः'—इति वि० ।

‖ 'स्वर्दी इन्द्र । शोभनशब्द करोति, पर्जन्यीभूत्वा वृष्टिद्वारेण'—इति वि० ।

** 'वृसगः—अन्तरीक्षगः'—इति वि० ।

अथ तृतीया।

१ २ ३ २ ३ २र २म ३ १ १
कण्वेभिर्धृष्णवाधृषद्वाजन्दर्षि सहस्रिणम्।

३ १ ० ३ १र २र
पिशङ्गरूपम्मघवन्विचर्षणेमच्छ्गोमन्तमीमहे ॥ ३ * ॥ १२

हे "धृष्णो" धर्षकेन्द्र। † "कण्वेभिः" कण्वान् मेधाविनः स्तोतॄन् अनुशिष्य [विभक्ति-व्यत्ययः (३, १, ८५)] "सहस्रिणं सहस्र-सङ्ख्याकं "वाजम्" "आदर्षि" प्रयच्छसि। हे "मघवन्" धनवन्! "विचर्षणे" विद्रष्टरिन्द्र! ‡ "धृषत्" धृष्टं "पिशङ्ग-रूपं" ¶ "गोमन्तम्" वाजं § "मच्छ" शीघ्रम् ‖ "ईमहे" याचामहे, त्वामिति शेषः ॥ ३ ॥ १२

३ १ २ १ ३ र १ १
॥ महावैष्टभ्मम् ॥ वयङ्त्वोद्दायि। सुतावन्तोवा।

१ र १ १ २ १ २ २ १
आपोनवृ। क्तबार्हा१यिषा२३:। द्दोवा३द्दायि। पवि

---

* ऋ० वे० ६, २, ७, २।

† 'धृष्णो—धारणशील।'—इति वि०।

‡ 'विचर्षणे—विविधाश्चर्षणयः पुरुषाः यस्य स विचर्षणिः, अथवा विश्वस्य द्रष्टा'—इति वि०।

¶ 'पिशङ्गरूपं—सुवर्णवर्णम्'—इति वि०।

§ 'गोमन्त'—गोक्षीरयुक्तम्'—इति वि०।

‖ 'मघु—मघवनीयम्'—इति वि०। "निपातस्य च (६, ३, १३६)"—इति दीर्घः।

२ १ २र १ २ १ २ ० १
चस्यप्रस्तवणे। पुवार्त्रा१हा२३न्। ह्वोवा३ह्वायि। परा

२ १ २ २ १र २ ५र
यिस्तो१ता२३। ह्वोवा३ह्वा। रआ। सा२ता२३४औ

२ १ २१ २र १ १ १ २ र
ह्वोवा॥(१) स्वरन्तित्वोह्वायि। सुतेनरोवा। वासो.नि

२ १ ० १ २ ० १र २ १
रे। कऊक्थ्या१यिना२३:। ह्वोवा३ह्वायि। कदाचन

२र १ र २ १ २ १ २ १
न्तृषाणओ। कआगा१मा२३:। ह्वोवा३ह्वायि। इन्द्र।

० १ २ २ १ ३ ५र
स्वा१ब्दी२३। ह्वोवा३ह्वा। वव। सा२गा२३४। औ

२ १र ० १ २ र ० २ १ २
ह्वोवा॥(२) कण्वेभिर्ह्वीह्वा। षण्वाध्रुषोवा। वाजन्द

१ २ १ १ ० १
र्षि। सहस्त्रा१यिणा२३म्। ह्वोवा३ह्वायि। पिशङ्ग

२र १ २ १ १ २ १
रूपम्मघवन्। विचार्षा१णा२३यि। ह्वोवा३ह्वायि। मत्तू

२ १ २ १ १र ३ ५र र
गो१मा२३। ह्वोवा३ह्वा। तमी। मा२ह्वा२३४औहो

३ ५
वा। दी२३४प्राः(३)॥ १८ * ॥ [१]

५र १ ० १ २
॥ अभिनिधनङ्काण्वम्॥ औहोह्वोहायि। आयिह्वो।

---

* ऊ० गा० २प० १ब० १८सा०।

१ २ ३ ५ २ ३ ५ २ ३
वायाम्। घा२३४त्वा। सूतावा२३४न्ताः। आपोमा२

५ २१ १ २१ १ ३ ५ २
३४वृ। क्तावर्हिषाः। ऐहोयि। आ२३४यिह्वी। पा

२ ५ २ ३ ५ २१ २१
विआ२३४स्या। प्रास्तावा२३४णे। षूवृचहान्। ऐहोंयि।

३ ५ २ ३ ५ ३ २ ४
आ२३४यिह्वी। पारिस्तो२३४ता। रआ३सा५ता ६ ५ ६

२१ १ २ १ २ १ २ २
यि॥(१) औहोहोहायि। आयिह्वी। स्वारा। ता२

५ २ ३ ६ २ ३ ५ २१
३४यित्वा। मूतेना२३४राः। वासोना२३४यिरे। का

१ २१ १ ० ५ २ ३
उक्थिनाः। ऐहोयि। आ२३४यिह्वी। कादाम्२३४

५ २ ३ ५ २१ १२ २१ १
ताम्। तार्षाणा२३४ओ। काआगमाः। ऐहोयि।

३ ५ २ ३ ५ ३ २ ४
आ२३४यिह्वी। आयिन्द्रास्वा२३४ब्दी। ववा३ए्सा५गा

२१ १ २ १ २ १ २ ३
६५६ः॥(२) औहोहायि। आयिह्वी। काण्वे। भा२

५ २ ३ ५ २ ३ ५ २१
३४यिर्ङ्गा। ष्णावाधा२३४र्षात्। वाजन्दा२३४षी। सा

१ २ २१ १ ३ ५ २ ३
ह्स्रिणाम्। ऐहोयि। आ२३४यिह्वी। पायिभ्रङ्गा२३

५ २ २ ५ २१ १ २१ १ २
४ह। पम्माघा२३४वान्। वीचर्षणायि। ऐहोयि। आ

५ २ ३ ५ ३२ ४
२३४यिहो। माच्छ्गो२३४मा। तमाइयिमापृच्छा ६ ५ ६

२ ५
वि। आ२३४भौ(३) ॥ ८ * ॥ [२]

५ ५ २ ४ ५२ ५ ५ १२
॥ अभीवर्त्तम्† ॥ वयाइङ्गाइत्वासुतावन्तोवा। आपो

२ १ २ १ २ २ ४
नवृ। क्तबार्हीरियषा२:। पाविश्रस्याइ१२३ ४। प्रस्रव

५२ २१ २ १ २ ३ १
णे। षुवार्त्रीरिन्द्रा२न्। परायिस्तो १ ता २। रम्रा ३।

१ २ १ १ १ १ ५ ४ २ ४ ५२ ५ ५
सा२३४५। ता२३४यि ॥(१) स्वराइन्ताइयित्वासुतेनरोवा।

१२ २२ १ २ १ २ २
वासोनिरे। कऊक्थारियना२:। कादासुताइ१२३४म्।

३ २ ४ ५२ २ १ २ १ २ २ १
त्रिषाणओ। कआगारिमा२:। इन्द्रास्वा१ब्दी२। ववा

१ ३ १ १ १ ५ ५ २ ४ ५२
३। सा२३४५। गा२३४५: ॥(२) कण्वेइभाइयिधृष्णवा

४ ५ १ २ १ १
धृषोवा। वाजन्दधि। सच्चास्वा१यिणा२म्। पायिश्रङ्ग

२ ३ ४ ५ २ १ २ १ २
रु३१२३४। पम्मघवन्। विचार्षा१णा२यि। मच्छ्गो१

---

* ऊ० गा० ४प्र० १ख० ८सा०। † "अभौवर्त्त:"—इति ख० पु०।

२ १ २ १ २ १ १ १ १
मार्। तमाइयि । मा२३४५ । ह्वा२३४५यि(३) ॥ ६* ॥ [३]

१२

अथ प्रगाथरूपे तृतीयसूक्ते †—प्रथमा ।

२ २ ३ १ १ ३ २ ३ १ १ २ २
तरणिरित्सिषासतिवाजम्पुरन्ध्यायुजा ।

१ २ १ २ २ १ २ ३ १ २ २ ३ १ २ ३ १ २
आवइन्द्रम्पुरुहूतन्नमेगिरानेमिन्तष्टेवसुद्रुवम् ॥ १ ‡ ॥

"तरणिरित्" युद्धादौ कर्मणि त्वरितएव पुमान् "पुरन्ध्या" महत्या धिया "युजा" सहायभूतया "वाजम्" अन्नं "सिषासति" सम्भजते, "पुरुहूतं" बहुभिराहुतम् "इन्द्रम्" "गिरा" स्तुत्या हे यजमानाः "वः" युष्मदर्थम् अहम् "आ नमे" आनतमभिमुखं कुर्वे। तत्र दृष्टान्तः—"नमिं" चक्रस्य वलयम् "सुद्रुवं" शोभनदारुं "तष्टेव" यथा वर्द्धकिः दारु-नेमिमानमयते तद्वदित्यर्थः ॥ १ ॥

---

* उ० गा० ९प्र० १अ० ६सा० ।

† 'रौरवमच्छावाकं साम'—इति वि० ।

‡ ब्र० आ० ३, १, ४, ६ (१ भा० ४९३ पृ०) = य० वे० १२, २१ = ऋ० वे० ५, ३, २०, ५ ।

अथ द्वितीया।

१२१ १२ ३१२ ३१२ २२ ३१२
नदुष्टुतिर्द्रविणोदेषुशस्यतेनसेधन्तंरयिर्नशत्।

७२३१० ३ २ २३१९ ७ १२ २२३२
सुशक्तिरिन्मघवन्तुभ्यम्मावतेदेष्णंयत्पार्यंदिवि॥ २*॥१३

"द्रविणोदेषु" धनदातृषु पुरुषेषु "दुष्टुतिः". असमीचीना स्तुतिः "न शस्यते" नाभिधीयते। किञ्च "सेधन्तं" हिंसन्तं: धनदातृविषय-स्तुत्यादि-कर्माण्यकुर्वन्तमित्यर्थः, एवम्भूतं जनं "रयिः" धनं "न नशत्" न व्याप्नोति। तथा हे "मघवन्" धनवन्निन्द्र! "पार्यं दिवि" सौम्ये दिवसे † "मावते" मत्सदृशाय स्तोत्रे "देष्णं" दातव्यं "यत्" धनमस्ति तत् "तुभ्यं" त्वत्तः सकाशात् "सुशक्तिरित्" शोभन-स्तुतिकएव स्तोता लभत इति शेषः॥

"नदुष्टुतिर्द्रविणोदेषुशस्यते"--इति छन्दोगाः, "नदुष्टुती मर्त्योविन्दतेवसु"--इति बह्वृचाः॥ २॥ १३

२ १ ५ १
॥ रौरवम्॥ तरणिरित्साइयिषासाइर्जुतीं। वाऽर्जम्यु

२ २ २ २१ १२ २
रन्ध्यायुजावइन्द्रम्पूरुहूतन्नमाइयिगिरा। ओहाइउवा।

---

* ऋ० वे० ५, ७, २१, १।

† 'पार्यं दिवि—पारणाये द्युलोके'—इति वि०।

१र र २ १र र ९ १
नेमिन्तष्टे वसू२३हाइ । नेमिन्तष्टे वसा२३उहाइ । ओ
२ २ १ ४ ५ २र र
हा३उवा । द्रुवाम् । औ२३होवा ॥(१) नेमिन्तष्टे वा
१ ५ १ र र
स्तुद्रू२३४वाम् । नायिमिन्तष्टे वस्तुद्रुवन्नदुष्टूनिर्द्रविणो
१ ३ २ २ २ १ र ५
द्रघुशा२३यतायि । ओहा३उवा । नस्ते धन्ताएरया२३
२ १ २ २ १ ४ ५
यिर्हायि । ओहा३उवा । नशात् । औ२३होवा ॥(२)
र १ ५ १ र
नस्ते धन्तएरा३यिर्न्ना२३४शात् । नाऽस्ते धन्तएरयिर्न्नशत्सु
३ २ १ २ २ १र
शक्तिरिन्मघवन्तुभ्यम्मा२३वतायि । ओहा३उवा । देष्णं
२ १ २ २ १ २
यन्नारिया२३यिहायि । ओहा३उवा । दिवा । औ३
५ ४
होवा । होपूई । डा(३) ॥ १९ * ॥ [१] १३

इति सामवेदार्थप्रकाशे उत्तरार्चस्य चतुर्थस्याध्यायस्य
चतुर्थः खण्डः † ॥ ४ ॥

---

* ऊ० गा० २प्र० १अ० १९सा० ।

† 'उक्तं माध्यन्दिनं सवनम्'—इति वि० ।

अथ पञ्चमे खण्डे*—

प्रथमर्चे—प्रथमा।

२ २उ २ १ २ ३ १ २ २ १ २
तिस्रोवाचउदीरतेगावोमिमन्तिधेनवः।

१ २ ३ १ २
हरिरेतिकनिक्रदत्॥ १॥

"तिस्रोवाचः" ऋगादिभेदेन "उदीरते" प्रोच्चारयन्ति ऋत्विजः। "धेनवः" आशिरेण प्रीणयित्र्यो "गावः" "मिमन्ति" शब्दायन्ति दोहार्थम्, "हरिः" हरितवर्णः सोमश्च "कनिक्रदत्" शब्दं कुर्वन् "एति" गच्छति द्रोणकलशम्॥ १॥

अथ द्वितीया।

१ १२ २२ ३ २ ३ १ २ ३ १ २
अभिब्रह्मीरनूषतयज्ञीर्ऋतस्यमातरः।

३ १ २ ३ १ २२
मर्ज्जयन्तीर्दिवःशिशुम्॥ २॥

"ब्रह्मीः" ब्राह्मण-प्रेरिताः¶ "यज्ञीः" महत्यः ['यज्ञः'—इति महन्नाम (निघ०३, ३, १३)] "ऋतस्य" यज्ञस्य "मातरः"

---

* 'इदानीं तृतीयसवनमारभते'—इति वि०। 'पाङ्क्तं साम'—इति वि०।

† ऋ० आ० ५, २, ४, ५ (२ भा० १६) = ऋ० वे० ६, ८, २२, ४।

‡ ऋ० वे० ६, ८, २२, ५।

¶ 'ब्रह्मीः—ब्राह्मणा या याः स्तुत्यर्थं ता ब्रह्मीः'—इति वि०।

निर्मांश्चयः स्तुतयः* "दिवः" द्युलोकात्† "शिशुं" शिशुस्थानीयं सोमम्‡ "मर्जयन्तीः" पावयन्तीः "अभ्यनूषत" स्तवन्ति [तृतीय-स्यामितोदिवि सोममासीदित्यादि श्रुतेः द्यु-शिशुत्व तस्य]॥

"मर्जयन्तीः" "मर्मृज्यन्ते"—इति पाठौ ॥ २ ॥

अथ तृतीया।

७ १ १२ ३२३ १२ ३१२

रायःसमुद्राꣳश्चतुरोस्मभ्यꣳसोमविश्वतः।

१२ ३ १२

आपवस्वसहस्रिणः॥ ३ ¶ ॥ १४

"रायः" धनस्य सम्बन्धिनश्च "चतुरः समुद्रान्" मणि-मुक्तादि-धन-पूर्णानित्यर्थः। तादृशीन् समुद्रान् "अस्मभ्यम" अर्थाय हे "सोम।" "विश्वतः" सर्वतः "आ पवस्व"। तथा "सहस्रिणः" § अपरिमितान् कामान् आपवस्व प्रयच्छ [चतुः-समुद्रस्य धन-विशेष प्राप्ते तन्मध्यगत धन भूमि-स्वामित्वमन्तरेणा सम्भवात् चतुस्समुद्र सहित-भूमण्डल स्वामित्वमेवाशास्ते यज-मानः]॥ ३ ॥ १४

---

* 'मातर —धेनव आदित्यरश्मयो वा आपो वा —इति वि०।

† 'दिव —द्युलोकात् सकाशात इति वि०।

‡ 'शिशुं प्रसवीय सोमम —इति वि०।

¶ ऋ० वे० ९ ८ २३, ६।

§ सहस्रिण —सहस्रसंख्यका' —इति वि०।

॥ पाष्ठौहम् ॥ तिस्रोवाचा२उदीरतायि। गावो
मिमन्तिधेनवः। हरिरा२३यितौ। कनौ२। ऊवायि।
हो३वा३। क्रा२दा२३४ओहोवा ॥(१) अभिब्ल्रा२यि
रनूषता। यङ्कीर्कृतस्यमातरः। मर्ज्जया२३न्तीः। दिवो
२। ऊवायि। हो३वा३। श्रा२यिश्रा२३४ओहोवा ॥(२)
रायःसम्२द्रा९श्चतुराः। अस्मभ्य९सोमविश्वताः। आ
पवा२३स्वा। सहौ२। ऊवायि। हो३वा। स्वा२यि
ण्या२३४ओहोवा। हाओवा। ओवा२३४५ ॥ २०* ॥ [१]

॥ क्षुल्लकवैष्टम्भम् ॥ तिस्रोऽ५वा। चा३उदीरतायि।
गावोमिम। तिधायिता१वा२३:। हेवा३हायि। हंरा
यिरा१यितौ२३। हेवा३हायि। कनि। क्रा२दा२३४
ओहोवा ॥(१) अभाऽ५यिब्ल्रा। ब्ल्रा३यिरनूषता। याङ्की

* क० गा० २म० १ख० २०सा०।

२ १ २ १ ६ २ १ २
र्षति। स्यमाता१रा२३:। ह्वोवाऽहायि। मर्क्षायाः

१ ९ २ १ २ ५८
म्ती२३:। ह्वोवाऽहायि। दिवः। ग्रा२यिग्रा२३४घौ

२ ४२ ३ ४ २२ ३ ५ १
ह्वोवा ॥(२) रायाऽऽयःसम्। ऊऽद्राऽश्वतुराः। आस

२ २ १ २ १ २ २ १२
भ्रऽमो। मंवायिस्वा१ता२३:। ह्वोवाऽहायि। आपा

२ १ २ २ १ ३ ५२
वा१स्वा२३। ह्वोवाऽहायि। सह। स्वा२यिणा२३४घौ

२ ३ ५
ह्वोवा। दौ२३४शाः(३) ॥ १६ * ॥ [२]

१ २ २२ १
॥ साऽछितम ॥ तिस्रोवाचउत्। आ२यिरतायि।

२२ १ २ १ १ २
गावो२। मा२३यिमा। तिधा२यिनावाः। ह्वा२३रौः।

१ ७ ८ ५
आ२यितायि। कना२३। हाउवा३। क्रा२३४दात्॥(१)

२ १ २२ १ २ १ ७
अभिब्रह्मीर। नू२षता। यङ्का२यिः। आ२३र्त्ता।

१ १ २ १ ७
स्यमा२तारा:। मा२३र्ज्जा। या२न्तायिः। दिवा२

२ ५ २१ १ २ २
३:। ह्वाउवा३। ग्रा२३४यिग्रम्॥(२) रायःसमुद्रान्।

---

* ऊ० मा० ७प्र०१ ख० १६सा०।

१ १ १ २ १ १
चा२३तुराः। अस्मा२। भ्या२३ऽसो। मवा२यिस्वा

२ १ ७ २
ताः। आ२३पा। वा२स्वा। सद्दा२३। द्दाउवा३।

५
स्वी२३४णाः(३) ॥ ७ * ॥ [३]

१ २ २१ १ २१
॥ ऐडसैन्धुक्षितम् ॥ तिस्रोवाचो। द्दायि। उद्दी.

२ १२ २ २ ७ ६ २
रा२३तायि। गावोमिमन्तिधा१यिनाऽवाः। द्दरिरतो

५ १ २ २ १ ४
२३४द्दायि। कानाऽयिद्दायि। क्रदात्। औ२३ द्दो

५ १ २ १ २१८ २ १ ८
वा ॥(१) अभिब्रह्मो। द्दायि। अनूषा२३ता। यक्षी

२ २ २ ३ ५ १ २
र्घृतस्यमा१ताऽराः। मर्ज्जयन्तो२३द्दायि। दायिवाऽ

२ १ ४ ५ २८ १
द्दायि। शिशुम्। औ२३द्दोवा ॥(२) रायःसमो। द्दा

२८ १ २ १ ८ २ २ १
यि। द्रा७श्वतू२३राः। अस्मभ्य७सोमावा१यिस्वाऽताः।

८ २ ५ १ २ २ १ २ ४
आपवस्वो२३४द्दायि। साहाऽद्दा। मृणा। औ३द्दो

वा। द्दोयुई। डा(३) ॥ १८ † ॥ [४]

---

* ज० गा० ८प्र० १ऋ० ७सा०। †ज० गा० १५प्र० १ऋ० १८सा०।

॥ गायत्रौशनम् ॥ तिस्रोवाचाः। उदीरा२३ता
यि। गावोमिम। तिधेना२३वाः। ह्वरायिरा३यिता३
यि। काना२३यिह्वा३४३यि। क्रा२३४दोर्ह्वायि ॥(१) अ
भिब्रह्मायिः। अनूषा२३ता। याङ्कीर्त। स्यमाता
२३राः। मज्जाया३न्तीः। दायिवा२३हा३४३यि। श्रा
२३४यिशोर्ह्वायि ॥(२) रायःसमू। द्रा॒ञ्श्रतू२३राः।
अस्मभ्य॒सौ। मविश्वा२३ताः। आपावा३स्वा३। साह्वा
२३हा३४३यि। म्रा२३४यिणार्ह्वायि(३) ॥ १० * ॥ [५]

॥ वैरूपम्† ॥ तिम्रोवा२३४चाः। उदायिरा३ता३यि।
गावोर्मा२३४यिमा। तायिधे१नावा२ः। ह्वरा२३यिः।
एता३४औह्वोवा। कानिक्रदा२३४५त् ॥(१) अभिब्रा२३
४ह्मीः। अनूषा३ता३। यङ्कार्यिरा२३४र्त्ता। स्थामा

---

* ऋ० गा० २०प्र० १अ० १०सा०। † "गायत्रोवैरूपम्"—इति ख० पु०।

१ २ ५ २ २ १ २
१तारा२ः। मर्ज्जा२३। यन्ता२५औहोवा। दिवःशि

३ १ १ १ १ २ १ ५ १ २ १ २ १ ०
शू२३४५म्॥(२) रायःसा२३४मू। द्रा॰श्वातू३रा३ः। अ

२ ५ १ ० १ २ २
सा२भ्या२३४॰सो। माविस्वाता२ः। आपा२३। वखा

५ २ १ २ १ १ १ १
३४औहोवा। सद्दमिणा२३४५ः(३)॥ ११ ॥ [६] १४.

अथ द्वितीयर्चि†—प्रथमा।

३ २ ३ १ २ ३ २ ३ १ १ ३ १ २
सुतासोमधुमत्तमाःसोमाइन्द्रायमन्दिनः।

३ १ २ ३ १ २ ३ १ २
पवित्रवन्तोअक्षरन्देवान्गच्छन्तुवोमदाः॥ १ ॥

"मधुमत्तमाः" अतिशयेन माधुर्योपेता अतएव "मन्दिनः" मदकरा "सुतासः" अभिषुताः सोमाः "पवित्रवन्तः" पवित्रे वर्त्तमानाः सन्तः "इन्द्राय" इन्द्रार्थम् "अक्षरन्" पात्रेषु क्षरन्ति। अथ प्रत्यक्षकृतः—"व" युष्माकं "मदाः" मदहेतवः रसाः "देवान्" इन्द्रादीन् "गच्छन्तु" ॥ १ ॥

---

* ज० गा० २०प्र० १ख० ११सा०।

† 'नाष्टौ साम'—इति वि०।

‡ ज० आ० ६, २, १, ३ (२भा० १५५पृ०)= ऋ० वे० ७, ५, १, ४।

अथ द्वितीया ।

२ ३ १ २ २ १ २ १ १
इन्दुरिन्द्रायपवतइतिदेवासोअब्रुवन् ।

१ १ १२ ३ २ ३ १ १ ३ १ २
वाचस्पतिर्मखस्यतेविश्वस्येशानओजसः ॥ २ * ॥

"इन्दुः" सोमः "इन्द्राय" इन्द्रार्थं "पवते" कलशे क्षरति "—इति" "देवासः" स्तुतिकारिणः स्तोतारः "अब्रुवन्" वदन्ति; यदा स्तोतार एवं ब्रुवन्ति तदानीं "वाचः" स्तुतेः "पतिः" पालयिता † यद्वा शब्दस्य स्वामी अत्यन्तं शब्दायमान इत्यर्थः, तादृशः सोमः "मखस्यते" स्तुतिभिः पूजामिच्छति [लालसायां सुगागामः]। कीदृशः ? "ओजसः" बलवतः "विश्वस्य" सर्वस्य "ईशानः" प्रभुः ॥

"ओजसः"-"ओजसा"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

२ १ १ २ १ २ ३ २
सहस्रधारःपवतेसमुद्रोवाचमीङ्खयः ।

१ २ ३ १ २ ३ १ १२ ३ १
सोमस्यतीरयीणाꣳसखेन्द्रस्यदिवेदिवे ॥ ३ ‡ ॥ १५

---

* ऋ० वे० ७, ५, १, ५ ।

† 'वाचस्पति'—ऋग्यजुः सामलक्षणा भो वाग्भ्यः पतिः'—इति वि० ।

‡ ऋ० वे० ७, ५, २, १ ।

"सहस्रधारः" बहुविध धारोपेतः "सोमः" "पवते" क्षरति । कीदृशः ? "समुद्रः" समुद्रवन्ति "रसा" रस-स्थानीयः "वाचमीङ्खयः" [ईङ्खतेर्णिजन्तस्य सुप्युपपदे खश् प्रत्ययः] स्तुतीनां प्रेरयिता * "रयीणां" धनानां "पतिः" प्रभुः [यद्वा "रयीणां" हविषोदातॄणां यजमानानां † "पतिः" पालयिता] "दिवे-दिवे" प्रत्यहम् "इन्द्रस्य" "सखा" मित्रभूतः सोमः पवते ॥

"सोमस्पतिः"-"सोमःपतिः"—इति पाठो ॥ २ ॥ १५

॥ गौरीवितम् ‡ ॥

५ र ३र २ ४ ५

सुता । सोमा३ । धुमन्तमाः ।

१र र र १ २ ४र

सोमाइन्द्रायमन्दिना२३: । पावित्रवा३१२३ । तोआ५श्च

१ र २ ४ ५ ४ ५

रान् । दायिवान्गच्छा३१२३ । तुवोवा । मा५दोꣳ६ह्वा

५ ३ २ ४ ५ १ र र र

यि ॥(१) इन्दुः । इन्द्रा३ । यपवतायि । इतिदेवासो

१ २ ४

अब्रुवा२३न् । वाचस्पता३१२३यिः । मखा५स्यतायि ।

१ र २ ४ ५ ४ ५

वायिस्वस्ये शा३१२३ । नओवा । जा५सो ६ हायि ॥(२)

५ २ २ ४ ५ १ र र र

सह । सधा३ । रःपवतायि । समुद्रोवाचमीङ्खया२३: ।

---

* 'वाचमीङ्खयः—शब्दं कुर्वन्त्य.' - इति वि० ।

+ 'सोमः पतिः केषाम् ? रयीणाम् रथ-पुरोडाशादि लक्षणानां धनानाम् अथवा सर्वसखानाम्'—इति वि० । ‡ "सखागौरीवितम्"—इति ख० पु० ।

सोमस्यताऽ१२३यिः । रयाऽयिणाम् । साखेन्द्रस्याऽ१२३ ।
दिवोवा । दाऽयिवोऽहायि(३) ॥ ३ * ॥ [१]

॥ वतन्त्वाष्ट्रीसाम ॥ सुतासोमा । धुमाऽत्तमाः ।
सोमाइन्द्राऽयमाऽ । ए३ । दिनआ । पवायिचवाऽन्तो
३ । ए३ । क्षरन्ना । दायिवान्गच्छाऽन्तुवाऽः । ए३ ।
मदाआ ॥(१) इन्दुरिन्द्रा । यपाऽवतायिदेवाऽसो ३ ।
ए३ । ब्रुवन्ना । वाचास्यताऽयिर्मखाऽ । ए३ । स्यत
आ । विश्वास्येशाऽनओ३ । ए३ । जसआ ॥(२) सह
स्रधा । रःपाऽवतायि । समुद्रोवाऽचमा ३ यि । ए३ ।
खयआ । सोमास्यताऽयिरयाऽयि । ए३ । णा ३ मा ।
सखेन्द्रस्याऽदिवाऽयि । ए३ । दिवआ(३) ॥ ४ † ॥ [२]

॥ आन्धीगवम् ॥ सुतासोमधुमा१त्तामाः । सोमाइ ।

---

* ऋ० गा० २प्र० २अ० १खा० । † ऋ० गा० २प्र० २अ० ४खा० ।

२ २ १ १ २१ २ २ २१
द्रायार२३मा। ऊम्मा २१।२। दिनःपविचवन्तीअक्षरार२

१११ १ २ २ १ २ १
३४५न्। दायिबा३उवा। गा २च्छा। तू२३बो। मदा।

१ ४५ २ २ २ १ २ २
औ३ह्वोवा ॥ (१) इन्दुरिन्द्रायपा१वाताय। इतिदे। वा

२ १ १ २२१ १० ३ १११
सो२३आ। ऊम्मा २१।२। ब्रुवन्वाचस्पतिर्मखस्यता२३४

१ २ २ १ २
५यि। वायिश्वा३उवा। स्या २यिश्रा। ना२३ओ। ज

१ २ ४५ २ २ २ १
सा। औ३ह्वोवा ॥ (२) सद्दस्मधारःपा१वाताय। समु

२ २ १ १ २२१ १ २१
द्रः। वाचा२३मा। ऊम्मा २१।२। खयःसोमस्यतीर

२२१ २ २ १ २
योणा१म्। साखा३उवा। द्रा २स्या। दा २ ३ यिवे।

१ २ ४५ ४
दिवा। औ३ह्वोवा। ह्वोई। डा(३) ॥ २० * ॥ [१]

१ २ २ ३ २ १
॥ स्वारत्वाष्ट्रीसाम ॥ सद्दस्मधा ३ द्वा। रःपवाता २

१ २२ २ ३ २२ १ १२ २
यि। समुद्रोवाा३द्वा। चमीङ्गाया २:। सोमस्यताा३यि

---

* ऊ० गा० ७।५७ १ ऋ० २० सा०।

२ १ १२ २ २ २ १
हायि। रयायिणा२म्। सखेन्द्रस्याइहायि। दिवाइ

१ ५ ४ ५
हो२३४। वा। दापयिवोईहायि(३) ॥ ८ *॥ [२]

१ २ २ २ २ १
॥ खारत्वाष्ट्रीसाम ॥ सुतासोमाइहा। धुमन्तांमा

१२ २ २ ३२ १ १ २
२:। सोमाइन्द्राइहा। यमन्दायिना२:। पवित्रवा३

२ ३२ २ १ १२ २ २ ३ १ १
हा। तोअत्तारा२न्। देवान्गच्छाइहा। तुवो३हो२

५ ४ ५ १ २ २ ३२
३४। वा। मापदोईहायि ॥(१) इन्दुरिन्द्राइहा। यप

१ १ २ ६ २ २१ २ १ १२
वाता२यि। इतिदेवाइंहा। सोअब्रूवा२न्। वाचस्प

२ २ ३ २ १ १ २ २ २ २
ताइयिर्हायि। मखस्यातारयि। विश्वस्येशाइहा। न

२ २ ५ ४ ५ १ २
ओइहो२३४। वा। जापसोईहायि ॥(२) सहसधा ३

२ ३ २ १ १ २ २ २ ३ २ १
हा। रःपवातारयि। समुद्रोवाइहा। चमीङ्गाया२:।

१२ २ २ १ १२ २ २
सोमस्यताइयिहायि। रयायिणा२म्। सखेन्द्रस्याइहा

२ २ १ ५ ४ ५
यि। दिवाइहो२३४। वा। दापयिवोईहाइ(३) ॥१ †॥[३]

---

* ऋ० गा० ८५० १ अ० ८ खं०। † ऋ० गा० १५५० २ अ० १ खं०।

॥ द्विरभ्यस्ताष्ट्रीसाम ॥ सुता। सोमाइ। हा इ

हा। धुमत्तामा२३४:। सोमाः। इन्द्राइ। हाइहा।

यमन्दायिना२३४:। पवि। त्रवाइ। हाइहा। तोत्व

त्वारा२३४न्। देवान्। गच्छाइ। हाइहा। तुवोइ

त्वो२३४। वा। मा५दो६त्वायि ॥(१) इन्दुः। इन्द्रा

इ। हाइहा। यपवाता२३४यि। इति। देवाइ। हा

इहा। सोमब्रूवा२३४न्। वाचः। पताइयिः। हाइ

त्वायि। मखस्याता२३४यि। विश्व। स्येशाइ। हाइ

हा। नमोइहो२३४। वा। जा५मो६त्वायि ॥(२) स

ह। मधाइ। हाइहा। रःपवाताइ३४यि। समु।

द्रोवाइ। हाइहा। चमोद्भ्नाया२३४:। सोमः। पता

इयि। हाइत्वायि। रयायिणा२३४म्। सखे। द्रुह्या

३ २ १ ५ ४
३। ह्वा३ह्वायि। ह्विवा३ह्वो२३४। वा। दा५यिवो६
१
ह्वायि(३) ॥ २ * ॥ [४]

१ १२ २२ १ २ २
॥ ऊर्ङ्त्वाष्ट्रीसाम ॥ सुतासोमधुमत्तमाः। सोमा
१ ३ २ ३ ५ २ १ २ २
२३इन्द्रा२। यमा३४५। दी२३४नाः। पवित्रवन्तोऽअ
१ १ १ १ ३२ २ १ २ १२ २
क्षरा२३४न्। देवान्गच्छा। तुवोमा२३दा ३ ४ ३:॥(१)
१ २ १ २ २ १ १२ ३२ २
इन्दुरिन्द्रायपवतायि। आयिता२यिदेवा२। सोऽआ३४
३ ५ २१ २ ३ १ १ १ १ ३
५। ब्रू२३४वान्। वाचस्पतिर्मखस्यना२३४५यि। वि
२२ १ २ १२ २ २ १ २२ १
श्वस्येशा। नऽओजा२३सा३४३: ॥(२) सहस्रधार:पवता
१२ ३ २ ४ ५ १२
यि। सामू२द्रोवा२। चमा३४५यि। खा२३४याः। सो
२ १ ३२२ ३५ २ ४ २ २ १ २ १२ २
मस्यतौरयीणा१म्। सखेन्द्रस्या। दिवेदा२३यिवा३४३
१
यि। ओ२३४५ई(३) ॥ २ † ॥ [७]

५ २ २ ४ ५ ४ ५ १२ १ २ १
॥ साध्रम् ॥ सुतासो३साऽधुमत्तमाः। सोमाइन्द्रा२।

---

* ऊ० गा० १५प्र० २अ० २सा०। † ऊ० गा० १६प्र० १अ० २सा०।

३ २ ३ ५ २ १ २ ८ २ १ १ १ १
यमा३४५। दी२३४नाः। पवित्रवन्तोअक्षरा२३४५न्।

१ २ ३ ५ १ २ ३ ५ ४
दायिवाओ२३४५वा। गाक्काओ२३४वा। तुवो५मदाः॥(१)

५ ८ ४ ५ ५ ५ २ १ २८ १ ३८ १
इन्दुरा३यिन्द्रायपवतायि। इतायिदेवा२। सोआ३४५।

३ ५ २८ १ २ ३ १ १ १ १ १ २
ब्रू२३४वान्। वाचस्पतिर्मखस्यता२३४५यि। वायिष्म

३ ५ १ २ ३ ५ ४
ओ२३४वा। स्यायिषाओ२३४वा। नओ ५ जसाः॥(२)

५ २ ४ ५ ४ ५ २ १ २८ १ ३ २
सहस्रा३धारःपवतायि। समुद्रोवा२। चमा ३ ४ ५ यि।

३ ५ १८ २ १ ८ २ ३८ २ २ ३
खा२३४याः। सोमस्यतोरयिणा१म्। साखाओ २ ३ ४

५ १ २ ३ ५ ४ ४
वा। द्रास्याओ२३४वा। दिवे५दिवायि। हो ५ ई।

३ २ २ ४ ५ २
॥ श्यावाश्वम्॥ सुता३१। सोइमाऽ। धुम। ताइ

४ ५ १ ८ ८ २ १
म। एहिया। सो। माइन्द्राया। म। दिना २ः।

१८ १ २ ४ ५ १८
एहिया २। पवित्रवान्तो३आ३। न्ना२३४रान्। ऐहा

ऊ० गा० २०प्र० १अ० १२सा०।

१२ २ २ १ २ ४ २
२यि। एह्यि२। देवान्गाच्छान्तू३वो३। मा३४५दोई

५ २ २ २ ४ऽ ५ २ ४२
ह्वायि ॥(१) इन्दू३१:। आ३यिन्द्रा। यप। वा३ते।

५ १ २ २ २ १ १२
एह्यि। आयि। तिदेवासो। अ। ब्रूवा२न्। ए

२ १ २ ४ ५ २२
ह्यि२। वाचस्पतायिर्म्मा३खा३। स्या२३४ताये। ऐ

१२ १२ २ ४ २
द्रा२यि। एह्यि२। विश्वस्येशाना३ओ३। जा३४५

५ ३ १ २ ४ऽ ५ २ ४२
सोईह्वायि ॥(२) सद्रा३१। स्रा३धा। रःपा। वा३ते।

५ १ २ २ २१ १ १२
एह्यि। साम्। उद्वोवाचाम्। ई। खया२:। ए

२ १ २ ४ ५ १२
ह्यि२। सोमस्यातीरा३। या२३४यिणाम्। ऐद्रा

१२ २ १ २ ४ २
२यि। एह्यि२। सखेद्र स्यादा३यिव३। दा३४५यि

५
वोईह्वायि(३) ॥ १३ * ॥ [८]

२ १२ २२ १ २ १ २
॥ मद्राविष्टम्भम् ॥ सुतासोमोद्वायि। धुमत्तमोवा।

१ २ २ २ १ २ १ २ २ १
सोमाइन्द्रा। यमान्दा१यिना२३:। द्वोवा३द्वायि। पवित्र

---

* ऋ० गा० २०प्र० १ष० १२सा०।

२ २ १ २ २ १ २ १ २
व। तोआच्चा१रा२३न्। होवा३ च्चायि। देवान्गा १

२ १ २ २ १ २ ५ २ ८
च्चा२३। च्चोवा३च्चा। तुवः। मा२दा२३४औहोवा ॥(१)

१ २ १ २ १ २ १ २ २ १ २
इन्दुरिन्द्रोच्चा। यपवतोवा। आयितिदेवा। सोआम्रू

१ २ २ २ १ २ १ २
१वा२३न्। च्चोवा३च्चायि। वाचस्पतिः। मखास्या१,

१ २ २ १ २ १ २
ता२३यि। च्चोवा३च्चायि। विश्वास्ये१भ्रा२३। च्चोवा३

२ १२ ३ ५ २ २ १ २ १
च्चा। नआ। जा२सा२३४औहोवा ॥(२) सच्चसुधोच्चा।

२ १ २ १ २ २ १ २ १
रःपवतोवा। सामुद्रोवा। चमायिच्च१या२३ः। हो

१ २ १२ १ २ ५ २ २
वाउच्चायि। दिवे। दा२यिवा२३४औहोवा। दी२३४

५
भ्राः(३) ॥ ११* ॥ [१०] १५

अथ तृतीयत्रचे†—प्रथमा।

३ १ २ २ १ २
पविच्चन्तेवितनम्ब्रह्मणस्पते

३ १ २ २ ३ १ २ ३ १ २
प्रमुर्गात्राणिपर्येषिविश्वतः।

---

० ऊ० गा० २२०प्र० २अ० ११वा०। †.'चरिष्ठं साम'—इति वि०।

१ २ १ २उ २ १ २
अतप्ततनूर्नतदामोअश्नुते
३ २ ३ १ २१ २ १ २२
शृतासद्वहन्तःसन्तदाशत ॥ १* ॥

हे "ब्रह्मणस्पते" मन्त्रस्य स्वामिन् सोम! "ते" "पवित्रं" शोधकमङ्गं "विततं" सर्वत्र विस्तृतम्। सः "प्रभुः" प्रभवितासि. "गात्राणि" पातुरङ्गानि "पर्येषि" परिगच्छसि "विश्वतः" सर्वतस्तव तत् पवित्रम् "अतप्ततनूः" पयोव्रतादिना असन्तप्तगात्रः "आमः" अपरिपक्वः "न अश्नुते" न व्याप्नोति। "शृतासः इत्" "शृताएव" परिपक्वाएव "वहन्तः" यागं निर्वहन्तः "तत्" पवित्रम् "समाशत" व्याप्नुवन्ति॥

"सन्तदाशत"--"तत्समाशत"—इति पाठौ॥ १ ॥

अथ द्वितीया।

१ २ ३ २ ३ १ २ ३ २ १
तपोष्पवित्रं विततन्दिवस्पदे
१ ३ २ ३ २क २२
शर्न्तोअस्यतन्तवोव्यस्थिरन्।

---

* छ० आ० ६, २, १, १२ (२भा० १९८ पृ०) = ऐ० ब्रा० १, २१=बृ० दे० ७, ३, ८, १।

१ २ २१ २३ १ २
अवन्त्यस्यपवितारमाशवो

२ २ २१ २२ २१२
दिवःपृष्ठमधिरोहन्तितेजसा ॥ २ * ॥

"तपोः" † शत्रूणां तापकस्य सोमस्य "पवित्र" शोधक-मङ्गं "दिवस्पदे" द्युलोकस्योत्थिते स्थाने "विततं" विस्तृतम् ["तृतीयस्यामितो दिवि सोम आसीत्"—इति ब्राह्मणम्] "अस्य" "तन्तवः" अंशवः ‡ "अर्चन्तः" दीप्यमानाः "व्यस्थिरन्" विविधं तिष्ठन्ति पृथिव्यां हविर्द्धाने वा "अस्य" सोमस्य "आशवः" शीघ्रगामिनः रसाः "पवितारं" पावयितारं यजमानम् "अवन्ति" रक्षन्ति होमद्वारा पश्चाद्भुता "दिवः" द्युलोकस्य "पृष्ठं" पृष्ठभागम् उन्नतदेशम् "तेजसा" स्वप्रकाशेन सार्द्धं "अधिरोहन्ति" आरोहणं कुर्वन्ति ॥

"अर्चन्तः"-"शोचन्तः"—इति पाठो, "अधिरोहन्तितेजसा"-"अधितिष्ठन्तिचेतसा"—इति पाठो ॥ २ ॥

---

* ऋ० वे० ७, ३, ८, २।

† 'हे तपोः'—इति वि०।

‡ 'अस्य दशापवित्रस्य तन्तवः'—इति वि०।

अथ तृतीया।

१ १ २ २ १ २ १ १
अरुरुचदुषसःपृश्निरग्रिय

२ १ २ २ १ १ २ २
उच्चामिमेतिभुवनेषुवाजयुः।

१ १ २ १ १ २ १ १
मायाविनोममिरेअस्यमायया

२ १ २ १ २ १ २ १ २
नृचक्षसःपितरोगर्भमादधुः॥ ३ * ॥ १६

"उषसः" सम्बन्धि "पृश्निः" आदित्यः ["पृश्निरादित्यो भवति प्राश्नुत एनं वर्णः"—इति निरुक्तम् (२, १४)] "अग्रियः" मुख्यः सोऽयं "अरुरुचत्" रोचयति। स "उच्चा" जलस्य सेक्ता "भुवनेषु" भूतजातेषु "मिमेति" मिनोति उदकं प्रक्षिपतीत्यर्थः। "वाजयुः" † तेषामन्नमिच्छन् "मायाविनः" माया प्रज्ञा तद्वन्तः देवा "अस्य" सोमस्य "मायया" प्रज्ञया "ममिरे" निर्मितवन्तः, सोमस्यैकैकांशपानबला अग्न्यादयः स्व-स्व-व्यापारेण जगत् सृजन्तीत्यर्थः। तथा "अस्य" मायया "नृचक्षसः" नृणां द्रष्टारः "पितरः" पालका देवाः अङ्गिरसः पितरो वा "गर्भम्" "आदधुः" धारयन्ति ओषधीषु च। अत्र सूर्यात्मकः सोमः स्तूयते। सूर्यरश्मयनुगमाधीन-

---

० ऋ० वे० ७, ३, ८, ३।

† 'वाजयुः—वाजमन्नं तदिच्छुः अथवा वाजयुः वाजप्रदः अथवा वाजयुः वेगवान्'—इति वि०।

वर्धनाच्छन्दस्य अयमुषसः पृश्निः सविता अरूरुचत् रोचते रोचयति वासवं शिष्टं समानं तत्सम्बन्धिनः नृचक्षसः नृणां द्रष्टारः पितरो जगद्रक्षका रश्मयो गर्भमादधुः हृष्टार्थम् ॥

"मिमेतिभुवनेषु"-"बिभर्त्तिभुवनानि"—इति पाठौ ॥३॥ १६

॥ स्वारसाम ॥ पवौहोवा। त्रन्ते वितंत्रा। ह्वणास्पा
ता२यि। प्रभुर्गात्राणिपरियायि। षिविश्वातां २ ३:।
आताइम्नाता। नून्नीता२३४दा। ह्वो। मोत्रास्नू२३४
नायि। ह्वोइयि। ग्नात्ताइसाईत्। वाहन्तो२३४:मा।
ह्वा। तदाइशा५नाई५६ ॥ १) तपौहोवा। पवित्रंवित
ताम्। दिवस्पादा२यि। अर्चन्तोअस्यतन्तवो। वियं
स्यायिरा२३न्। आवाइन्तीया। स्यापावी २ ३ ४ ता।
ह्वा। रमात्मा२३४वाः। ह्वोइयि। दायिवाइःपार्ष्ठाम्।
आधीरो२३४हा। ह्वा। तिताइयिजा५सा ६ ५ ६ ॥(२)
अरौहोवा। रुचदुषसःपा। श्निरयाया२:। उच्चाभि

मेतिभुवनायि। षुवाजायू२३:। मायाइवायिनो। मा
मौरे२३४आ। हो। स्यमाया२३४या। हो३यि। ना
र्षाइत्रासा:। पायितारो२३४गा। हो। भमाइदा५धू
र्ष्ट:(३)॥१ * ॥ [१]

॥ कावम्† ॥ पवोवा। चन्ते विततंब्रा। ह्मणस्पा।
ता२यि। प्रभुर्गाचाणिपरियायि। षिविस्वाता२:।
अतप्ततनूर्न्नतदा। मोअश्न ता२३यि। शार्त्ताइसाईत्।
वह्न्ता:सा२३म्। तादाइआपूता६५६॥(१) तपोवा।
पवित्रंविततम्। दिवस्पादा२यि। अर्चन्तोअस्यतन्त
वो। वियस्थायिरा२न्। अवन्त्यस्यपविता। रमाशा
वा२३:। दायिवाइ:पार्ष्ठाम्। अधिरोहा२३ तायि
ताइयिजापुसा६५६॥(१) अरोवा। रुचदुषस:पा। श्नि

---

† उ० गा० ७प्र० २अ० १सा०।

१ १ १ २ २ २ १
रम्माया२ः। उत्तामिमेतिभुवनायि। षुवाजाय्यू२ः।
१२२ २ २ २ १ १ २ ४ ५
मायाविनोममिरेआ। स्यमायाया२३। नार्च्चा३त्तासाः।
२ १ १ २ ४
पितरोगा२३। भामा३दा५धू६५६ः(३) ॥ ३ * ॥ [२]

४ २ ४ २ ४ ५
॥ यज्ञायज्ञीयम् ॥ पवाऽ५यित्नम्। ता३यिवां३यिततंत्र।
१ २ २ २ २ १ २ २
ह्लाणस्यतेप्रभुर्गात्राणि। परियायि। षी३वायिस्वा३नाः।
१ १ २ २ २ २ १
अता२न्नतनून्नंतदामोअश्नु। तेग्रा२३र्त्ती। ऊम्मायि।
२ २ १ ३ २ १ २ १२
सा३ईत्। वाहन्तःमन्तदा२ग्नाउ ॥(१) ताता। पोष्य
२ २ २ २
वित्नंवितन्दिवस्पदेर्च्चन्तोअस्यतन्तवो। वा३यास्था३यि
२ १ १ २ २ २
रान्। अवा२न्त्यस्यपवितारमाशु। वोदा२३यिवाः।
१ २ २ १ ३ २
ऊम्मायि। पा३ष्ठाम्। आधिरोहन्तिता२यिजसाउ ॥(२)
१ २ १२ २ २
सास्रा। रुरुचदुषसःपृश्निरग्रियउत्तामिमेतिभुवनायि।
२ १ २ २ १२ १२ २ २ २
षू३वाजाय्यूः। मायाविनोममिरेअस्यमाय्। यानाः

* उ० मा० १२प्र० २ऋ० ३सा०।

२ १ १ २ १ २ २ १ २
श्र्वा। ऊम्माय्यि। क्षाइसाः। पायितरोगर्भमाइदधा

२ १११
उ। वाइ४५(३) ॥ १ * ॥ [३] १९

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य चतुर्थस्याध्यायस्य

पञ्चमः खण्डः † ॥ ५ ॥

अथ षष्ठे खण्डे ‡ः—

प्रथममन्त्र प्रगाथे—

१ २ ३ १ २ ३ २ ३ १ २
प्रमꣳहिष्ठायगायतऋतावृबृहतेशुक्रशोचिषे।

३ १ २ ३ १ २
उपस्तुतासोअग्नये ॥ १ ¶ ॥

हे "उपस्तुतासः" उपस्तोतारः। यूयं "मंहिष्ठाय" दातृतमाय "ऋतावृने" ऋतवते यज्ञवते वा "बृहते" महते "शुक्रशोचिषे" दीप्ततेजसे "अग्नये" "प्र गायत" स्तोत्रं पठत ॥ १ ॥

उ० गा० १५प्र० १ख० १मा०।

† 'यज्ञायज्ञीयमग्निष्टोम साम'—इति वि०।

‡ 'इदानीमुक्थानि भवन्ति'—इति वि०।

¶ ऋ० आ० २ १, २, १ (१ मा० १७४ प०) = ऋ० वे० ६, ७, १४, २।

अथ द्वितीया ।

१ १ २ १ २ ३ ४ ३ २ २ १ १ २ १ २
आव॰स्तेमघवावोरवद्यशःसमिद्धोद्युम्नयाऊतः ।

२ १ २ ३ १ २४२ २ २ २ ३ १ २
कुविन्नोअस्यसुमतिर्भवीयस्यच्छवाजेभिरागमत् ॥ २* ॥१७

"मघवा" धनवान् "द्युम्नी" अन्नवान् यशस्वी वा । [तथाच यास्कः—"द्युम्नं द्योतते र्यशोवान्नं वा (५, ५)"—इति वि. "समिद्धः" सम्यग् दीप्तः "आहुतः" आभिमुख्येन हुतः अग्निः "वोरवत्" पुत्रवत् "यशः" यशस्करम् अन्नम् "आवंसन्ते" यज़मानेभ्य आ प्रयच्छति तस्य "अस्य" अग्नेः "भवीयसी" अस्मासु अतिशयेन भवितुं योग्या "सुमतिः" अनुग्रह-बुद्धिः "नः" अस्मान् "अच्छ" प्रति "वाजेभिः" अन्नैः सह "कुवित्" बहु-सलिलम् † [कुविदिति बहु-नाम (निघ० ३, १, १२)] "आगमत्" आगच्छतु ॥

"भवीयसी"-"नवीयसी"—इति पाठो ॥ २ ॥ १७

५ २ ४२ ५२ २
॥ प्रम॰ंहिष्ठीयम् ॥ प्रम॰ंहाऽयिष्ठायगायता । ऋ॰

१ १ २ ४ ५ २ १
तावे २ । बृहतेऽऋक्षाऽग्नेऽ । चाऽऽ३४यिषायि । उपा

---

* ऋ० वे० ६, ७, १४, ४ ।

† 'कुवित्—कदाचन'—इति वि० ।

२ २ १ २ ४ २ ५
औ३ह्वो। स्तोतासो३आ३। ग्रा३४५यो ६ ह्वायि ॥(१)
५ २ ४र र ५ २र १ १ र
उपस्तृ३तासो३अग्मयायि। आव॰साता २यि। मघवाना
२ ४ ५ २ १ २ २ १ २
यिरा३वा३त्। या२३३ग्राः। समाऔ३ह्वो। धोत्यू न्नी
४ २ ५ ५ २ ४ ५र
३या३। ह्व३४५तो ६ ह्वायि ॥(२) समिद्वो३द्युम्नीयाऊता:।
२ १ १ २ ४ ५
कुवायिन्नो २। अस्यसुमनातिर्भा३वी३। या२३४साथि।
२ १ २ २ १र १ ४ २ ५
अच्छाऔ३ह्वो। वाजायिभो३रा३। गा३४५मो ६ ह्वायि(३) ॥

॥ ५ * ॥ [१] १७

अथ द्वितीयत्रचे†—प्रथमा।

२ ३ १ २ १ १ २ २ १ २ ३ २
तन्ते मदग्नॄणीमसिवृषणम्पृत्नुसासहिम्।
३ १ २ ३ १ २
उलोककृत्नुमद्रिवोहरिश्रियम् ॥ १ ॥ ‡

हे "अद्रिव:" वज्रवन् इन्द्र! "ते" त्वदीयं तं "मद" सोम-पान-जनितं हर्षं "गृणीमसि" गृणीम: प्रशंसाम: ['गृ शब्दे'

---

० ऋ० मा० ९प्र० २अ० ५सा०।

† 'द्वादिवर्तं' साम'—इति वि०।

‡ द्र० आ० ४, २, ५, ३ (१भा० ७८८ पृ०) = ऋ० वे० ६, १, १७, ४।

क्यादिः "प्वादीनां ह्रस्वः (७, ४, ८०)", "इदन्तोमसि (७, १, ४६)"—इति ममद्गागमः]। कीदृशम्? "हवणं" वर्षितारं कामानां "पृत्सु" पृतनासु सङ्ग्रामेषु "सासहिं" शत्रूणाम् अभिभवितारं "लोककृत्नु" लोकस्य स्थानस्य कर्त्तारं "हरिभ्याम्" अश्वाभ्यां "श्रययणीयं" सेव्यम् ["उ"शब्द एवः समुच्चये पादपूरणे वा]॥

"पृत्सु"-"पृत्सु"—इति पाठौ॥ १॥

अथ द्वितीया।

२ ३ १ २ ३ २ ३ १ २ ३ १ २
येनज्योतीꣳष्यायवेमनवेमनवेचविवेदिथ।

३ २ ३ २ ३ २ ३ १ २
मन्दानोअस्यबर्हिषोविराजसि॥ २ *॥

हे इन्द्र! "येन" आत्मीयेन मदेन "आयवे" और्वशेयाय † "मनवे" विवस्वतः पुत्राय च "ज्योतींषि" सूर्यादीनि हत्वादिभिरावृतानि तदा रोधं "विवेदिथ" अलम्भय प्रज्ञापितवान् प्रकाशितवानसीत्यर्थः; तेन मदेन "मन्दानः" मोदमानस्त्वम् "अस्य बर्हिषः" हृद्यस्य यज्ञस्य "विराजसि" विशेषेण दीप्यसे [यद्वा अस्येति तृतीयार्थे षष्ठी, अनेन बर्हिषा हृद्येन मदेन हृष्यन् विराजसि विशेषेण दीप्यसे॥ २॥

---

० ऋ० वे० ६, १, १७, ५।

† 'आयवे—यजमानाय—इति वि०।

अथ तृतीया ।

१ २ १ २ २ १ १२ २१ २
तदद्याचित्तउक्थिनोनुष्टुवन्तिपूर्वथा ॥

१ २ २१ २ २१ २
वृषपत्नीरपोजयादिवेदिवे ॥ ३ * ॥ १८

हे इन्द्र ! "ते" त्वदीयं "तत्" प्रसिद्धं बलं "अद्याचित्" † अद्यापि ‡ "पूर्वथा" ¶ पूर्वस्मिन् काले इव "उक्थिनः" शस्त्रिणः स्तोतारः "अनुष्टुवन्ति" क्रमेण प्रशंसन्ति । स त्वं "वृषपत्नीः" वृषा वर्षन्तः पर्जन्याः पतिर्यासां तादृशीः "अपः" "दिवेदिवे" प्रतिदिवसं "जय" § स्वायत्तं कुरु ॥ ३ ॥ १८

१ २ २ १
॥ हारिवर्णम् ॥ तन्तेमदा२गृणीमसायि । चार्षणं
२
१ २ २ १ २ २ १ १ २
प । चुसामा३हो३म् । होवा३हायि । उलोका३कृ३ ।
१ २ २ १ २ ५२ २ २
होवा३हा । नुम । द्रा२यिवा२३४औहोवा । हरि

---

* ऋ० वे० ६, १, १८, १ ।

† "निपातस्य च (६, ३, १३६)"—इति वि० ।

‡ 'चित्—इति पदपूरणः'—इति वि० ।

¶ "दिक्शब्देभ्यः (५, ३, २७)"—इति था ।

§ मन्त्रे जयति दीर्घान्तः, तत्र "ह्रस्वोऽनक्षिजः (६, ३, १३५)"—इति ह्रस्वः ।

१ १२१ १ १२ २ २
श्रिया२३४५म् ॥(१) येनज्योता२यिंषिमापवायि। मा

२२ १ २ २ १ २ २ १ २
नवेच। विवायिदी३था३। ह्वोवा३ह्वायि। मन्दानो ३

२ १ २ २ १ ३ ५२ २
आ३। ह्वोवा३ह्वा। मयव। ह्वा२यिषा२३४औह्वोवा।

२ २ १ १ १ १ १ २ १
विराजसा२ ३ ४ ५ यि ॥(२) तदद्याचा२यित्तंउक्थिनाः।

२ २ २ २ १ २ २ १ २ २
आनुष्टुव। तिपूर्वा३था३। ह्वोवा३ह्वायि। वृषापात्नी३ः।

१ २ १ १ ३ ५२ २ २ २
ह्वोवा ३ ह्वायि। अपः। जा२या२३४औह्वोवा। दिवे

२ १ १ १ १
दिवा२३४५यि(३) ॥ ६ * ॥ [१]

२ २ २ २ १ २ ३ ५ २
तन्तेमदाऔह्वोह्वायि। गार्णीयिमा२३४साय। वृ

१ ५ १ २ २ २ ३२ ४२ ५
षाणा२३४५ह्वायि। पुत्रूसासहिमुलोका३४। औह्वोवा।

१ २ ५ २ २ ५ २ १ २ १ ७ २
ह्वा२३४ह्वायि। उरुवा२३४कृ। त्नुमद्रि। वोहरिश्रा

३२ ४२ ५ १ ३ ५ ३२ २
३४। औह्वोवा। ह्वा२३४ह्वायि। औहो३१२३४।

५२ ५ २२ २ २ २ १ २
याम्। एहियाह्वा ॥(१) येनज्योता। औह्वोह्वायि।

---

० उ० मा० २प्र० २ख० ६सा०।

३ ५ २ १ ५ १ ४
षोआयाइ३४वायि। मनावाइ३४ईंहायि। चविवेदिथम

४ १ २४ ४४ ५ १ ३ ५ २ ३
न्दानाइ४। औहोवा। इहाइ३४हायि। उऊवाइ३४

५ २१ २ १ ०४१ ३४ ४४ ५ १ १
आ। स्रवर्हि। षोविराजाइ४। औहोवा। इहाइ३४

५ ३४ २ ५४ ५
हायि। औहो३१२३४। सायि। । एहियाईहा॥(२)

२ ४४ ४ १ २ ३ ५ १ १
तदद्याचाऔहोहायि। ताउच्छाइ३४ईनाः। अनूष्टइ३

५ १ ४ ४ २ ३४ ४४ ५ १ ३ ५
४हा। वन्तिपूर्वथावृषपाइ४। औहोवा। इहाइ३४हा

२ ३ ५ २१४२ १ ७४२ ३४
यि। उऊवाइ३४त्नीः। अपोज। यादिवेदाइ४। औ

४४ ५ १ ३ ५ ३४ २ ५४
होवा। इहाइ३४हायि। औहो३१२३४। वायि। ए

५
हियाईहा(३)॥ १३ ॥ [२]

५ ४ २ ४ ५४ ४ ५ १
॥ सौभरम्॥ तन्ताइयिमाइदङ्गृणीमसिवा। वृषणं

४ १ ७ १ ३ ५ १
पृश्नुसासाइहायिमुलोइ३। हो। काइ३४कू। नुमद्रि

५ २ १ ३ ५४ ४ ५४ ४
वः। हराइयिहाइयि। आइयाइ३४औहोवा॥(१) येना

० ऋ० गा० १३प्र० १अ० १३सा०।

३ ४ ५२ ४ ५ १ २ २ १ ७
इज्योइतीषिआयवोवा । मनवेचविवेदा२यिथामन्दा

१ २ ५ १ ६ २
२३। हो। नो२३४आ। स्यवर्हिषः। विराइहाइयि।

१ ३ ५२ २ ५ ४ ७ ४ ५ ४ ५
जाइसा२३४औहोवा ॥(२) तदाइद्याइचित्तउक्थिनोवा।

१ २ १ ७ १ ३ ५ १
अनुष्टुवन्तिपूर्वा२थावृषा२३। हो। पा२३४त्नीः। अ

२ २ ६ १ १ ३ ५२ ७ १
पोजया। दिवेइहाइयि। दा२यिवा२३४औहोवा। ऊ

१ १ १ १
२३४५(३) ॥ १९ × ॥ १८

अथ तृतीयतृचे*—प्रथमा।

३ १ २२ ३ २उ ३ १ २ ३ १ ४
अधीहवन्तिरश्याइन्द्रयस्त्वामपर्यति।

१ १ २ ३१ २ १ १ २ ३ १ २
सुवीर्यस्यगोमतोरायस्पृद्धिमहाऽअमि ॥ १क्ष ॥

ह इन्द्र' यः "त्वा" त्वां "मपर्यति" | मपरशब्दः कण्ड्वादिः¶ हविर्भि परिचरति। तादृशस्य "तिरश्चाः"—एतन्नामकस्य ऋषेर्मम "हवं" स्तुतिभिस्त्वद्विषयमाह्वानं "शृधि" शृणु।

* उ० गा० १९प्र० १अ० १९म०।

† "तिरश्च तृतीयमुक्थ्यम —इति वि ।

‡ ह० आ० ४, २, १, ५ (७०७ पृ०) = ऋ० वे० ६, ६, १०, ५।

¶ अत "कण्ड्वादिभ्यो यक (३, १, २७)"—इति यकि कृतमिति भाव ।

सुता च हे इन्द्र! त्वं "सुवीर्यस्य" शोभन-वीर्योपेतस्य [यद्वा, वीरे पुत्रे भवं वीर्यं, सुपुत्रवतः] "गोमतः" गवादि-पशुमतः "रायः" धनस्य दानेन अस्मान् "पूर्धि" पूरय। एतत्सामर्थ्यं कुतइत्यतआह—त्वं "महान्" गुणाधिकः श्रेष्ठश्च "असि" भवसि खलु ॥ १ ॥

अथ द्वितीया।

१ २ ३ १ १ ३ १ २ ३ १ २८
यस्तइन्द्रनवीयसीङ्गिरस्वन्द्रमजीजनत्।

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ १
चिकित्विन्मनसन्धियम्प्रत्नामृतस्यपिप्युषीम्॥ २ * ॥

हे "इन्द्र!" "यः" यजमानः "नवीयसीं" नवतरां † पुनःपुनः क्रियमाणतया "मन्द्रां" मदकरीं "गिरं" स्तुति-लक्षणां वाचं "ते" त्वदर्थम् "अजीजनत्" उदपीपदत् अकार्षीदित्यर्थः। तस्मै "स्तोत्रे" त्वं "प्रत्नां" पुरातनीम् ‡ "ऋतस्य" सत्यस्य¶ सम्बन्धि [यद्वा तृतीयार्थे षष्ठी (३, ३, ६३)] सत्येन "पिप्युषीं" प्रवृद्धां ["सिलङ्याजोश्च (६, १, २९)"—इति प्यायतेः पी-भावः] तादृशः "चिकित्वित् मनसं" ['कित ज्ञाने' असो रूपम्, आकारस्येकारश्छान्दसः] चिकित्वांसि ज्ञानानि

---

* ऋ० वे० ६, ६, २०, ६।

† 'नवीयसीं—नवतरां मृदुपदवर्णस्वरोदाहरणयुक्ताम्'—इति वि०।

‡ 'ऋग्यजुःसामलक्षणाम्'—इति वि०।

¶ 'ऋतस्य पिप्युषीं—ऋतो यज्ञः अथवा ऋतमन्नम् अथवा ऋतः प्रजापतिः अथवा ऋतं सत्यं परं ब्रह्म, तस्य पिप्युषीं पोषणसमर्थाम्'—इति वि०।

सर्वेषां हृदयानि यथेति अभयङ्क्रियमाणं यत्तव रक्षणं तत् सर्वेषां हृदयं प्रज्ञापयतीति । ततः अतीन्द्रियार्थदर्शिकं "धिय" : त्वदीयं रक्षणाख्यं कर्म तस्मै कुरु ॥

"यस्मइन्द्र"-"इन्द्रयस्मे"—इति व्यत्ययेन पाठो ॥ २ ॥

अथ तृतीया ।

१२ २१८ २१२२ १२ १२ .
तमुष्टवामयज्ञियइन्द्रमुक्थयानिवावृधुः ।
२१२ ३१ २ १२
पुरूण्यस्यपौंस्यासिषासन्तोवनामहे ॥ २ * ॥ १८

॥ इति द्वितीयः प्रपाठकः ॥

ऋषयः "तम्" परस्परमाहुतं पूर्वोक्तलक्षणम् "उ"—इत्यवधारणे तमेव "इन्द्रम्" "स्तवामः" स्तुतिभिः स्तुमः "यम्" इन्द्रं "गिरः" अस्माकं स्तुतयः "उक्थ्यानि" शस्त्राणि च "वावृधुः" प्रावर्धयत् तं स्तुमः ; ततो वयम् "अस्य" इन्द्रस्य "पुरूणि" बहूनि "पौंस्यानि" वीर्याणि "सिषासन्तः" ['षण सम्भक्तौ' सनीड्भावपक्षे आत्वे कृते रूपं. "सनोतेरनः (८, ३, १०८)"—इति सांहैतिकं षत्वम्] तानि वीर्याणि सम्भक्तुमिच्छन्तः सन्तो "वनामहे" तमिन्द्रं स्तुतिभिः सम्भजामहे ॥ ३ ॥

---

* ऋ० वे० ६, ६, २१, १ ।

५ २ १ ४ ५ ४ ५ २ १ २ १
॥ तैरश्वम् ॥ अुधीहाइवन्तिरश्वियाः। इन्द्रायत्वा।

२ २ ७ १ ५२ ३ २ ७ ५ १
सपर्य्यताइ३४यि। सुवी। रिया। स्याइ३४गो। मा

१ ७ २ २ ४
ताइः। रायास्यूर्ईइ। हाइहायि। महा५ँअसी ॥(१)

५ २ ४ ५ ४२ ५ २ १ २ १ २ ३२
यस्त्वाइयिन्द्रनवीयसायिम्। गिराम्मन्द्राम्। अजी

२ १ ५ ३ २ ७ ५ १
जनाइ३४त्। चिकि। त्विन्मा। नाइ३४साम्। धाया

१ २ २ २ ४
२म्। प्रत्नामार्त्ताइ। हाइहा। स्यपाऽ५यिष्पुषीम् ॥(२)

५ २ ४२ ५ ५ ५ २ १ २ १ २ ३२ २ १
तमुष्टाइवामयङ्गिराः। इन्द्रामुक्था। निवावृधूइ३४ः।

५२ ७ २ ७ ५ ७ १ २
पुरू। णिया। स्याइ३४पौ। साया२। सिषासान्ताइः।

२ २ ४ ४
हाइहायि। वनाऽ५महायि। होऽ५ईं। डाइ३) ॥ ७ *॥ [१]

१ २ २ २ १ २ ३
॥ वारवन्तीयम् ॥ अुधीहवाओहोहायि। ताईरश्वाइ३

५ २ २ १ ५ १ २ १ २
४याः। इन्द्रयत्वासपर्य्यातोइ३४हायि। सुवीर्य्यस्यगो

---

* ऋ० मा० २प्र० २अ० ७सा०।

२ ३२४३ ५ १ १ ५ २ २ ५
मा३४। औहोवा। इहा२३४हायि। उङ्खवा२३४ताः।

५२ १ २२ १ ७ २ २ ३२ ४२ ५ १ १
रायस्पू। धायिमहाएआ३४। औहोवा। इहा२३४

५ ३२ २ ५२ ५ २
हायि। औहो३१२३४। सायि। एहियाईहा ॥(१) य

२ २ १ २ २ ५ २ २
स्तइन्द्राऔहोहायि। नावीया२३४सायिम्। गिरआ

२ २ १ ५ १ २ ५२
न्द्रामजीजानो२३४हायि। चिकित्विन्मनमन्धा३४। औ

४२ ५ १ १ ५ २ ७ ५ २ १२ २
होवा। इहा२३४हायि। उङ्खवा२३४याम्। प्रत्नाम्ट।

१ ७ २ ३२ ४२ ५ १ ३ ५ ३२ २
तास्यपिप्यू३४। औहोवा। इहा२३४हायि। औहो

५२ ५ २ २ १ २
३१२३४। षीम्। एहियाईहा ॥(२) तमुष्टवाऔहोहा

२ ५ २ २ २ १
यि। मायङ्गा२३४यिराः। इन्द्रमुक्थानिवावार्ध्वो२ ३ ४

५ १ २ २ २ २२ ४२ ५ १ ३
हायि। पुरुष्यस्यपौएसा३४। औहोवा। इहा२३

५ २ ३ ५ २ १२ २ १ ७ २ २ ३२
४हायि उङ्खवा२३४या। सिषास्। तोवनामा३४। औ

४र ५ १ २ ५ ३र २ ५र
ह्वोवा । इ ह्वा२३४ ह्वायि । औ ह्वो३१२३४ । ह्वायि । इ

५ ५
ह्वियाईहा । ह्वोपुई । डा(३) ॥ १४ * ॥ [२] १९

इति सामवेदार्थप्रकाशे उत्तराग्रन्थस्य चतुर्थाध्यायस्य
षष्ठः खण्डः † । ६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः ॥ ४ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तराग्रन्थे चतुर्थोऽध्यायः ‡ ॥

---

* क० गा० १२प्र० १ब० १४सा० ।

† 'तृतीयखण्डः समाप्तः' इति वि० ।

‡ द्वितीयश्च प्रपाठकः समाप्तः'—इति वि० मूल-पदकारादि-सम्मतश्चेति-भ्रमः ।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थं-महेश्वरम् ॥ ५ ॥

॥ अथ पञ्चमाध्यायः आरभ्यते* ॥

तत्र,

प्रथमे खण्डे प्रतम्राश्विनीरिति† तृचं प्रथमं सूक्तम्,

तत्र प्रथमा—

२ ३ १ २ २ १ २
प्रतम्राश्विनीःपवमानधेनवो

३ १ २ ३ १ २ ३ १ २
दिव्याअसृग्रन्पयसाधरीमणि ।

१२ २२ २ १ २ ३
प्रान्तरिक्षान्त्स्थाविरीस्तेअसृक्षत

१ २ ३ १ २ २ १ २
येत्वाम्रुजन्त्यृषिषाणवेधसः ॥ १ ‡ ॥

हे "पवमान" सोम! "ते" तव "आश्विनोः" व्याप्तः ['अशू व्याप्तौ (स्वा० आ०)' तस्मादौणादिको विनिः, ततोऽङ्, व्यत्ययेनाद्युदात्तः] "धेनवः" प्रीणयित्र्यः "दिव्याः" दिवि भवाः

---

* 'अथ चतुर्थस्याऽरारभ्यते द्वितीयखिलराजः । प्रकृतच्छन्दाः प्रथमखिलराजः । अथोत्तरस्य छन्दांसि बृहत्यि जगत्यः प्रतिपदः, जगती-स्थाने त्रिष्टुभः, त्रिष्टुभां गा प्रचाराः'—इति वि० ।

† "एषा चतुर्थस्य प्रतिपत्"—इति वि० ।

‡ ऋ० वे० ७, ३, १२, ४ ।

दिवः पतन्त्यो धाराः "पयसा" युक्ताः * "धरीमणि" धारके द्रोणकलशे† "प्र असृक्षत" गच्छन्ति "ये" "वेधसः" विधातारः ऋत्विजः हे सोम ! "ऋषिषाण" ऋषिभिः सम्भक्तत्वात् "त्वा" त्वाम् "मृजन्ति" अभिषुण्वन्ति, "ते" वेधसः "स्थाविरीः" स्थविरा धारा"‡ "अन्तरिक्षात्" सकाशात् "प्र असृक्षत" पात्रं प्रति सृजन्ति ॥

"धेनवे"-"धीजुवी"—इति पाठौ, "प्रान्तरिक्षात्स्थाविरीस्तेअसृक्षत"-"प्रातर्ऋषयःस्थाविरीरसृक्षत"—इति च ॥ १ ॥

अथ द्वितीया ।

१ २ ३ १ २ ३ १ २
उभयतःपवमानस्यरश्मयो

३ १ २ ३ १ २ २ ३ १ २
ध्रुवस्यसतःपरियन्तिकेतवः ।

१ २ ३ २ ३ १ २ ३ २ १ २ ३
यदीपवित्रेअधिमृज्यतेहरिः

२ ३ १ २ २ १ २
सत्तानियोनौकलशेषुसीदति ॥ २ ¶ ॥

"पवमानस्य" पूयमानस्य "ध्रुवस्य" स्वयमविचलितस्य "सतः" विद्यमानस्य सोमस्य "केतवः" प्रज्ञापका रश्मयः "उभयतः" इतश्चामुतश्च "परियन्ति" परितो गच्छन्ति अभिषव-

---

* 'पयसा—तृतीयैकवचनमिदं प्रथमाबहुवचनस्य स्थाने द्रष्टव्यम् पयांसि'—इति वि० । † 'धरीमणि—यज्ञे'—इति वि० ।

‡ 'स्थाविरीः स्थिराः स्थूला वा स्थविरीर्वा गावः रश्मयः'—इति वि० ।

¶ ऋ० वे० ७, ३, १२, १ ।

समये एवं भवति। "यदि" यदा "पवित्रे"* इत्यापवित्रे "हरिः" हरितवर्णोऽयं सोमः "अधि मृज्यते" तदानीं "सत्ता" सदनशीलोऽयं "योनौ"† योनिषु स्थानेषु "कलशेषु" द्रोणकलशादिषु पात्रेषु "निषीदति" निषण्णो भवति॥

"योनौ"--"योना"—इति च पाठौ॥ २॥

अथ तृतीया।

२ ३ १ २ ३ १ २
विश्वाधामानिविश्वचक्षऋभ्वसः

३ १ २ ३ १ २ २ २ १ २
प्रभोष्टसतःपरियन्तिकेतवः।

३ १ २ २ १ २ ३
व्यानशीपवसेसोमधर्मणा

२ ३ १ २ ३ १ २
पतिर्विश्वस्यभुवनस्यराजसि॥ ३ ॥ १

हे "विश्वचक्षः" सर्वस्य द्रष्टः! सोम! "प्रभोः" परिवृढस्य "मतः" "ते" तव "ऋभ्वसः" "[ऋभ्वा"—इति महन्नामसु महान्तः "केतवः" रश्मयः "विश्वा" विश्वानि सर्वाणि

---

* 'पवित्रे अधि—सप्तम्येकवचनमिदं प्रथमैकवचनस्य स्थाने द्रष्टव्यम्, पवित्रादधि'—इति वि०।

† 'नितरां योनिर्नियोनिः, अथवा नौचैः स्थिता पवित्रस्य योनिर्नियोनिः, तस्मिन् नियोनौ'—इति वि०।

‡ ऋ० वे० ७, ३, १२, ५।

¶ सायणमतेऽदः पदं निघण्टौ मह्नामसु (३, १) पाठभेदेन पठ्यते। विवरणकारस्तु 'ऋभ्वसः—प्रभुत्वस्य'—इति व्याचष्टे।

"धामानि" तेजः-स्थानानि देव-शरीराणि* "परियन्ति" परितो गच्छन्ति प्रकाशयन्तीत्यर्थः। हे "सोम!" "व्यानशी" व्यापनशीलस्त्वं "धर्मणा" धारकेण रसनिष्यन्देन "पवसे" पूयसे। किञ्च "विश्वस्य भुवनस्य" "पतिः" स्वामी त्वं "राजसि" ईश्वरो भवसि† ॥

"प्रभोष्टेसतःपरियन्ति"-"प्रभोस्तेसतःपरियन्ति"—इति पाठौ, "व्यानशी"-"व्यानशि"—इति, "धर्मणा"-"धर्मभिः" —इति च ॥ ३ ॥ १

॥ लौशाद्यम् ॥ प्रतत्रास्वि। नीःपवमा२३। नाऽधे
२ २ ३र ५ १र ४ २र
नवः। दिव्याऽसद्। ग्यन्पयसा२३। धाऽरीमणि। प्रा
२ ५ ३ २र ३ ५ १ ४ २र ३ ५ १र
न्तरिक्षात्। स्थाविरीस्ते २ ३। आऽसद्यत। येत्वाम्
२ ३ ५र १र र ४ २ ३ ५ ३र २ १
जा। तिक्तऽषिषा२३। णवाऽयिधा५स्वा६५६ः ॥(१) उभ
५ १ २ ४ २ १
यतः। पवमाना२३। स्वाऽरश्मयः। ध्रूवस्यस। तः
३ १ र ४ २ १ ५ १ १ ३ ५ १
परियाऽइ। तीऽकेतवः। यदीपवि। त्रेऽअधिमा२३।
४ २र ३ ५ ३ २र १ ५ १र

---

* 'विश्वा धामानि—विश्वानि स्थानानि जन्मानि नामानि वा'—इति वि०।

† 'राजसि—दीप्यसे सोमसे वा'—इति वि०।

४ २र ३५ २ २र ३ ५ १र २
व्या३तेद्धरिः। सत्तानियो। नौकलमा२३य। घुसा३

२ २र ३र५र १
यिदा५ता६५६यि ॥(२) विश्वाधामा। निविश्वचा २३।

४ २ ३ ५ ३ २र ३र५ १ ४ २र १ ५
वा३क्षुभ्वसः। प्रभोष्टेस। तःपरिया२३। तौ३केतवः।

२ १र ३ ५र १ र ४ २ १ ५र १ २ ३ ५
वियानशो। पवसेसो२३। मा३धर्मणा। पतिर्विश्वां।

१ २ ४
स्यभुवना२३। स्वरा३जा५सा६५६यि(३) ॥ २ * ॥ [१].

अथ द्वितीयर्चे—प्रथमा।

१ २ २ २ ३ १र २र १ २
पवमानोअजीजनद्दिवश्चित्रन्नतन्द्यातुम्।

१ २ ३ २ ३ २
ज्योतिर्वैश्वानरंबृहत् ॥ १ † ॥

"पवमानः" पूयमानः सोमः "बृहत्" महत् "वैश्वानरं" वैश्वानराख्यं "ज्योतिः" तेजः "दिवः" द्युलोकस्य "चित्र" विचित्रं "तन्यतुं न" अग्निमिव "अजीजनत्" अजनयत् ॥ १ ॥

---

* ऋ० मा० ८प्र० २अ० २सा०।

† ऋ० मा० ५, १, ५, ८ (२भा० ३८ पृ०)=ऋ० वे० ७, १, ११, १।

अथ द्वितीया ।

१ १ ३ १ ३ १ २ १ ३ ३ २
पवमानरसस्तवमदोराजन्नदुक्छुनः ।

२उ २
विवारमव्यमर्षति ॥ २ * ॥

हे "राजन्" दीप्यमान ! "पवमान" पूयमान ! सोम ! "तव" त्वदीयः "मदः" मदकरः "अदुक्छुनः"† रक्षोवर्जितः "रसः" "अव्यम्" अविमयं "वारं"‡ वालं दशापवित्रम् "विअर्षति" अभिगच्छति ॥

"पवमानरसस्तव"-"पवमानस्यतेरसः"—इति पाठौ ॥ २ ॥

अथ तृतीया ।

१ २ ३ २ ३ २ ३ १ २ ३ २
पवमानस्यतेरसोदक्षोविराजतिद्युमान् ।

१ ३ २ ३ २र ३ २
ज्योतिर्विश्वꣳस्वर्दृशे ॥ ३ ¶ ॥ २

हे सोम ! "पवमानस्य" "ते" त्वदीयः "रसः" "दक्षः" § "द्युमान्" दीप्तिमान्‖ "विराजति" प्रकाशते**। न केवलं

---

* ऋ० वे० ७, १, २१, २ ।

† 'दुक्छुनः दुष्टजनः, न दुक्छुनः अदुक्छुनः'—इति वि० ।

‡ 'विवारं—वि-वृञ्आवरणे ण, वारं=वालम्'—इति वि० ।

¶ ऋ० वे० ७, १, २१ ३ ।

§ 'दक्षः शीघ्रगामी, अथवा दक्षरक्षणक्रियायाः कर्म'—इति वि० ।

‖ 'द्युमान् द्युलोकवान्'—इति वि० ।

** 'विविधं दीप्यते शोभते वा'—इति वि० ।

स्वयमेव प्रकाशते किन्तु "विश्वं" व्याप्तं *"स्वः" सर्वं "ज्योतिः" तेजः "दृंहे" द्रष्टं करोतीति शेषः† ॥

"पवमानस्यतेरसः"-"पवमानरसस्तव"—इति पाठौ ॥३॥२.

१ २र र १ २
॥ सꣳहितम् ॥ पवमानोऽअ। जा२यिजनात्। दि
१ २ १ १ २
वा२ः। चा२३यिचाम्। नता२न्याढम्। ज्यो२३तीः।
१ ७ २ ५
वा२यिश्वा। नरा२३म्। ह्वाउवाइ। ब२३४ह्वात् ॥(१)
१ २र १ २ १ २ १
पवमानर। सा२स्तवा। मदो२। रा२३जान्। अ
१ २ १ ७
दू२च्छू नाः। वा २ ३ यिवा। रा२मा। व्यमा २ ३।
२ ५ १ २र १०
ह्वाउवाइ। षा२३४ती ॥(२) पवमानस्य। ता२यिरसाः।
२ १ १ १ १
दक्षो२। वा२३यिरा। जता२यिद्यूमान्। ज्यो २ ३-
२ १ ७ २
तीः। वा२यिश्वाम्। सुवा२३। ह्वाउवा ३। ह२३४
५
ग्मे(३) ॥ १२ ॥ [१]

---

* 'विश्वं सर्वम्'—इति वि०।

† 'स्वर्दृंहे—स्वर्गलोकस्य गमनाय ; न केवलं स्वर्गलोकस्य, सर्वस्य जगतो दर्शनायेत्यर्थः'—इति वि०।

‡ ऋ० गा० १२म० १ऋ० १२सा०।

॥ जरावोधीयम् ॥ पवमानोवा। आजीजनात्।
दिवाश्वा२३यिचाम्। नतन्यातूम्। ज्योतायिर्वा१यि
श्वा२३ना। रम्। बृहदो३४५ई। डा ॥(१) पवमानोवा।
रास्तत्वा। मदोरा२३जान्। अदुच्छूनाः। विवारा
१मा२३व्याम्। अ। षतो३४५ई। डा ॥(२) पवमानो
वा। स्यातेरसाः। दक्षोवा२३यिरा। जतिद्यूमान्।
ज्योतायिर्वा १ यिश्वा २ ३ए॒सू३। वः। हशो ३ ४ ५ ई।
डा(३) ॥ ८ * ॥ [२]

॥ औपगवोत्तरम् ॥ पवमा३नोअजीजनात। दिवश्चि
च्चतन्यत्वम्। ज्योती२। द्यौ२। ऊवा २ ३ यि।
वा३४यिश्वा। नरम्बृहात् ॥(१) पवमा३नरस्तत्वा। मदो
राजन्नदुच्छुनाः। विवौ२। द्यौ२। ऊवा२३यि। रा

---

* ऋ० गा० १८प्र० १अ० १८सा०।

५ २ १ २ ५ ५ ४ ५२ १ २
३४मा। व्यमर्षायायि ॥(२) पवमाऽनस्यतेरसाः। दक्षो

२ २ १
विराजतिद्यु,मान्। ज्योती२। द्यौ२। ऊवा२३यि।

२ ५ २ १ २ २ १ २
वाऽ४यिस्वाम्। सुवर्दुशायि। ऐ। द्या२ए२३। हिया

५२ २ २ १२ १११
३४मौद्दोवा। ए३। उपा३१२३४५(३) ॥ ९ * ॥ [३] २

अथ प्रयद्गावइति षड्चं तृतीयं सूक्तम्,

तत्र प्रथमा।

२७ ३१ २२ २२ २२ ३ १२
प्रयद्गावोनभूर्ण्यस्त्वेषाऽअयासोऽअक्रतुः।

१२२ २३ २१२
घ्नन्तःकृष्णामपत्वचम्॥ १ †॥

"यत्" ये अभिषुताः सोमाः "गावः न" उदकानीव [तानि यथा तूर्णमधः पतन्ति तद्वत्; गाव एव वोपमीयन्ते, ता यथा स्वं गोष्ठं प्रत्याशु गच्छन्ति तद्वत्; अथवा गावः स्तुतिवचनाः यथा स्तुत्यं प्रति क्षिप्रं प्राप्नुवन्ति तद्वत्], "भूर्णयः" क्षिप्राः, "त्वेषाः" दीप्ताः "अयासः" अयाः गमनशीलाः, "कृष्णं" कृष्णवर्णम् "अपत्वचम्" अपकृष्टां त्वचं "घ्नन्तः" विनाशयन्तः, ईदृग्भूता ये सोमाः "प्र अक्रमुः" तां स्तुम इति शेषः॥

"यत्"-"ये"—इति पाठो॥ १॥

---

* उ० गा० १८प्र० १अ० ९मा०।

† ऋ० मा० ९, १, १, ४ (२मा० ४७पृ०)=सा० वे० ९, ८, २१, १

अथ द्वितीया।

२ १२ २२ ३१२१ क २८
सुवितस्यवनामहेतिसेतुन्दुराय्यम्।

२ २ २१ २ ३२
साह्वामदस्युमव्रतम्॥ २*॥

"सुवितस्य"† शोभनं प्राप्तस्य सोमस्य सम्बन्धिनम् "अति-सेतुम्"‡ रक्षोविषयं बन्धनं "वनामहे"¶ सोमकर्तृकं रक्षसां बन्धनं स्तुमइत्यर्थः। कीदृशम्? "दुराय्यम्" दुष्प्रापणीयम्§ किञ्च "अव्रतम्" यज्ञादि-कर्म-रहितं "दस्यु"॥ यत्र "साह्वाम" अभिभवेम॥

"दुराय्यं"-"दुराव्यं","साह्वाम"-"साह्वांस"—इति पाठाः॥२॥

अथ तृतीया।

२ २२१२ ३१२ २२ २ १२
शृणवेवृष्टेरिवस्वनःपवमानस्यशृण्विणः।

१२ २१२ २ २
चरन्तिविद्युतोदिवि॥ ३**॥

"शृणवे" श्रूयते। कः? "स्वनः"। किमिव? "वृष्टेः"

---

* ऋ० वे० ९, ८, २१, २। "मनामहे"—इति च तव क्वचित् पाठः।

† 'सुवितस्य—अभिषुतस्य'—इति वि०।

‡ 'अतिसेतुं—मर्य्यादां त्यक्त्वा अतिस्वच्छधानतया'—इति वि०।

¶ 'वनतिः स्तुतिकर्मा, स्तुतिं कुर्मः'—इति वि०।

§ 'दुराय्यं'—दुर्वार्यम्, अथवा दुराप्यं दुस्साध्यम्"—इति वि०।

‖ 'व्रत-वर्जितम्'—इति वि०।

** ऋ० वे० ९, ८, २१, ३।

वर्षणस्य स्वनइव [तस्य यथा महान् स्वनः श्रूयते तद्वत् प्रभूत-रस-पात-समये श्रूयते]। कस्य स्वन इति ? तत्राह—"पव-मानस्य" पूयमानस्य "शुष्मिणः" बलवतः तस्यैव "विद्युतः" दीप्तयः* "दिवि" अन्तरिक्षे चरन्ति ॥ ३ ॥

अथ चतुर्थी।

१ २ ३२३ ३ १ २ ३ १ २

आपवस्वमहीमिषङ्गोमदिन्दोहिरण्यवत्।

अश्ववत्सोमवीरवत् ॥ ४ † ॥

हे "इन्दो!" "सोम!" अभिषुतः त्वं "महीम् इषम्" महदन्नम् "आ पवस्व" ‡। कीदृशम् अन्नम्? "गोमद्" गोभि-र्युक्तम्, "हिरण्यवत्" सुवर्णोपेतम्, "अश्ववत्" अश्वोपेतम्, "वीरवत्" पुत्रयुक्तम् ॥

"अश्ववत्सोमवीरवत्"-"अश्वावद्गाजवत्सुतः"—इति पाठौ॥४॥

---

* 'विद्युतः—विद्युत्संयुक्तस्य'—इति वि०।

† ऋ० वे० ९, ८, ३१, ४।

‡ 'आपवस्व महीमिषम्'—आभिमुख्येन पवस्व महतीमिष वृष्टिमन्नं वा'—इति वि०।

अथ पञ्चमी।

१ २ ० २ ३ १ १२
पवस्वविश्वचर्षणआमद्द्यावापृथिवीपृण।

२ २उ ३ २ ३ १ २
उषाःसूर्योनरश्मिभिः॥ ५ *॥

हे "विश्वचर्षणे" विश्वस्य द्रष्टः सोम! स त्वं "पवस्व" क्षर रसम्। तथा कृत्वा तेन रसेन "मही"† "द्यावापृथिव्यौ "आ पृण" आ पूरय। "उषाः" उषसः [एकदेशवाचिनोषःशब्देनाहान्युपलक्ष्यन्ते तत्प्राधान्यात्] अहानि "रश्मिभिः" "सूर्योन" सूर्यइव॥

"पवस्वविश्वचर्षणे"-"पवस्वविश्वचर्षण"—इति पाठौ॥ ५॥

अथ षष्ठी।

१ २ २ २ ३ १ २ ३ १ २
परिनःशर्मयन्त्याधारयासोमविश्वतः।

१ २ ३ १ २ ३ १ २
सरारसेवविष्टपम्॥ ६ ‡॥ ३

हे सोम! "नः" अस्मभ्यं "शर्मयन्त्या" सुखयन्त्या धारया¶ "विश्वतः" सर्वतः "परि सरा" परिसर परिचर। "रसेव"

---

* ऋ० वे० ९, ८, २१, ५।

† 'मही—महती'—इति वि० महत्यौरित्यर्थः।

‡ ऋ० वे० ९, ८, २१, ६।

¶ 'शर्मयन्त्या—शर्म-सुखं, तद्भावयन्त्या धारया'—इति वि०।

रसेनेव "विष्टपं" भूलोकं* [यद्वा रसा नदी स्थानं सा प्रवणरूपमिव] ॥

"परिनः"-"परिणः"—इति पाठो ॥ ६ ॥ ३

इति सामवेदार्थ-प्रकाशे उत्तरायण्यस्य पञ्चमाध्यायस्य प्रथमः खण्डः ॥ १ ॥

अथ द्वितीय खण्डे—

आशुरर्षेति षड्चं प्रथमं सूक्तम्, तत्र प्रथमा।

३ १ २ ३१२ ३१३१ २
आशुरर्षबृहन्मतेपरिप्रियेणधाम्ना।

१ २१ २उ १ १ २
यत्रदेवाइतिब्रवन्॥ १† ॥

हे "बृहन्मते"‡ महामते सोम! "प्रियेण" देवानां प्रियतमेन "धाम्ना" शरीरेण¶ "धारया" "आशुः" शीघ्रः सन्

---

* 'विष्टपं स्वर्गं लोकम्,—इति वि०।

† ऋ० वे० ९, ८, २९, १। "ब्रुवन्"—इति मु०पाठः, ऋग्वेदे च क्वचित् पाठः

‡ 'बृहन्मते—बृहद्बुद्धे'—इति वि०।

¶ 'परिप्रियेण—परि समन्तात् प्रियेण धाम्ना प्रियेण स्थानेन'—इति वि०।

"पर्यृष" परिगच्छ, "यत्र" "देवाः" इन्द्रादयः वर्त्तन्ते—"इति" "ब्रुवन्" उच्चारयन्, तं देशं गच्छामीति ब्रुवन्नित्यर्थः ॥ १ ॥

अथ द्वितीया।

१ १र २र ३ १ २ २ २ १ २
परिष्कृण्वन्ननिष्कृतञ्जनाययातयन्निषः।
३ २ ३ १ २र
वृष्टिन्दिवःपरिस्रव ॥ २ * ॥

*"अनिष्कृतम्" असंस्कृतम् † यजमानं स्थानं वा "परिष्कृण्वन्" संस्कुर्वन् "जनाय" "इषः" अन्नानि "यातयन्" ‡ निर्गमयन् "दिवः" अन्तरिक्षात् "वृष्टिं" ¶ "परि स्रव" ॥ २ ॥

अथ तृतीया।

३ २ख ३ १र २र ३ १ ५ ७ २ १ २
अयꣳसयोदिवस्परिरघुयामापवित्रआ।
१ २ ३ १ २र
सिन्धोरूर्म्माव्यक्षरत् ॥ २ § ॥

"सः" "अयं" सोमः "पवित्रे आ" सिच्यमानः [—इति

* ऋ० वे० ९, ८, २९, २।

† 'अनिष्कृतम्—आभिमुख्येन निष्कृतम्'—इति वि०। इदं खेनचिन्त्यमत्र अर्थे आभिमुख्यं कृतो लभ्यतइति।

‡ 'यातयन्'—प्रापयन्—इति वि०।

¶ मुद्रित-मूले तु "वृष्टिम्"—इति पाठः ऋग्वेदेऽपि तथा।

§ ऋ० वे० ९, ८, २९, ३।

शेषः *] "सिन्धोः" जलस्य † "ऊर्मा" ‡ ऊर्मौ सङ्घाते "वि अचरन्" विविधं चरति । स इत्युक्तम्, कः ? इत्याह— "यः" "दिवस्परि" द्युलोकस्योपरि "रघुयामा" लघुगमनः ¶ देवप्रापी, सोयमिति सम्बन्धः ॥ ३ ॥

अथ चतुर्थी ।

३ १ २ ३ २ १ २उ ३ १ २ ३ १ २

सुतएतिपवित्रआत्विषिन्दधानओजसा ।

३ १ १ ३ १ २

विचक्षाणोविरोचयन् ॥ ४ § ॥

"सुतः" अभिषुतः सन् "पवित्रे" दशापवित्रे ["आ" —इत्यनर्थकः] "ओजसा" बलेन "शीघ्रम्" "एति" गच्छति । कौट्टशः सन् ? "त्विषिं" दीप्तिं "दधानः" धारयन्, "विचक्षाणः" सर्वं पश्यन्, ‖ "विरोचयन्" दीपयंश्च ; किम् ? देवानिति शेषः ॥ ४ ॥

---

* 'पवित्रे—अधिकरण-सप्तम्यर्था ; पवित्रे अधिकरणभूते । आ-इत्यव्ययमुपसर्गः अचरदित्याख्यातेन सम्बन्धयितव्यः ; आ अचरत्'—इति वि० ।

† 'सिन्धोः—समुद्रस्य नदीनाञ्चोदकस्य वा'—इति वि० ।

‡ 'ऊर्मयः सङ्घाताः'—इति वि० । ऊर्मा इति तृम्प्रिप्रत्ययस्य सुपां सुलुगिति सुपो डादेशे ङि-लोपे रूपम् ।

¶ 'रघुशब्दो लघुवाची'—इति वि० ।

§ ऋ० वे० ९, ८, २९, ४ ।

‖ 'विचक्षाणः—विविधं पश्यमानः अर्थं वा विश्वं जगत् पश्यमानः'—इति वि० ।

अथ पञ्चमी।

३ १ १ २ २ २ १ २ ३ १ २ २
आविवासन्परावतोऽथोऽअर्वावतःसुतः।

१ २ ३ १ २
इन्द्रायसिच्यतेमधु ॥ ५ * ॥

"सुतः". अभिषुतः सोमः "परावतः" [दूरनामैतत् †] दूरस्थान् "अथो" ‡ अपिच "अर्वावतः" अन्तिकस्थांश्च ¶ देवान् "आ विवासन्" रसेन परिरक्षणायेत्यर्थः। "इन्द्राय" इन्द्रार्थम् "मधु" मधुमद्रसः सोमः "सिच्यते"॥ ५॥

अथ षष्ठी।

३ १ २ ३ १ २ ३ १ २
समीचीनाऽअनूषतहरिꣳहिन्वन्त्यद्रिभिः।

२ ३ १ २ ३ १ २
इन्दुमिन्द्रायपीतये ॥ ६ § ॥ ४

"समीचीनाः" सम्यगञ्चिताः सङ्गताः स्तोतारः ‖ "अनूषत" स्तुवन्ति किञ्च सोमं "हरिं" हरितवर्णं "हिन्वन्ति"

---

* ऋ० वे० ६, ८, २९, ५।

† "परावतः"—इति निघण्टौ तृतीय-षड्विंशे दूरनामसु पञ्चमत्वेन पाठात्।

‡ "अथ उ"—इति वि०।

¶ अन्तिक-नामसु "अर्वाके"—इति पाठात् (निघ० २, १६, ८)।

§ ऋ० वे० ६, ८, २९, ६। "योनावृतस्यसीदत"—इति मत्र तृतीयः पादः।

‖ 'समीचीनाः—आसन्नवर्त्तिनः'—इति वि०।

प्रेरयन्ति गमयन्ति "अद्रिभिः" यावभिः । किमर्थं हिन्वन्ति ? "इन्दुं" सोमम् "इन्द्राय" इन्द्रस्य "पीतये" पानाय ॥ ६ ॥ ४

अथ ह्रचात्मके द्वितीयसूक्ते—प्रथमा ।

३ २ ३ २ २ ३ १ २ ३ १ २ ३ २ ३ १ २

हिन्वन्तिसूरमुस्रयःस्वसारोजामयस्पतिम् ।

३ १ ३ २ ३ १ २

मह्यामिन्दुम्महीयुवः ॥ १ * ॥

"उस्रयः" कर्मार्थं निवसन्त्यः सर्वत्र गन्त्र्य इत्यर्थः, "जामयः" एकस्याः पाणेः उत्पन्नत्वात् परस्परं बन्धुभूताः, "स्वसारः" [अङ्गुलि-नामैतत् (निघ० २, ५, १२)। सुष्ठु कर्मसु प्रेर्यन्ते ऋत्विग्भिरिति स्वसारः] अङ्गुलयः, "महीयुवः" सोमाभिषवं कामयमानाः सन्तः "सूरं" सुवीर्यं [सोमे पीते वीर्यं भवतीति ; शोभनं वीर्यं कारणं वा, सर्वेषां कर्मणि प्रेरकं वा, तादृशम्] "पतिम्" सर्वस्य स्थावर-जङ्गम-जातस्य स्वामिनं, यस्माद् देवार्थमिज्यतेऽतएव "मह्याम्" देवेभ्यो दीय-मानत्वेन महान्तं मंहनीयं वा "इन्दुम्" ग्रहेषु स्यन्दमानं सोमं "हिन्वन्ति" प्रेरयन्ति ["हिवि प्रीति-गत्योः (स्वा० प०)"—इति धातोरेतद्रूपं स्वादि] † ॥ १ ॥

---

* ऋ० वे० ७, २, १, १ ।

† 'हिन्वन्ति सूरम् उस्रयः = सेवयन्ति सूर्यम् आदित्यरश्मयः । स्वसारः जामयः पतिम् = स्वसारः भगिन्यः जामयः आदित्यरश्मयः ; यथा परस्परं भगिन्यः एकस्यैव भर्तुः अहमहमिकया सेवां कुर्वन्ति, तद्वदादित्य-रश्मयः अहमहमिकया आदित्यं सेवन्ति । एवं, मह्यामिन्दुम्महीयुवः = महिमानमिच्छन्त्यः सोमरश्मयः उदकानि वा'—इति वि० ।

अथ द्वितीया।

१ १ २ १ १ २ १ २ १ १ २ १ २ २
पवमानरुचारुचादेवदेवेभ्यःसुतः।

२ ३ २ २ १ २
विश्वावसून्याविश ॥ २ * ॥

हे "पवमान" दशापवित्रेण पूयमान ! [यद्वा पुनान शुद्ध !] सोम ! "रुचारुचा" ["रुच दीप्तौ (भ्वा० आ०)] सर्वेण तेजसा हे "देव" दीप्यमान ! "देवेभ्यः" देवार्थं "सुतः" अभिषुतः त्वं "विश्वा" व्याप्तानि सर्वाणि बहूनि "वसूनि" धनानि "आ विश" अस्मात् प्रापय [यद्वा सर्वाणि "वसूनि" वासस्थानानि ग्रहादीनि† "आविश" समन्तात् प्रविश] ॥

"देवेभ्यस्सुतः"--"देवेभ्यस्परि"—इति पाठौ ॥ २ ॥

अथ तृतीया।

१ २ ३ २ ३ २ ३ १ २
आपवमानसुष्टुतिंवृष्टिन्देवेभ्योदुवः।

३ १ २ ३ १ २
इषेपवस्वसंयतम ॥ २ ‡ ॥ ५

हे "पवमान" पूयमान ! पुनान ! वा सोम ! "सुष्टुतिं" ¶

---

* ऋ० वे० ७, २, १, २।

† ग्रह-चमसादीनि यज्ञौपयिकानीति यावत्।

‡ ऋ० वे० ७, २, १, २।

¶ 'सुष्टुतिं—शोभनां स्तुतिम् प्रापयमाणां'—इति वि०

शोभनस्तुति-युक्तां "दृष्टिं" "देवेभ्यः" देवानां "दुवः"* ["सुपां सुलुक् (७, १, ३९)"—इति चतुर्थ्या लुक्] दुवसे परिचरणाय† "आ पवस्व" आ गमय त्वम् [यथा मदीयया स्तुत्या दृष्टिर्भवति तथा कुर्वित्यर्थः] किञ्च अस्माकम् "इषे" अन्नार्थञ्च "संयतं"‡ सम्यगस्मान् सङ्गच्छतीति दृष्टिं कुरु [यद्वा "दुवः" परिचर्यामभिलक्ष्य क्रियमाणां "सुष्टुतिं" शोभन-स्तुति-रूपां दृष्टिं बहुशः स्तुतिमित्यर्थः, एतां देवेभ्यः प्रापय]॥ ३ ॥५॥

॥ विशोविशीयम् ॥ हिन्वाऽऽम्। ताऽयिम्। राऽइ
मूद्धाऽयाः। खसारः। जामाऽऽयाः। ऊम्मायि। पा
ऽताऽयिम्। माऽऽ४ह्वाऽऽह्वायि। ओ। ऊवायि। ई
ऽऽ४न्दूम्। ऊम्मायि। माऽन्दीऽ। यूऽऽ४वाः। एच्छा
याऽऽह्वा ॥(१) पवाऽऽम्माऽना। रुऽचारुऽचा। देवदे।
वायिभाऽऽयाः। ऊम्मायि। सूऽता ऽः। वाऽऽ४यि

---

* 'दुवः—दूरात् द्युलोकात्'—इति वि०।

† "दुवस्यति"—इति परिचरण-कर्मसु पञ्चमं नैघण्टुकम् (२, ५)।

‡ "संयतं—सम्यङ्नियतम्'—इति वि०।

स्वाहायि। ओ। ऊर्वायि। वा२३४सू। ऊम्मा। नो
इयाइ। वा२३४यिष्मा। एह्यिया६हा॥(२) आपाऽम्।
वाऽमा। नाऽसूष्टू३तीम्। वृष्टिन्दे। वायिभा२३याः।
ऊम्मायि। दू३वाऽः। आ२३४यिषेह्वायि। ओ। ऊर्वा
यि। पा२३४वा। ऊम्मा। स्वाऽसाऽम्। या २ ३ ४
ताम्। एह्यिया६हा। हो५ई। डा (३)॥ १० * ॥[१]

॥ ऐडानाऽमङ्कारम्†॥ ओहोयिऊवाऽह्वोयि। हि
न्वन्तिसू३राऽमुषयः। स्वसारोजाऽमाऽयस्पतिम्। म
ह्वामा२३४यिन्दूम्। मह्वीयुवः। इडा२३॥(१) पवमा
नाऽरुऽचारुचा। देवदे३वे३भ्यःसुतः। विश्वावा२३४सू।
नियाविश। इडा२३॥(२) आपवमाऽनाऽस्तुष्टुतिम्।
वृष्टिन्दे३वे३भ्योदुवः। ओह्वोयिऊवाऽह्वोयि। इषायि

* ऊ० गा० ५प्र० १ अ० १०सा०। † "इडामांसंचारः"—इति ख० पाठः।

२ ५ २ १ २ १ २ ४ ५ ४
प्रा२३४वा। स्वसंयतम्। इडा२३भा३। एहीडा। हो

५ई। डा(३) ॥ १० * ॥ [२]५

इति सामवेदार्चप्रकाशे उत्तरायण्यस्य पञ्चमस्याध्यायस्य

द्वितीय खण्डः † ॥ २ ॥

अथ तृतीयखण्डे, ‡ प्रथमर्चे—

प्रथमा।

१ २ ३ १ २ ३ १ २
जनस्यगोपा अजनिष्टजागृवि

३ १ ३ १ २ ७ २ ३ १ १
रग्निःसुदक्षःसुविताय नव्यसे।

१ १ २ ३ १ २ ३ १ २
घृतप्रतीकोबृहताद्दिविस्पृशा

३ १ १ २ १ २ २ ३ १ २
द्युमद्विभातिभरतेभ्यःशुचिः ॥ १ ¶ ॥

"जनस्य" § "गोपा" गोपयिता रक्षिता, "जागृविः"

---

* ऊ० मा० १९प्र० २ख० १०सा०।

† 'उक्तम् बर्हिष्यवमामेकविंशस्तोमिकम्'—इति वि०।

‡ 'इदानीमाज्यानि वक्तव्यानि'—इति वि०।

¶ ऋ० वे० ४, १, ३, १=य० वे० १५, २७।

§ 'जनस्य—यजमानस्य'—इति वि०।

जागरणशीलः सदा प्रबुद्धः, "सुदक्षः" सुबलः सर्वैः श्लाघनीय-बलः, सः "अग्निः" "नव्यसे" नवतराय "सुविताय"* लोकानां कल्याणाय "अजनिष्ट" जातः। ततः "घृत-प्रतीकः"‡ घृतेन प्रज्वलिताङ्गः, बृहता" महता "दिविस्पृशा" द्युलोकं प्राप्नुवता तेजसा युक्तः, "शुचिः" शुद्धः, एवंविधोऽग्निः "भरतेभ्यः" ऋत्विग्भ्यः तत्तदर्थं† "द्युमत्" दीप्तिमत् यथा भवति तथा "भाति" ‖ प्रकाशते¶ ॥ १ ॥

---

* "सुविताय—यजमानजनाय अभिषवकर्त्रे"—इति वि०।

† 'भरताः मनुष्याः ऋत्विजो यज्ञन्ति, तेभ्यः'—इति वि०। "भरताः"—इति ऋत्विङ्नामसु प्रथमं नैघण्टुकम् (३, १८)।

‡ नाच वि-शब्दो व्याख्यातः साधणेन, विवरणकारत्वाद्—'वि=विविधम्'—इति।

¶ अत्र मद्दीधरव्याख्या यथा—"योऽग्निर्भरतेभ्यः ऋत्विग्भ्यः सकाशादजनिष्ट जातः तैर्मथितत्वात्तेभ्यो जात इत्युच्यते। भरता इति ऋत्विङ्नामसु पठितम्। किमर्थं जातः। नव्यसे नवीयसे नवतराय सुविताय सूताय प्रसूताय कर्मणे यागाय सूतरिङागम आर्षः अभिनवं नवीयस्त्वे रलोप आर्षः। सोऽग्निर्दिविस्पृशा द्युलोक-स्पर्शिना बृहता ज्वालासमूहेन यत्कार्ष्णिमयत्या तथा विभाति विविधं दीप्यते। कीदृशोऽग्निः? जनस्य यजमानस्य गोपाः। गोपायति रक्षतीति गोपाः क्विप् लोपीयोर्वलि यलोपः। जागृविः जागरणशीलः कर्मणि सावधानः। सुदक्षः शोभनो दक्ष उत्साहो यस्य अतिक्रमणो वा। घृतप्रतीकः घृतं प्रतीके मुखे यस्य। शुचिः शुद्धः बहूनि हवींषि भक्षयन्नपि उच्छिष्टो न स्यात् शोभको वा॥"—इति।

अथ द्वितीया।

१ १ २ १ २ ३ १ २ ३१८
त्वामग्ने अङ्गिरसोगुहाहित
१८ २१ २८
मन्वविन्दञ्छिश्रियाणंवनेवने।
१ २ ३ १ ५ ३ १ २ ३१८
सजायसेमथ्यमानःसहोमह
२८ १ १ २ ३ १ १
त्वामाहुःसहसस्पुत्रमङ्गिरः॥ २ *॥

हे "अग्ने!" "अङ्गिरसः"†—एतन्नामका ऋषयः "गुंहा" गुहायां "हितं" निहितं निगूढं "वनेवने" हृत्ते "शिश्रियाणम्" आश्रितम् "त्वाम्" "अन्वविन्दन्"‡ अलभन्त। "महत्" महता "सहः" सहसा बलेन युक्तः "सः" त्वं "मथ्यमानः" "जायसे" हे "अङ्गिरः"¶ अङ्गिरसां प्रकृतिभूत! त्वां "सहसस्पुत्रम्" आहुः§॥ २॥

---

* ऋ० वे० ४, १, ३, ६ = य० वे० १५, २८।

† 'अङ्गानां रसभूताः'—इति वि०।

‡ 'अन्वविन्दन्—विदृज्ञाने, विदृलाभे, विदृसत्तायाम्'—इति वि०।

¶ 'अङ्गिरा जाठरोऽग्निः'—इति वि०।

§ अत्र महीधरव्याख्या यथा—'हे अग्ने! अङ्गिरसः अङ्गिरोवंशीया वा ऋषयस्त्वा मन्वविन्दन् लेभिरे अग्निमथ्य प्रादुरित्यर्थः। किम्भूतं त्वां? गुहा गुहायां निगूढे प्रदेशे हित स्थितमप्सु प्रविष्टमित्यर्थः। अग्निर्देवेभ्य उदक्रामत्सोऽप आविशदित्यादि श्रुतेः। सुपां सुलुगिति गुहाशब्दात्सप्तमीलोपः। हे अग्ने! पुनर्महं त्वां वनेवने शिश्रिया नानावनस्पतिषु स्थितमङ्गिरसोऽन्वविन्दन्। नित्यवीप्सयोरिति वनेवनेश्र

अथ तृतीया।

३१ २३१२ ३१३१ २
यज्ञस्यकेतुम्प्रथमम्पुरोहित

३ १८ २८ ३१८ २८
मग्निन्नरस्त्रिषधस्थेसमिन्धते।

१ २ ३२३१३ २३२ ३
इन्द्रेणदेवैःसरथ्ँसबर्हिषि

२ ३ १८ २८३१ २८ २१२
सीदन्निहोतायजथायसुक्रतुः ॥ ३ * ॥ ६

"नरः" कर्मणां नेतारः ऋत्विजः "यज्ञस्य" यागस्य "केतुं" प्रज्ञापकं "पुरोहितं" यजमानैः पुरस्कृतम् "इन्द्रेण" "देवैः" "सरथं" देवानां तेषां मान्यत्वात् समान-रथम् "अग्निं" "त्रिषधस्थे"† त्रिस्थाने विहारप्रदेशे "प्रथमं" "समिन्धते" सम्यग् दीपयन्ति। ततः "सुक्रतुः" शोभन-कर्मा "होता" देवाना-माह्वाता "सः" अग्निः "बर्हिषि" बर्हिर्युक्ते तस्मिन् स्थाने

द्विलम्। अयतेः ग्रामच्छ वक्तव्यं छन्दसीति ग्रपः स्रुः द्विलं च। यं त्वामङ्गिरसो ऽङ्गभव्य स त्वं जायसेऽधुनाग्यरणिभ्य उत्पद्यसे। कीदृशः? महतस्तः महता बलेन सहसा मथ्यमानः। महतस्तः-शब्दाभ्यां तृतीयालोपः। मथ्यमानो जायस इत्यर्थः। हे अङ्गिरः अग्ने! अतएव सहसो बलस्य पुत्रं त्वामाङ्गः वह्नि मुनयः बलेन मन्थनाज्जायमानत्वाद्बलपुत्रं वह्निमित्यर्थः॥"—इति।

* ऋ० वे० ४, १, ३, २।

† 'त्रिषधस्थे—सधस्थं स्थानमुच्यते। तृभिः स्थानैः समिन्धते—गार्हपत्य-दक्षिणाग्न्याहवनीय-प्रभृतिभिः स्थानैः समिन्धते'—इति वि०।

"यजथाय" यज्ञाय * "निषीदन्" न्यसीदत् प्रतिष्ठितो भवदिति यावत् ॥

"समिन्धते"-"समीधिरे"—इति पाठौ ॥ २ ॥ ६

॥ कावम् ॥ जनोवा। स्यगोपाश्रजनायि। ष्टजागृ
वाँ२यिः। अग्निःसुदक्षःसुविता। यनव्यासाँ२यि। घृ
तप्रतीकोबृहता। दिविस्पृशा२३। द्यूमाँ३द्वायिभा। ति
भरातार्२३यि। भायाँ३:भृ५च्चा६५६यिः ॥(१) तुवोवा।
अग्ने अङ्गिरसो। गद्दाद्दायितार्२म। अन्वविन्दञ्छिश्रिया
णाम्। वनेवानार्२यि। सजायसेमथ्यमानाः। स
द्दोमाद्दार्२३त्। द्यवाँ३माद्दः। सद्दसाय्यू२३त्। चामा
३ँगा५यिरा६ ५ ६ः ॥(२) यज्ञोवा। स्थकेतुम्प्रथमाम्।
पुरोद्दायितार्२म्। पुरोद्दायितार्२म्। अग्निन्नरस्त्रिष
धस्थायि। समिन्धातार्२यि। इन्द्रेणदेवैःसरथाम्।

---

* 'यजथाय—यजन-क्रियायाः कर्मणे'—इति वि०।

२ १ १ २ ४५ ५ २२ १
सबर्हायिषा२३यि। सायिदा३न्नायिष्टो। तायजाथा२३।

१ २ ४
यासू३क्रा५तू६५६:(३)॥ १५ *॥ [१] ६

अथ द्वितीयर्चे†—

प्रथमा।

२ १ २ ३ १२ १२
अयंवामित्रावरुणासुतःसोमऋतावृधा।

२७ १ १ २ ३ १०
ममेदिहश्रुतंहवम्॥ १ ॥

हे "ऋतावृधा" ऋतस्य सत्यस्य यज्ञस्य वा वर्धकौ¶! "मित्रावरुणा" हे मित्रावरुणौ! "वां" युवाभ्याम् "अयं" "सोमः" "सुतः" अभिषुतः। यस्मादेवं तस्मात् "इह" अस्मिन् यज्ञे "ममेत्" मदीयमेव§ "हवम्" आह्वानं "श्रुतं" श्रृणुतम्॥ १॥

---

* ऋ० गा० १८५० १ च० १५ सा०।

† 'मैत्रावरुणमाध्यम्'—इति वि०।

‡ ऋ० वे० २, ८, ७, ४।

¶ 'ऋतावृधा—ऋतो यज्ञः, तेन वर्द्धयितारौ अथवा ऋतमन्नं तेन वर्द्धेते ऋतावृधौ'—इति वि०। निघण्टौ तु ऋतमिति यज्ञनामसु (१, १२), धननामसु (२, १०), उदकनामसु (१, १२), सत्यनामसु (३, १०) च दृश्यते परं नात्रान्नामसु।

§ 'मम इत्—इत्-इति पद-पूरणः। इह मदीये यज्ञे'—इति वि०।

अथ द्वितीया।

२ २ २ २२ . ३ १८ २८ २ २
राजानावनभिद्रुहाध्रुवेसदस्युत्तमे।

३ १ २
सहस्रस्थूणआसाते॥ २ *॥

"राजानौ" ईश्वरौ दीप्यमानौ वा "अनभिद्रुहा" † अनभिद्रोग्धारौ यौ मित्रावरुणौ "ध्रुवे" स्थिरे "उत्तमे" उत्कृष्टे "सहस्रस्थूणे"‡ "सदसि"¶ स्थाने "आसाते" उपविशतः [तावागच्छतामिति शेषः]॥ २॥

अथ तृतीया।

२ ३ १ २ १ १ १ २ ३ १८ २८३ १०
तासम्राजाघृतासुतीआदित्यादानुनस्यती।

१ २३ १ २
सचेतेअनवङ्करम्॥ २ §॥ ७

"सम्राजा" सम्राजौ आश्रयैव सर्वेषां प्रास्तारौ, "घृतासुती" घृतासू॥ ["तद्वांमहित्वंघृतास्नावस्तु"—इति मन्त्रान्तरात्,]

---

* ऋ० वे० २, ८, ७, ५। "आसाते"—इति तत्र पाठः।

† 'अद्रोधकर्मणौ'—इति वि०।

‡ 'सहस्रस्थूणे—स्थूणानां सहस्रं यस्मिन्'—इत्यादि वि०।

¶ 'सदोनामनमण्डपे' इति यावत्।

§ ऋ० वे० २, ८, ८, १।

| 'घृतासुती—घृतेन आसुतिः * * * शरीरहविर्यथोर्भवति * *'—इति वि०।

"आदित्या" अदितेः पुत्रो, "दानुमत्पती" 'दानुमः' धनस्य देवस्य वा 'पती' स्वामिनौ,* "ता" तौ मित्रावरुणौ "अनवद्यम्" अकुटिलं यजमानं† "सचेते' हविर्भक्षणार्थं सेवेते ॥ २ ॥ ७

अथ तृतीय खण्ड—प्रथमा।

१ १ ३ २ १ २ १२ २२ ४
इन्द्रोदधीचोऽस्थभिर्वृत्राण्यप्रतिष्कुतः।
३ १ २ २।२ २२
जघाननवतीर्नव ॥ १ § ॥

[अथ शाटायनिन इतिहासमाचक्षते—"आथर्वणस्य दधीचो जीवतो दर्शनेन असुराः पराबभूवुः। अथ तस्मिन् स्वर्गते सति असुरैः पूर्णा पृथिव्यभवत्। अथेन्द्रस्तैरसुरैः सह योद्धुमयक्ष्यत्स ऋषिमन्विच्छन् स्वर्गं गत इति शुश्राव। अथ पप्रच्छ तम्—'नेह किमस्य किञ्चित् परिशिष्टमङ्गमस्ति?'—इति; तस्मा अवोचत्—'अस्त्येतदाश्वं शीर्ष, येन शिरसा अश्विभ्यां मधुविद्यां प्राब्रवीत्, तत्तु न विद्मः यत्राभवत्'—इति। पुन--

---

* 'दानुमत्पती—दान-कर्तृ च यजमानाय'—इति वि०।

† 'अनवद्यं—यज्ञम्'—इति वि०।

‡ 'ऐन्द्रमाश्वम्'—इति वि०। ¶ "अवसीर्णा"—इति ख० पु० पाठः।

§ ऋ० आ० २, २, ४, ५ (१आ० ११६ ४०) = ऋ० वे० १, ६, ७, २।

रिन्द्रोऽब्रवीत्-'तदन्विच्छत'—इति। तद्वावेषितुमुत्सृष्टपर्णा वत्यनुविद्धा जक्षुः। यर्णावद्व वै नाम कुरुक्षेत्रस्य जघनार्धं सरः स्यन्दते। तस्य शिरसोऽस्थिभिरिन्द्रोऽसुरान् जघान"—इति॥] "अप्रतिष्कुतः" परैरप्रतिगच्छितः प्रतिकूल-शब्द-रहितः इन्द्रः आथर्वणस्य "दधीचः"—एतत्संज्ञकस्य ऋषेः "पञ्चभिः" पार्श्व-शिरः-सम्बन्धिभिरस्थिभिः "नवतीर्नव" नवसङ्ख्याका नवतीः दशोत्तरा अष्टशतसङ्ख्याकाः (८१०) [तद्यथा—लोकत्रयवर्त्तिनो देवान् जतु मादावासुरी माया त्रिधा सम्भवति; त्रिविधा सा अतीतानागतवर्त्तमान-काल भेदेन तत्काल-वर्त्तिनो जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति—एवं नव सम्पद्यन्ते; पुनरपि उत्साहादि-शक्ति-त्रय-रूपेण त्रैगुण्ये सति सप्तविंशतिः सम्पद्यते; पुनः सात्विकादि-गुणत्रयभेदेन त्रैगुण्ये सति एकोत्तरा अशीतिः सम्पद्यते;—एवं चतुर्भिश्चिकैर्गुणि-ताया मायाया दशसु दिक्षु प्रत्येकमवस्थाने सति नवनवतयः सम्पद्यन्ते। एवंविधमायारूपाणि] "वृत्राणि" आवरकाण्यसुर जातानि "जघान" हतवान्] दधीचः—दधि अञ्चतीति दध्यङ्, अञ्चतेः ऋत्विगित्यादिना (३, २, ५९) क्विन्, अनिदिता-मिति (६, ४, २४) न-लोपः, षष्ठ्येकवचने "अचः (६, ४ १३८)"—इत्यकारलोपे यावित्ति (६, २, १३८) दीर्घत्वम्, उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्व-विधानेन तद्धाध्यते।

अक्षभिः—"छन्दस्यपि दृश्यते (७, १, ७६)" —इति अन- आदावपि अक्षि-शब्दस्यानङादेशः मध्योदात्तः] ॥ १ ॥

अथ द्वितीया।

२१ २८२२उ २ १२३ १२
इक्षन्नश्वस्यय च्छिरःपर्वतेष्वपश्रितम्।

१२ ३१ २
तद्विदच्छर्यणावति ॥ २ * ॥

"पर्वतेषु" पर्ववत्सु गिरिषु अपश्रितम् अप गत्य स्थितम् "अश्वस्य" अश्व-सम्बन्धिनो दधीचः "यत्" "शिरः" "इक्षन्" इन्द्रो वर्त्तते, "शर्यणावति" एतत्सञ्ज्ञके सरसि† "तत्" शिरः "विदत्" अलाभीत्। 'ज्ञात्वा, तदाहृत्य, तदीयैः अक्षिभिः हयानि जघान'—इति पूर्वस्यामृचि सम्बन्धः॥ इक्षन्—इषु इच्छायां तुदादित्वाच्छप्रत्ययः। विदत्— वेत्तेर्लुङि व्यत्ययेन च्लेरङादेशः। शर्यणावति—शर्यणा नामानो देशास्तेषामदूर-भवः सरः शर्यणावत्; मध्वादिषु शर्यणाशब्दस्य पाठात् "मध्वादिभ्यश्च (४, २, ८६)"—इति चातुरर्थिको मतुप्, "सञ्ज्ञायाम् (८, २, ११)"—इति मतुपो वत्वम्, मतो बह्वचोऽनजिरादीनाम् (६, ३, ११९)"—इति दीर्घः॥ २ ॥

---

* ऋ० वे० १, ९, ७, ४।

† 'शर्यणावति—यज्ञे कर्मवति'—इति वि०।

अथ तृतीया।

२उ २ १ १ २ १ २ १ २ ३क २८
अचाहगोरमन्वतनामत्वष्टुरपीच्यम्।

२ ३ ३ १ १ ३ २
इत्थाचन्द्रमसोगृहे ॥ ३ * ॥ ८

"अचाह" अस्मिन्नेव "गोः" गन्तुः "चन्द्रमसः" "गृहे" मण्डले "त्वष्टुः" दीप्तस्य आदित्यस्य सम्बन्धि "अपीच्य"-रात्रावन्तर्हितं स्वकीयं यत् "नाम" तदादित्यरश्मयः "इत्था" इत्थमनेन प्रकारेण "अमन्वत" अजानन् [उदकमये स्वच्छे चन्द्रविम्बे सूर्य-किरणाः प्रतिफलन्ति, तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं सञ्ज्ञां लभन्ते तादृशीं चन्द्रेऽपि वर्त्तमानां लभन्त इत्यर्थः। एतदुक्तभवति—यद्रात्रावन्तर्हितं सौरं तेजस्तच्चन्द्र-मण्डलं प्रविश्य अहनीव नैशं तमो निवार्य सर्वं प्रकाशयति; ईदृगभूत-तेजसा युक्तः सूर्यश्चेन्द्रएव, द्वादशस्वादित्येषु इन्द्रस्यापि परिगणितत्वात्। अतोऽहोरात्रयोः प्रकाशक इन्द्रएवेति इन्द्र-स्तुतेः प्रतीयमानत्वादिन्द्रोदेवतेत्येतदुपपन्नं भवति। अथं निरुक्तम्—'अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपे-क्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति; 'सुषुम्णः सूर्यरश्मि-श्चन्द्रमा गन्धर्वः'—इत्यपि निगमो भवति; सोऽपि गौरुच्यते—

---

* ऋ० प्रा० २, २, १, ३ (१भा० ३५२ ४०) = ऋ० वे० १, ८, ७, ५।

"अत्राहगोरमन्वत"—इति (२, ६,)। "अथा ह गोः समसं-सतादित्यरश्मयः खनामापौच्यमदगतमपचितमपिहितमन्तर्हितं वा (४, २५)"—इति॥ अमन्वत—'मनु अवबोधने (त०, आ०)। अपौच्यम्—अपपूर्वाच्चिनाते र्निपातनाद् यत्, अतएवाभिमतरूपसिद्धिः; यद्वा अपिपूर्वादञ्चतेः "ऋत्विग् (३, २, ५९)"—इत्यादिना क्विन्, "अनिदिताम् (६, ४, २४)"—इति न-लोपः, अपिगते निर्गते भवमपौच्यम् "भवे छन्दसि (४, ४, ११०)"—इति यत्, "अचः (६, ४, ११८)"—इत्य-कारलोपे "चौ (६, ३, १३८)"—इति दीर्घत्वम्; 'अपौच्यो प्रकाश्यः'—इति भट्टभास्करमिश्रः। इत्था—इदम्-शब्दाच्च "था हेतौ च छन्दसि (५, ३, २६)"—इति प्रकारवचने था-प्रत्ययः; यदि तत्रेदं-शब्दोनानुवर्त्तते तदानीम् "इदमस्थमुः (५, ३, २४)"—इति थमुः प्रत्यय; "अव्ययादाप्-सुपः (२, ४, ८२)"—इति सुब्लुकं बाधित्वा "सुपां सु-लुक् (७, १, ३९)"—इत्यादिना डादेशः। चन्द्रमसः—चन्द्रमाह्लादनं मिमीते निर्मिमीते—इति चन्द्रमाः "चन्द्रेमोऽडित् (उ०, ४, २२७)"—इत्यसि-प्रत्ययः; दासीभारादिषु पठितत्वात् पूर्व-पदप्रकृतिस्वरत्वम्; पूर्वपदस्य च "स्फायितञ्चि (, ,)"—इत्या-दिना रक्-प्रत्ययान्तत्वादन्तोदात्तम्॥ २॥ ८

अथ चतुर्थऋचे—प्रथमा ।

२ १ २ २ १ २ १ ३ १ २
इयंवामस्यमन्मनइन्द्राग्नीपूर्व्यस्तुतिः ।

३ २ १ १ २
अभ्राद्वृष्टिरिवाजनि ॥ १ * ॥

हे "इन्द्राग्नी ! "इयं" "पूर्व्यस्तुतिः" पूर्व्या स्तुतिः† संख्या स्तुतिः†, कस्य सम्बन्धिनी ? "मन्मनः"‡ स्तोतुः अत्रात्. वसिष्ठात् "वां" युवाभ्यां युवयोरर्थम् "अभ्रात्" मेघात् "वृष्टिरिव" वृष्टी सती "अजनि" प्रादुर्भूता¶, तां शृणुतमित्युत्तरत्र सम्बन्धः ॥ १ ॥

अथ द्वितीया ।

२ १ ३ ३ २ ३ १ २ १ २ १ २ १
इमंस्तोमंजरितुर्ह्वमिन्द्राग्नीवनतङ्गिरः ।

३ १ २ ३ १ २
इमानापिप्यतन्धियः ॥ २ § ॥

हे "इन्द्राग्नी !" "जरितुः" स्तोतुः "हवम्" आह्वानं युवां

---

* ऋ० वे० ५, ६, १७, २ ।

† 'पूर्व्यस्तुतिः—पूर्व्या प्रथमतरा स्तुतिः सर्वेषां स्तुत्यानां प्रथमतरे इन्द्राग्नी-स्तुत्यौ —इति वि० ।

‡ 'मन्मनः प्रकाशस्य बलात्'—इति वि० ।

¶ 'यथा अभ्रात् उदकात् वृष्टिरुत्पद्यते, तद्वदिन्द्राग्नीभ्यां उदकात् वृष्टिरुत्पद्यते —इति वि० ।

§ ऋ० वे० ५, ६, १७, २ ।

शृणुतम्। श्रुत्वा च "गिरः" तदीयाः स्तुतीः "वनतं" सम्भजतम्। तथा "ईशाना" ईश्वरौ युवां "धियः" अनुष्ठितानि कर्माणि "पिप्यतं" तैस्तैः फलैः पूरयताम् ॥ २ ॥

अथ तृतीया।

१ २ १ २ २१ ३ ४१ १८
मापापत्वायनोनरेन्द्राग्नीमाभिशस्तये।

१ २ २ २
मानोरीरधतन्निदे ॥ ३ * ॥ ९

हे "नरा" नेतारौ! इन्द्राग्नी! "नः" अस्मान् "पापत्वाय"† हीनभावाय "मा रीधतम्"‡ मा वशं नयतम्, तथा "अभिशस्तये" शत्रुभिः कृतायाभिशंसनाय मा रीरधतम्, तथा "निदे"¶ निन्दकाय मा रीरधतं मा वशीकुरुतम् ॥ ३ ॥ ९

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य पञ्चमस्याध्यायस्य तृतीयः खण्डः§ ॥ ३ ॥

---

* ऋ० वे० ५, ६, १७, ३।

† 'पापत्वाय—पापबुद्धये'—इति वि०।

‡ 'मा रीधतम्—मा हिंसायाम्; मा हिंसताम्'—इति वि०।

¶ 'निदे—निन्दां दीयते यस्मिन् यस्मै निदे'—इति वि०।

§ 'खण्ड' प्रान्तः-समाप्तम्'—इति वि०।

अथ चतुर्थखण्डं * प्रथमट्चम्—

प्रथमा ।

१२ ३१२ २१२ ३१२
पवस्वदक्षसाधनोदेवेभ्यःपीतयेऽहरे ।
२१ २ २२१२
मरुद्भ्योवायवेमदः ॥ १ ॥

हे "हरे" हरितवर्ण ! पापहर्त्तः वा सोम ! "दक्षसाधनः" दक्षो बलं तस्य साधनो "मदः" मदकरश्च त्वं "पवस्व" क्षर । किमर्थम् ? "देवेभ्यः" इन्द्रादिभ्यः "पीतये" पानाय, तथा "मरुद्भ्यः" "वायवे" च पीतये पवस्व ॥ १ ॥

अथ द्वितीया ।

२३१२ २१२ ३२उ ३१२१२
सन्देवैःशोभतेवृषाकविर्योनावधिप्रियः ।
१२ ३१२
पवमानोअदाभ्यः ॥ २ ¶ ॥

"अयं" सोमः "सं शोभते" "देवैः" सह । कीदृशः सोमः ? "वृषा" वर्षकः, "कविः" क्रान्तदर्शी, "योनौ" स्थाने स्वीये "अधि" अधिष्ठितः§ "प्रियः" प्रियोभूतः सर्वेषां [यद्वा प्रीणयिता]

---

* 'इदानीं माध्यन्दिनसवनमुच्यते'—इति वि० ।

† "देवेभ्यष्पीतये"—इति क० पु० पाठः ।

‡ ऋ० मा० ५, २, ४, ८(२ भा० २४ ४०) = ऋ० वे० ९, ८, १५, १ ।

¶ ऋ० वे० ९, ८, १५, २ । "पवमानोअदाभ्यः"—इति स्थले "इन्द्राहेवयोसम"—इति ऋ०-पाठः ।

§ 'योनौ अधि—सप्तम्येकवचनमिदं द्वितीयैकवचने द्रष्टव्यम् । योनिम् अधि'—इति वि० ।

"पवमानः" सरन् "अदाभ्यः" केनाप्यहिंसितश्च भवति अतएव सोमः सं शोभते ॥ २ ॥

अथ तृतीया।

१२ ३२ ३२ २उ ३१ २
पवमानधियाहितोऽभियोनिङ्कनिक्रदत्।
१२ ३१ २र
धर्मणावायुमारुहः॥ २ * ॥ १०

हे "पवमान" सोम! "धिया" कर्म्मणा अङ्गुल्यापारेण अङ्गुल्या वा † "हितः" धृतः सन् "कनिक्रदत्" शब्दं कुर्वन् "योनिं" स्थानं "द्रोणकलशं" च "अभि आरुहः" आभिमुख्येन आरोहणं कुरु प्रविशेत्यर्थः। तदेवाह—"धर्म्मणा" कर्म्मणा "वायुं" वायुसम्बन्धिपात्रमित्यर्थः, तदारुहः प्रविश॥

"आरुहः"-"आविश"—इति पाठो॥ ३॥ १०

१ २१ २१र
॥ निधनकामम्॥ पवस्वदा२क्तसाधनाः। देवेभ्यः
२ २ २१२ ० ३२ २
पीतयेहरायि। मरुद्भ्योवा। पवा२३४यि। हाहोयि।
१२ १ १ १
मदाः। होयि। २। मदः। होयि। २। मदः। होयि।

---

* ऋ० वे० ९, ८, १५, २।

† 'धिया यज्ञा'—इति वि०।

२ । औहोग्रौहोवा२३४५ह्वाउ ॥(१) सन्देवैःग्रो२भतेवृ

षा । कविर्योनावधिप्रियाः । पवमानाः । अदा२३४ ।

ह्वाहोयि । भियाः । होयि । होयि । भिय । होयि ।

२ । भियः । होयि । २ । औहोग्रौहोवा२३४५ह्वाउ ॥(२)

पवमाना२धियाक्षिताः । अभियोनिङ्कनिक्रदात् । धर्म्म

णावा । युमा २ ३ ४ । ह्वाहोयि । रुहाः । होयि ।

होयि । रुह । होयि । २ । औहोग्रौहोवा २ ३ ४ ५

ह्वाउ । वा(३) ॥ ८ * ॥ [१]

॥ सप्तास्राहौयम् ॥ पवा३४ । स्वदन्तसाधनः । ग्रो

३वा । देवेभ्यःपीतयेह्वा२रायि । मा२रु । ग्रो२३वा ।

यवौ३ह्वो । वाह्वा३४३यि । मा२३४दो३ह्वायि ॥(१) सन्दे

३४ । वैःग्रोभतेवृषा । ग्रो३वा । कविर्योनावधिप्रा२

* ऋ० गा० १५० २ अ० ८ सा० ।

१ १ १ १ ३ १२ १२१
याः। पा२वा। मा२३नाः। अदौ३ह्हो। वाह्वा३४३

१ ५ ५ २२ २ २
यि। भा२३४योइ्ह्वायि ॥(२) पवा३४। मानधियाह्वि

५ ५ १ २ १ १
तः। ओइ्वा। अभियोनिङ्कनिक्रा२दात्। धा२र्मा।

५ १ ३ १२ २ १ ५ ५
णा२३वा। युमौ३ह्हो। वाह्वा३४३यि। रु२३४ह्वोइ्ह्वा

यि(३) ॥ ९ * ॥ [२]

२ १ १
॥ त्वाष्ट्रीसाम ॥ पवस्वदा। त्वसा२धाना२:। दा

२ २ २ १ २ १ २ १
यिवेभ्यःपी। तयायिह्वा१रा२यि। मरुद्भ्यो२३वा। यवे

१ २ २ २ १
मदा३१उवा२३ ॥(१) सन्देवैःशो। भता२यिवार्षा२।

१ २२ २ १ २ १ १
काविर्यौनौ। अधायिप्रा१या२:। पवमा२३नाः। अदा

२ २ २ १
भिया३१उवा२३ ॥(२) पवमाना। धिया२ह्वायिता२:।

१ २२ १ २ १ २
आभियोनिम्। कनायिक्रा१दा२त्। धर्म्मणा२ ३ वा।

१ १ २
युमारुह्वा३१उवा२३। वृधे१(३) ॥ १ † ॥ [३] १०

---

* ज० मा० १५प्र० २अ० ९खा०। † ज० मा० १६प्र० २अ० १खा०।

अथ प्रगाथरूपे द्वितीयसूक्ते—

प्रथमा ।

२१ १ २ २२२ २१ २
तवाङ्ग॒सोमरारणसख्यइन्दोदिवेदिवे ।

२१ २ २ १ २ २१८ २८ ३ ३७ २ १ २
पुरूणिबभ्रोनिचरन्तिमामवपरिधी॒रतिताइ॒हि ॥ १* ॥

हे "इन्दो" स्यन्दमान-सोम ! "तव" "सख्ये" सखि-कर्मणि "अहं" "दिवेदिवे" अन्वहं "रारण" रमे [रणेर्लिटि उत्तमे णलि रूपम्]। हे "बभ्रो" बभ्रुवर्ण-सोम "पुरूणि" बहूनि रक्षांसि "मां" तव सख्ये स्थितं "नि अव चरन्ति" नीचैनं चरन्ति बाधन्ते। ये मां बाधन्ते तान् "परिधीन्" "अति इहि" अतीत्य गच्छ जहीति यावत् ॥ १ ॥

अथ द्वितीया ।

१ २ १ २८ ३ १ १ ३ १ १ २ १ १ १
तवाहन्नक्तमुतसोमतेदि॒वादु॒हानोबभ्रऊधनि ।

२ १ २८ ३ २ ३ १ १ २ ३ १ २ २ १ २
घृणातपन्तमतिसूर्य्यपरः॒शकुनाइ॒वपप्तिम ॥ २ † ॥ ११

हे "बभ्रो" बभ्रुवर्ण-सोम ! "उत" अपिच "नक्तम" "उत" अपिच "दिवा" अहोरात्रयोः "सख्याय" सख्यार्थं ॐ "तव"

---

* ऋ॰ प्रा॰ ६, १, २, ६ (२भा॰ ८१४०) = ऋ॰ व॰ ७, ५, १५, ४ ।

† ऋ॰ वे॰ ७, ५, १५. ४ ।

‡ सख्यायेति ऋग्वेदीयपाठमवलम्ब्यैवं व्याख्यातं यस्मात् सामवेदीय-पाठस्तु "दुहान." —इति ।

"उधनि" समीपे * "अहं" रमे—इति शेषः। "ते" वयं "हृणा" हीत्वा "तपन्त" ज्वलन्त "परः" परस्थानस्थितं "सूर्य" तदात्मकं त्वाम् † "अति पप्तिम" तत्र स्थितं त्वां प्राप्नुमतिपतेम। कथमिव? अकुनाइव यथा सुपर्णादयः पक्षिणः सूर्यमति-गच्छन्ति तद्वत् ‡ [पत्लृगतौ, अस्माच्छान्दसो क्विटि "तनि-पत्येकेऽन्दसि (६, ४, ९९)"—इत्युपधालोपः॥

"दुहानः"--"सख्याय"—इति पाठो॥ २॥ ११

॥ आष्टादशृष्ट्रौत्तरम्॥ तवाहꣳसोमरारणऐयादौ।

ह्वोइवा। सख्यइन्दोदिवे। दायिवे २ ३। ऐयाइ२३त्।

औइ२३ह्वोवा। पुरूणिबभ्रोनिचरन्तिमाम्। आवाइ२३।

ऐयाइ२३त्। औइ२३ह्वोवा। परिधीꣳरतितान्। आयि

हे ऋत्विजः! "इन्द्राय"* "नूनं" क्षिप्रम्† "अर्चत" पूजनं कुरुत। एतदेव स्पष्टीक्रियते—"उक्थानि" अप्रगीत-मन्त्र-साध्यानि शस्त्राणि स्तोत्राणि च "ब्रवीतन" ब्रूत। "सुताः" अभिषुताः "इन्दवः" सोमाः त्वाम् "अमत्सु" आगत मिन्द्रं मत्तं कुर्वन्तु, अनन्तरं "ज्येष्ठं" प्रशस्यतमं "सहः" सहस्विनं बलव-न्तम् तमिन्द्रं नमस्यत नमस्कुरुत [ब्रवीतन—ब्रवीते र्लोटि "तसनमनघनाश्च (७,१,४५)"—इति तनबादेशः। अमत्सु—मदी हर्षे(भ्वा०,आ०)छान्दसः प्रार्थनायां लुङ्, आगमानुशासनस्या-नित्यत्वादिड़भावः। नमस्यत—"नमोवरिवश्चित्रङः (३,१,१९)" —इति क्यच्। सहः—"युगकारेकाररेफाश्च वक्तव्याः—इति मत्वर्थीयस्य लुक्॥ ३॥ २१

॥ वसिष्ठप्रियम्॥ इममी२३। द्रसुतम्पिब। ज्येष्ठा
म्। अमाऽर्त्तायम्मादा२म्। शुक्रास्यत्वा३। भिया२
ह्वा२३४रान्। धाराओ२३४वा। आर्त्ताओ२३४वा।
स्मसा५दनायि॥१) नकिष्टू२३। वद्रथीतरः। हारी।
यदीऽन्द्रायच्छासा२यि। नकायिष्टूवा३। नुमा२ज्मा२३४

---

* 'इन्द्रायेति चतुर्थी द्वितीयार्थे द्रष्टव्या, इन्द्रम्'—इति वि०।

† 'नूनं निश्चितम्'—इति वि०।

५ १ १ १ ५ १ १ १ ५ ४
ना। नाकाओ२३४वा। सूवाओ२३४वा। स्वश्चायुनश्चा

१ १८ ४८ ५ ४ ५ २ १२
यि ॥(२) इन्द्रायाऽइ। नूनमर्च। तोक्या। निचाइब्रावी१

१ २ १ २ ५ १
ताना२। सुताञ्चमाइ। सुरीऽन्दा२३४वाः। ज्यायि

२ १ ५ १ २ १ ५ ४ ५
ष्ठाओ२३४वा। नामाओ२३४वा। स्यताऽसद्दाः। द्यो

५ई। डा(३) ॥ १ * ॥ [१]

१ २ १ ८
॥ आसिताद्यम् ॥ इमामिन्द्रसुताम्। पिबा। ज्येष्ठम

१ १ १ १
मर्त्तियम्मा२३दाम्। भृक्ता२स्यात्वा२। भियद्धरान्।

१ १ १ ५ ४ ५
धारा२आर्त्ता२। स्यमोवाऽओ२३४वा। दाऽनोऽद्धा

१ २ १ १ ८ २
यि ॥(२) नकिष्ट्वाद्रथायि। तरो। हरीयदिद्रयक्षा२३सा

१ १ १ १
यि। नाका२यिष्टूवा२। नुमज्मना। नाका२यिसूवा

१ २ १ ५ ४ ५ १ ८
२। स्वश्चोवाऽओ२३४वा। नाऽशोऽहायि ॥ इन्द्रा

२ ८ १ ८ ८ १ १
यनूनमा। चता। उक्थानिचब्रवीता२३ना। सूता२

---

* ऊ० गा० २प्र० १अ० १सा०।

आमा२। त्वरिन्दवाः। ज्यायिष्ठा२न्नामा२। स्यतो
वा३ओ२३४वा। मापुहोई३हायि(३) ॥ १७ * ॥ [२]

॥ गौरीवितम् ॥ इमम्। इन्द्रा३। सुतम्पिबा।
ज्येष्ठममर्त्तियम्मदा२३म्। शूक्रस्यत्वा३१२३। भियापुषं.
रान्। धाराकृता३१२३। स्यसोवा। दापुनोईहायि ॥(१)
नाकः। तुवा३त्। रथीतराः। हरीयदिन्द्रयक्कसा
२३यि। नाकिष्टुवा३१२३। नुमापुज्मना। नाकिस्तुवां
३१२३। स्वमोवा। नापुशोईहायि ॥(२) इन्द्रा। यनू३।
नमर्चता। उक्थानिब्रवीतना२३। सूताअमा३१२३।
त्वरीपुदवाः। ज्यायिष्ठन्नमा३१२३। स्यतोवा। सापु
होईहायि(३) ॥ ३ † ॥ [३] २१

---

* ऋ० मा० २२प्र० २अ० १७सा०।

† ऋ० मा० २२प्र० १अ० २सा०।

अथ तृतीयतृचे*—प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १ २

इन्द्रजुषस्व प्रवहायाहि पूर्वरहरिह।

१ २ ३ १ २ ३ १ १ २ ३ ४ १ २

पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ॥ १ ॥

यानि मया हवींषि दत्तानि तानि "प्र वह" "आ याहि" आगच्छ "शूर" वीर्यवन्! उपसर्गाक्षराणि—"हरिह" [अथवा हरितवर्णा हया यस्य स हरिहयः, तस्य सम्बोधनं क्रियते—हे हरिह! छान्दसो यकारलोपः]"पिबा"† "सुतस्य" सोमस्य उपसर्गाक्षराणि—"मतिर्नमधोश्चकानः", "चारुः" शोभनः "मदाय" भक्षणाय ॥ १ ॥

---

* 'इदानीं चतुर्थेऽहनि षोडशी भवति। तस्य षोडशिनः महान् विचारः इन्द्रस्य हवस्य समभवता मित्यारभ्य महान् विचारो निदानसूतेत्युक्तः चतुस्त्रिंशदक्षराणि सूता भवन्ति। तमुपसृत्य प्रवहादीनि उपसर्गाक्षराणि निरूप्यन्ते। तथा सति चादिष्वर्थाणां पादानां त्रीणि त्रीणि उपसर्गाक्षराणि पादान्तेषु भवन्ति'—इति वि० रचना—

प्रथमर्चि—"प्रवह","हरिह","मतिर्न"—इति नव,

द्वितीयर्चि—"नश्चय","दिवोन" "सुश्र्न" इति नव,

तृतीयर्चि—"मित्रोन","यतिर्न","भृगुर्न"—इति नव,

किञ्च प्रथमर्चि चतुर्थपदादौ च "मधोश्चकान"—इति सप्त, तस्मित्थं सङ्कलनया चतुस्त्रिंशदुपसर्गाक्षराणि सम्पद्यन्ते। अत्र च "सुश्र्न","मधोश्"—इत्युभयत्र विसर्गस्य द्व्यक्षरत्वेन पदद्वयं सप्तविचारेण सम्पादितम्॥

† "द्व्यचोऽतस्तिङ" (६, ३, १३५)"—इति दीर्घः।

अथ द्वितीया।

१ २ ३ २३२ ३ २१ २१ १ २ ३ २
इन्द्रजठरन्नव्यन्नपृणस्वमधोर्दिवोन।

३ २ ३ २ ३ २ १ २ ३ १ २ ३ १ २
अस्यसुतस्यस्वाऽइऽन्नोपत्वामदास्तुवाचोअस्युः॥ २॥

हे "इन्द्र!" "जठरम्" उदरं "नव्यं न" नवतरं "पृणस्व" पूरयस्व "मधोः" मधुरस्य "दिवो न" "अस्य" सोमस्य "सुतस्य" अभिषुतस्य "स्वर्ण" स्वर्गस्येव "उप त्वा" उप समीपे त्वाम् "मदाः" "सुवाचः" शोभनवाचः "अस्युः" स्थितवन्तः॥ २॥

अथ तृतीया।

१ २ ३ २ ३ २उ ३ १ २ ३ २उ ३ २
इन्द्रस्तुराषाण्मित्रोनजघानवृत्रंयतिर्न।

३ १ २ ३ २उ २ १ २ ३ २उ ३ २ ३ १ २
विभेदबलम्भृगुर्नसप्ताहेग्नन्मदेसोमस्य॥ ३॥ २२

"इन्द्रः "तुराषाट्" [तुरि सीदति यः सः तुराषाट्] "मित्रो न" मित्र इव "जघान" "वृत्रं" मेघं "यतिर्न"—उपसर्गाश्चराणि "बिभेद" भिन्दस्व "बलं" बलोनाम दानवस्तं बलं "भृगुर्न" त्रीणि त्रीणि पदान्तेषु उपसर्गाश्चराणि भवन्ति "ससाह" सहितवान् "अग्नून्" "मदे" भक्षणे कृते सोमस्य तथाच निविदापदे विहृतस्य षोड़शिनः। अस्य मदे अरित इत्यारभ्य बह्वनि वीर्ययुक्तानि कर्माणि*॥ ३॥ २२

---

* एतन्मूलस्य व्याख्यानं विवरणकृत्कृतानुकृतमेवेति नास्मयोर्विप्रेषः।

॥ गौरीवितम्* ॥ इन्द्र । जुषा३ । स्वप्रवद्दा । आ
याहिम्गुरहरिद्दा२३ । पायिबासुता३१२३ । स्वमतिर्न्ना
५मधोः । चाकानश्चा३१२३ । रुम्मीवा । दा५योहद्दा
यि ॥(१) इन्द्र । जठा३ । रत्नव्यन्ना । पृणस्वमधोर्हि
वीन्ना२३ । आस्यसुता३१२३ । स्वस्वर्न्ना५उपा । त्वाम
दाःसू३१२३ । वाचोवा । आ५स्थोहद्दायि ॥(२) इन्द्रः ।
तुरा३ । पाण्मिनोमा । जघानवृत्रंयतिर्न्ना२३ । बायि
भेदवा३१२३ । लंभृगुर्न्ना५ससा । केशवून्मा३१२३ । दे
वोवा । मा५स्योहद्दायि(३) ॥ २ † ॥ [१] २२

इति सामवेदार्थप्रकाशे उत्तरार्चस्य पञ्चमस्याध्यायस्य
सप्तमः खण्डः ॥ ७ ॥

---

* "गौरीवीतम्"—इति ख० पु० पाठः ।

† ऋ० गा० ३प्र० १ऋ० २सा० ।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थ-महेश्वरः॥ ५॥

॥ इति तृतीयस्यार्द्धः-प्रपाठकः*॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिकमार्गप्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्य्येण विरचिते माधवीये सामवेदार्थ-
प्रकाशे उत्तरग्रन्थे पञ्चमोऽध्यायः॥

---

* 'इति तृतीय-प्रपाठकस्य प्रथमार्द्धः। चतुर्थमन्त्रः परिसमाप्तः'—इति वि०।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥ १ ॥

॥ अथ षष्ठोऽध्याय आरभ्यते* ॥

तत्र,

गोवित्यवस्वेति प्रथमे खण्डे —

प्रथमा ।

२ १ २ २ १ २ २ १
गोवित्यवस्ववसुविद्धिरण्यवि

२ २ १ २ २ १ २ ३ १ २
द्रेतोधाइन्दोभुवनेष्वर्पितः ।

२ २ १ २ १ २उ
त्वꣳसुवीरोअसिसोमविश्वविच्च-

२ २ १ २ २ १ २ २र
न्त्वानरउपगिरेमआसते ॥ १ † ॥

हे "इन्दो" सोम ! त्वं "पवस्व" क्षरꣳ । कीदृशस्त्वं ?
"गोवित्" गवां लम्भकः, "वसुवित्" § धनस्य लम्भकः, "हिरण्य-

---

* 'इदानीं षष्ठमनवद्यमारभ्यते'—इति वि० ।

† ऋ० वे० ७, २, १९, ४ ।

‡ 'पवस्व पूयस्व'—इति वि० ।
'गोवित्—गावो यस्य विद्यन्ते स गोवित्'—इति वि० ।

§ 'वसुवित्—वसु धनं तेन लब्धा'—इति वि० ।

वित्"*हिरण्यस्य लम्भकः, "रेतोधाः" रेतश्चन्द्रकं तस्य धातोः-षधीनां यद्वा रेतः प्रजनन-सामर्थ्यं तस्य धारयिता "भुवनेषु" उदकेषु "अर्पितः"; भो सोम! कीदृशस्त्वं? "सुवीरोऽसि"† शोभनवीर्योऽसि भवसीति, "विश्ववित्" सर्वस्य वेत्तासि। यस्मादेवं तस्मात् तादृशं "त्वा" त्वाम् "इमे" "नरः"‡ नेतारः "गिरा" स्तुत्या "उपासते"¶॥

"नरः"-विप्राः"—"इति पाठो॥ १॥

अथ द्वितीया।

२ २ १ २ ३ १ २
त्वन्नृचक्षाअसिसोमविश्वतः

१ २ ३ १८ १८
पवमानवृषभताविधावसि।

१ २ ३ १ १ २ १ २ ३ १
मनःपवस्ववसुमद्धिरण्यवद्वयꣳ

२ २ १ १ १ २ १ २
स्यामभुवनेषुजीवसे॥ २ §॥

---

* 'हिरण्यवित्--हिरण्यविशिष्टं वसु'—इति वि०।

† 'सुवीरः—शोभनवीरः'—इति वि०।

‡ 'नरः—ऋत्विजः'—इति वि०।

¶ 'उपासते—उप समीपे स्थित्वा आसते, सभीपे उपविश्य गिरा स्तुतिसाधनया वाचा इमे आसते स्तुतिं कुर्वाणाः'—इति वि०।

§ ऋ० वे० ७, ९, १९, ४,।

भो "सोम!" त्वं "विश्वतः" सर्वतः सर्वेषु "भुवनेषु"* "वृषद्वा† असि" नृणां द्रष्टा भवसि। हे "पवमान" पुनान सोम! "वृषभ" अपां वर्षक! "वाः" अपः "वि धावसि" विविधं गच्छसि, स त्वं "नः"‡ अस्माकं "पवस्व" क्षर क्षिप्र "वसुमत्" बहुभिर्वसुभिर्वासकैर्गवादि-द्रव्यैर्युक्तं, तथा "हिरण्यवत्" बहुभिः हिरण्यैर्युक्तं धनं। वयञ्च वसुभिर्हिरण्यैश्च युक्ताः "भुवनेषु" लोकेषु "जीवसे" जीवितुं प्रभवः "स्याम" भवेम॥ २॥

अथ तृतीया।

३ २ १ २ ३ १ २
ईशानइमाभुवनानिईयस

३ १ २ ३ १ २ ३ १ २
युजानइन्दोहरितःसुपर्ण्यः॥

१ २ ३ १ २ ३ २ ३
तास्तेक्षरन्तुमधुमद्घृतम्पय

१ २ ३ १ २ ३ १ २
स्तवव्रतेसोमतिष्ठन्तुकृष्टयः॥ ३॥ १॥

हे "इन्दो" सोम! "ईशानः" सर्वस्य स्वामी त्वम् "इमा" इमानि "भुवनानि"§ भूतजातानि "ईयसे" गच्छसि [ईङ्

* 'भुवनेषु—भुवनानि चतुर्थ्य'—इति वि०।

† 'वृषद्वाः—नृणां चक्षुभूतः'—इति वि०।

‡ 'नः—अस्मभ्यम्'—इति वि०।

¶ ऋ० वे० ७, २, १९, २।

§ 'भुवनानि—चतुर्थ्य—इति वि०।

गतौ (दि० आ०), "दिवादिभ्यः श्यन् (३,१,६९)"—इति श्यन्]। किङ्कुर्वन्? "हरितः" हरितवर्णाः "सुपर्णैः" सुपतनात्मिका रथे "युजानः" योजयन्, "ताः" सुपर्णैः "ते" तव सम्बन्धिन्यः "मधुमत्" माधुर्योपेतं "घृतं" दीप्तं "पयः" उदकं "क्षरन्तु"। हे सोम! तव "व्रते" कर्मणि तिष्ठन्तु "क्षुष्टयः"* मनुष्याः सर्वे॥

"ईयसे"-"वीयसे"—इति पाठौ॥ ३ ॥ १.

॥ द्विरभ्यस्तं सौम्योत्तरम ॥

४र ३ ४ १ ४ र०
गोवित्यवस्ववसुविद्धिर।

२ २ २ १ १ १ १ ३र २ ४र ३
एयवायित्। एयवा२३४५यित्। रेतो३१२३४। धाइन्दो

र १ २ १ २ ३ २ २ र र
भुवनेष्ठ। पिताःपिताः। तुवा३१२३४म्। सुवीरोऽसि

र १ २ १ २ १ २ २ र
सोमवि। श्ववायिच्छूवायित्। तन्त्वा३१२३४। नरउँप

र ३ २ ४ १ ४ १ ५र २ ४र
गिरे। मआइसा५ता६५६यि॥(१) त्वन्नश्चित्राअसिसो

५ २ २ २ १ १ १ १ ३ २ २र
मवि। श्वताः। श्वता२३४५ः। पवा३१२३४। मानवृष

र र १ २ १ २ २ १ र
भताविधा। वसायिवसायि। सना३१२३४ः। पवस्व

१ २ १ २ २ १ २र र
सुमद्विर। एयवाएयवात्। वया३१२३४म्। स्यामभुवने।

२ २ ४ ४र र ३ ४ ३र ४ ५र र
षुजा३यिवा५सा६५६यि॥(२) ईशानइमाभुवनानिई।

---

* 'क्षुष्टयः—कवयः पण्डिताः मेधाविनः'—इति वि०।

२ १ २ १ १ १ १ २ १ २ २ २ २
यस्तायि। यस्ता२३४५यि। युजा३१२३४। नदन्दोधरितः

१ २ १ २ ३२ १ २
सुप। णियाणियाः। तास्ता२१२३४यि। क्षरन्तु धु

१ २ १ २ २ २ २ २
मन्तम्। पयाःपयाः। तवा३१२३४। व्रतेसोमतिष्ठ।

३ २ ४
तुकाइष्टीमूयाइमूइः(३) ॥ ७ * ॥ [१]

२२ १ २ १ १ १ २
॥ श्येनम्॥ गोवित्पवस्ववसुवायित्। हा२३यिरा।

१ २२ १ २२ ३ १ २ १ २
ण्याविद्रेतो३आउवा२३। धाइया। दोभुवनेषुवार्पायि

२ १ ३ २ १ २ १ २२ १
ताः। त्वꣳसौ३हो। वायिरोअसा३१उवा२३। सोम

२ १ २ १ ३ २ १ २ १
आ। विश्ववित्तन्त्वाना१रा२ः। उयौ३हो। गायिरेम

२ २ १ १ १ २ १
आ३१उवा२३। ए३। सनआ३२ ॥(१) त्वन्नृचक्षाअसि

१ २ १ २ १२ १ २
सो। मा२३वायि। स्वातःपवा३१उवा२३। मानआ।

१२ ३ २ १ ३ २ १ २
वृषभताविधावासायि। सनौ३हो। पावस्ववा३१उवा

२ २ २ १ २ १ ३ २
२३। सुमदा। हिरण्यवद्वयाꣳस्या१मा२। भवौ३हो।

---

* ज० मा० ८प्र० १अ० ७खा०।

१ १ २ १ १ १ २ १ १ १ १
नायिषुजा३१उवा२३। ए३। वसआ३२ ॥(२) इंग्रानइमा

२ १ १ १ २ १ २ १ २
भुवना। ना२३ई। यासेयुजा३१उवा२३। नाइया।

१ १ १ १ ऽ ऽ १ २
दोहरितःसुपार्णायाः। तास्तौ३हो। ह्वारन्तुमा३१उवा

२ १ १ १ २ १ ऽ २
२३। धूमदा। घृतम्ययस्तवाब्रा१ता२यि। सोमौ३ह्वौ।

१ १ १ २ १ १
तायिष्ठन्तुक्षा३१उवा२३। ए३। ष्टयआ३२(३)॥१८*॥ [२]१

अथ द्वितीयर्चे—

प्रथमा।

१ १ २ १ २ १ १
पवमानस्यविश्ववित्प्रतेसर्गाअसृक्षत।

१ १ २ १ १ १ १
सूर्यस्येवनरश्मयः॥ १ †॥

हे "विश्ववित्" विश्वस्य द्रष्टः सोम! "पवमानस्य" क्षरतः "ते" तव "सर्गाः"‡ सृज्यमाना धाराः "सूर्यस्येव रश्मयः" सूर्यस्य किरणा इव प्रकाश्यमानाः "न"—इति सम्प्रत्यर्थे। इदानीं "प्रासृक्षत" प्रासृज्यन्त॥ १॥

---

* ऋ० मा० २३प्र० १अ० १८खा०।

† ऋ० वे० ७, १, २७, २।

‡ 'सर्गाः—सृष्टयः उदकसङ्घाताः'—इति वि०।

अथ द्वितीया।

२ १ २ २ २१ॐ २ १ २ २१ २
केतुङ्कृण्वन्दिवस्परिविश्वारूपाभ्यर्षसि।

२ १ २
समुद्रःसोमपिन्वसे ॥ २ * ॥

हे "सोम!" "समुद्रः" † समुद् द्रवन्ति यस्माद्रसाः स समुद्रः स त्वं "केतुं" ‡ प्रज्ञानं "कृण्वन्" कुर्वन् अस्माकं "विश्वा रूपा" विश्वानि रूपाणि "दिवः" ¶ अन्तरिक्षात् "अभ्यर्षसि" § अभि पवसे "पिन्वसे" नानाविधानि च धनानि अस्मभ्यं प्रयच्छसि ॥२॥

अथ तृतीया।

२ १२ २२ २१२ ३ १ २
जज्ञानोवाचमिष्यसिपवमानविधर्मणि।

१ २ ३ १२ २२
क्रन्दन्देवोनसूर्यः ॥ ३ ॥ २

हे "पवमान" सोम! "देवः न सूर्यः" द्योतमानः सूर्यइव "जज्ञानः" प्रादुर्भूतस्त्वं "विधर्मणि" विधारके** दशापवित्रे "क्रन्दन्" ध्वनन् "वाचम्" शब्दम् "इषसि" प्रेरयसि ॥

---

* ऋ० वे० ७, १, २७, २।

† 'समुद्रः—समुद्रभूतस्त्वम्'—इति वि०।

‡ 'केतुर्ध्वजः नम्'—इति वि०।

¶ 'दिवस्परि—द्युलोकस्योपरि—इति वि०।

§ 'अभ्यर्षसि—आभिमुख्येन रक्षसि'—इति वि०।

‖ ऋ० वे० ७, १, २७, ४।

** 'विधर्मणि—विविधे कर्मणि'—इति वि०।

"जग्मानः"-"हिन्वानः" —इति पाठौ, "क्रन्दन्" "अक्रान्" —इति च ॥ २ ॥ २

प्रसोमासइति सप्तर्चं तृतीयं सूक्तम् ;

तत्र, प्रथमा ।

१२ २२ २ १ १ २ १ १

प्रसोमासोअधन्विषुःपवमानासइन्दवः ।

१ २ ३ १ २

श्रीणानाअप्सुवृञ्जते ॥ १ * ॥

"पवमानासः" पूयमानाः "इन्दवः" दीप्ताः "सोमासः" सोमाः "प्राधन्विषुः" [धन्वति गतिकर्मा (निघ० २,१४,१४)†] प्रगच्छन्ति किञ्च "श्रीणानाः"† गोभिः श्रयमाणाः "अप्सु" वसतीवरीषु‡ "वृजन्ते" गच्छन्ति [व्रज व्रजी गतौ (भ्वा०,प०)] सम्पृच्छा भवन्तीत्यर्थः ॥

"वृजन्ते"-"मृजन्त"—इति पाठौ ॥ १ ॥

अथ द्वितीया ।

३ १२ २२ २ १ ३ १ ३ १ २ ३ २

अभिगावोअधन्विषुरापोनप्रवतायतीः ।

३ १२ २२

पुनानाइन्द्रमाशत ॥ २ ¶ ॥

---

* ऋ० वे० ९, ८, १४, १ ।

† 'श्रीणानाः—श्रीणनं मिश्रणं, मिश्रायमाणाः'—इति वि० ।

‡ 'अप्सु—सप्तम्या वञ्चवचनमिदं तृतीया-वञ्चवचनस्य स्थाने द्रष्टव्यम्, अद्भिः—इति वि० ।

¶ ऋ० वे० ९, ८, १४, २ ।

"गावः" गमनशीलाः* "इन्दवः" सोमाः "अभि अध्वन्विषुः" दशापवित्रमभिगच्छन्ति। किमिव ? "प्रवता" प्रवणवता देशेन "यतीः" गच्छन्त्यः "आपः नः" आपइव †, पश्चात् "पुनाना" "इन्द्र" प्रणीयितुम् आयत व्याप्नुवन् ॥२॥

अथ तृतीया।

१ २ ३ १र २र ३ १ १
प्रपवमानधन्वसिसोमेन्द्रायमादनः।

१ २ ३ १र २र
नृभिर्यतोविनीयसे ॥ ३ ॥

हे "पवमान" सोम! "उन्द्राय" इन्द्रस्य "मादनः" मादयिता त्वं "प्रधन्वसि" प्रगच्छसि पवित्रम्। तदेवाह—"नृभिः" नेतृभिः ऋत्विग्भिः "यतः" गृहीतः‖ "विनीयसे"§ हविर्द्धानात्‖ ॥

"मादनः--"पातवे"—इति पाठौ ॥३॥

* 'गावः—आदित्यरश्मयः उदकानि सोमरसा गावश्च'—इति वि०।

† 'आपोन—न-शब्द उपमार्थीयः आपइव "प्रवता यतीः" यथा प्रवणेन आपो गच्छन्ति तद्वत् सोमेन अभिषूयमाणेन गावो धन-धान्य-देवताश्च प्रवणा भवन्ति, अतएवं पुनाना इन्द्रमायत'—इति वि०।

‡ ऋ० वे० ६, ८, १४, २।

¶ 'यतः—नियतः संयत इति यावत्, अथवा यमु बन्धने ऋत्विग्भिर्बद्धः सोमवद्धेन'—इति वि०।

§ 'विनीयसे—विविधं नीयसे'—इति वि०।

‖ 'अथवा पवमान प्रधन्वसि पावं प्रतीन्द्रपानाय तदर्थं हविर्धानात् विनीयसे' —इति ऋग्वेदेऽधिका व्याख्या।

अथ चतुर्थी।

२ २ १८ २८ २ २ २ १ २ १ २
इन्दोयदद्रिभिःसुतःपवित्रम्परिदीयसे।

२ २ १ २ २ १ २
अरमिन्द्रस्यधाम्ने ॥ ४ * ॥

हे "इन्दो" त्वं "यद्" यदा "अद्रिभिः" ग्रावभिः "सुतः" अभिषुतः "पवित्रं" दशापवित्रं† "परिदीयसे" परिगच्छसीत्यर्थः। तदा "इन्द्रस्य" "धाम्ने" स्थानाय धारकायोदराय वा "अरं" पर्याप्तोऽभि ॥

"परिदीयसे"--"परिधावसि"—इति पाठो ॥ ४ ॥

अथ पञ्चमी।

१ २ ७१ २ ३ १२ ३ १ २
त्वꣳसोमनृमादनःपवस्वचर्षणीधृतिः।

२ २ १ २ ३ १ २
सस्निर्योअनुमाद्यः ॥ ५ ‡ ॥

* हे "सोम!" "नृमादनः नृणां मादयिता "चर्षणीधृतिः" चर्षणीभिः ऋत्विग्भिः प्रजाभिः धृतस्त्वं "पवस्व"। "यः" त्वं "सस्निः" शुद्धः "अनुमाद्यः" स्तुत्यः¶ स पवस्वेति समन्वयः ॥

"चर्षणीधृतिः"-"चर्षणीसहे"—इति पाठो ॥ ५ ॥

---

* ऋ० वे० ९, ८, १४, ४।

† 'पवित्रं परिदीयसे—द्वितीयैकवचनमिदं षष्ठ्येकवचनस्य स्थाने द्रष्टव्यम् पवित्रस्योपरि दीयसे'—इति वि०।

‡ ऋ० वे० ९, ८, १४, ५।

¶ 'अनुमाद्यः—यस्य पश्चात् देवता माद्यन्ति स अनुमाद्यः'—इति वि०।

अथ षष्ठी।

१ २ ३ १ २ ३ १ २ ३ १ २
पवस्वशूचहन्तमउक्थेभिरनुमाद्यः।

१ २ ३ १ २ ३ २
शुचिःपावकोअद्भुतः॥ ६* ॥

हे सोम! "हच्चहन्तमः" शत्रूणामतिशयेन हन्ता त्वं "पवस्व" क्षर। कीदृशस्त्वम्? "उक्थेभिः" शस्त्रैः "अनुमाद्यः" स्तुत्यः "शुचिः" शुद्धः† "पावकः" अन्यस्य शोधकः‡ "अद्भुतः" महान्¶, एवं महानुभावः पवस्व॥

"हच्चहन्तमः"--"हच्चहन्तम"—इति पाठौ॥ ६॥

अथ सप्तमी।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ २
शुचिःपावकउच्यतेसोमःसुतःसमधुमान्।

३ १ २ ३ २
देवावीरघशꣳसहा॥ ७ §॥ ३

"सुतः" अभिषुतः"मधुमान्"माधुर्योपेतः "सः"सोमः "शुचिः" स्वयं शुद्धः "पावकः" शोधकश्च उच्यते तथा "देवावीः" देवाना-

---

* ऋ० वे० ६, ८, १४, ६।

† 'शुचिः—दीप्तः'—इति वि०।

‡ 'पावकः—पावन स्वभावः'—इति वि०।

¶ 'अद्भुतः—अपूर्वः नान्यो द्वितीयः'—इति वि०।

§ ऋ० वे० ६ ८, १४, ७।

मविता तर्पयिता* "अघसंसहा" अघं पापं शंसतीत्यघशंसा असुरास्तेषां हन्तेति चोच्यते ॥

"सुतःसमधुमान्"-"सुतस्यमध्वः"—इति पाठौ ॥ ७ ॥ ३

इति सामवेदार्थप्रकाशे उत्तरग्रन्थस्य षष्ठस्याध्यायस्य

प्रथमः खण्डः ॥ १ ॥

अथ द्वितीय-खण्डे—

प्रकविरिति सप्तर्चं प्रथमं सूक्तम्;

तत्र, प्रथमा ।

२ २ २ १ २ १ २ ३ १ २

प्रकविर्देववीतयेव्यावारेभिरव्यत ।

३ १ २र ३ १र २र

साङ्कान्विश्वाअभिस्पृधः ॥ १ † ॥

*"कविः" मेधावी सोमः "देववीतये" देवानां पानाय "अव्या वारेभिः" अविसम्बन्धिभिः वालैः दशापवित्रेण "अव्यत" अव्यते प्राप्यते, "साङ्कान्" शत्रूणां साढाङ्ग सोमः "विश्वाः स्पृधः" सर्वान् सङ्ग्रामान् हिंसकान् वा अभिभवतीति शेषः ॥

"अव्यावारेभिरव्यत"-"अव्योवारेभिरर्षति"—इति पाठौ ॥ १ ॥

---

* 'देववीतेः—देवानां भक्षयितुः'—इति वि० ।

† ऋ० वं० ६, ८, १०, २।

‡ 'साङ्कान्—साधन-स्वभावः'—इति वि० ।

अथ द्वितीया।

१२ १२ २ १ ३ २उ २ १ २ १ १
सच्चिष्वाजरितृभ्यआवाजङ्गोमन्तमिन्वति।

१ २ ३ १ २
पवमानःसच्चस्रिणम्॥ २ *॥

"स हि षां" स खलु "पवमानः" सोमः "जरितृभ्यः" स्तोतृभ्यः "गोमन्तं" "बहुभिर्गोभिर्युक्तं "सहस्रिणं" सहस्र-सङ्ख्याकं† "वाजम्" अन्नम् "आ" आभिमुख्येन "इन्वति" व्याप्नोति प्रयच्छतीत्यर्थः॥ २॥

अथ तृतीया।

२१ १ २ ३ १ २ ३ २ १ १ २ १ १
परिविश्वानिचेतसामृज्यसेपवसेमती।

१ २ ३ १ २
सनःसोमःअवोविदः॥ २ ‡॥

हे "सोम!" त्वं "चेतसा" स्वीयेनास्मदनुकूलेन चित्तेन "विश्वानि" सर्वाणि धनानि "मती" मत्या अस्मत्स्तुत्या "मृज्यसे" दशापवित्रेण शोध्यसे। ततः "पवसे" रसं क्षरसि।

---

* ऋ० वे० ९, ८, १०, २।

† 'सच्चिणं—सहस्र-पोषण-समर्थम्'—इति वि०।

‡ ऋ० वे० ९, ८, १०, ३।

एवम्भूतः "सः" त्वं "नः" अस्मभ्यं "अवः" अन्नं* "विदः"† देहीति शेषः॥

"मृज्यसे"-मृग्यसे"—इति पाठौ॥ ३॥

अथ चतुर्थी।

३क २८ ३११ २८ २ १ १ ३ १ ३ २

अभ्यर्ष बृहद्यशोमघवञ्छ्रोध्रु वश्रयिम्।

१२ ३ २३ १ २

इषꣳस्तोतभ्यआभर॥ ४ ‡॥

हे"सोम!" त्वं "बृहद् यशः"महतीं कीर्त्तिम् "अभ्यर्ष" अभिगमय, "मघवन्नः" हविष्मन्नः¶ अस्मभ्यं "ध्रुवं"§ रयिं "धनं" च अभ्यर्ष। किञ्च "इषम्" अन्नं‖ "स्तोतभ्यः" अस्मभ्यम्** "आभर"आहर॥ ४॥

अथ पञ्चमी।

१ ३र ७१र २र२१ १

त्वꣳराजेवसुव्रतोगिरःसोमाविवेशिथ।

३ १ २

पुनानोवक्षिअद्भुत॥ ५ ††॥

---

* 'अवः—अन्नं यशो वा'—इति वि०।

† 'विदः—विद ज्ञाने, विद्लृलाभे, विद सत्तायाम्। अन्नलाभकरः'-इति वि०।

‡ ऋ० वे० ९, ८, १०, ४।

¶ 'मघवन्नो यजमानेभ्यः—इति वि०।

§ 'ध्रुवं स्थिरं'—इति वि०।

‖ 'इषम् अन्नं इष्टिं वा'—इति वि०।

** 'स्तोतभ्यः यज्ञभ्यः'—इति वि०। †† ऋ० वे० ९, ८, १०, ५।

हे "वक्षे" यज्ञादेर्वोढः! "अद्रुत!"* "सोम!" "सुव्रतः" सुकर्मा "पुनानः" त्वं "राजा इव" "गिरः" अस्मदीयाः "स्तुतीः "आविवेशिथ" आविशसि ॥ ५ ॥

अथ षष्ठी।

१र २र १ २ ३१२ ३ १ २ ३ १ २
सर्वन्हरण्यदुष्टरोमृज्यमानोगभस्त्योः।

१ २ ३१२
सोमश्चमूषुसीदति ॥ ६ † ॥

"सः" सोमः "वक्षिः" यज्ञादेर्वोढा "अप्सु" अन्तरिक्षे वर्त्तमानः "दुष्टरः" दुःखेन अन्यैस्तरणीयः "मृज्यमानः" शोध्यमानः "गभस्त्योः" हस्तयोः‡ एवम्भूतः सन् "चमूषु" पात्रेषु "सीदति"¶ ॥ ६ ॥

अथ सप्तमी।

३ २ ३१र २र ३ २ १ २
क्रीडुर्मखोनमꣳहयुःपवित्रꣳसोमगच्छसि।

१ २ १ २ ३ १ २
दधत्स्तोत्रेसुवीर्यम्॥ ७ §॥ ४

---

* 'अद्रुतचमूनपूर्व'—इति वि०।

† ऋ० वे० ९, ८, १०, ६।

‡ 'गभस्त्योः—बाहुभ्योः'—इति वि०।

¶ 'चमूषु सीदति—भक्षणीयेषु तिष्ठति'—इति वि०।

§ ऋ० वे० ९, ८, १०, ७।

हे "सोम!" "क्रीङ् क्रीड़न-शीलत्वं "मंहयुः"* [मंहति-दानकर्मा (निघ०३,२०,१०) दानेच्छुः "मखो न" दानमिव "पवित्र" "गच्छसि"। किं कुर्वन्? "स्तोत्रे" स्तुतिकर्त्रे "सुवीर्यं" शोभन-वीर्यं "दधत्" प्रयच्छन् ॥ ७॥ ४

अथ यवंयवमिति चतुर्ऋचं द्वितीयं सूक्तं;

तत्र, प्रथमा।

१ २ ३ १ २ ३ १ २ ३ १ २

यवंयवन्नोऽन्धसापुष्टम्पुष्टम्परिस्रव।

१ २ ३ १ २

विश्वाचसोमसौभगा ॥ १† ॥

हे "सोम"। त्व "नः" अस्मभ्यम् "पुष्टंपुष्टम्"‡ अत्यन्तं बहुलं "यवंयवं"¶ पुनःपुनर्युतं रसम् "अन्धसा" अन्नरूपया धारया "परिस्रव" क्षर [तच्च प्रार्थयितुस्तृष्णयात्यन्तं पीड़ितत्वात् "आबाधे च (८,१,१०)"—इति द्विर्भावः। आबाधनमाबाधः पीड़ा प्रयोक्तृधर्मो नाभिधेयधर्म इत्युक्तम्]। अपिच "विश्वा" विश्वानि "सौभगा"§ सौभगानि धनानि परिस्रव अस्मभ्यं प्रयच्छेत्यर्थः ॥ १ ॥

---

* 'मंहयु—पूजेयुः अथवा मंहयुः पूजाकारः—इति वि०।

† ऋ० वे० ७ १, १२, १।

‡ 'परिस्रवसामान्या पुष्टिः धनधान्यादिना वर्धिष्णुः पुष्टिर्यज्ञनिष्पादिका'—इति वि०।

¶ 'यव—अभ्यासे भूयानर्थः प्रतीयते। यवं धान्यविशेषं वरपुरोडाशेभ्यो हेतुभूतम्'—इति वि०

§ "सुपांसुलुक् (७, १, ३९)"—इत्यादिरूपम्।

अथ द्वितीया।

१ १ १ १

अथ चतुर्थी ।

२ २ २ २।२ २।२।२ २ २।२ २

योजिनातिवजीयतेहन्तिशत्रूमभीत्य ।

१ १

सपवस्वसहस्रजित् ॥ ४ * ॥ ५

हे "सहस्रजित्" असङ्ख्यात-शत्रूणां जेतः ! † सोम ! "यः" भवान् "जिनाति" शत्रून् जयति स्वयं शत्रुभिः "न जीयते"। प्रकाशान्तरेण तदेवाह—"शत्रुमभीत्य" स्वयमेव शत्रुमागत्य "हन्ति" किन्तु तेन न हन्यते इति शेषः। एवम्भूतः स त्वं धारया आ पवस्व ॥ ४ ॥ ५

अथ ऋचात्मके तृतीयसूक्ते—

प्रथमा ।

२ २ १ २ २।२ २ २ २।२

यास्तेधारामधुश्चुतोऽसृग्रमिन्दऊतये ।

१ २ २ २।२।२

ताभिःपवित्रमासदः ॥ १ ‡ ॥

भो "इन्दो" सोम ! "ते" तव "मधुश्चुतः" मधुर-रसस्य स्रोतः यिनः "याः" "धाराः" "ऊतये" रक्षणाय "असृग्र" सृज्यन्ते "ताभिः" धाराभिः त्वं "पवित्रम्" ¶ "आसदः" आसीद ॥ १ ॥

---

* ऋ० वे० ७, १, १२, ४ ।

† 'स पवस्व सहस्रजित् सहस्राणां जेता'—इति वि० ।

‡ ऋ० वे० ७, १, २५, २ ।

¶ 'पवित्र'—इत्यादिपवित्रम्'—इति वि० ।

अथ द्वितीया।

२ २१२ २१२३१२ २२ २ १ २
सोअर्षेन्द्रायपीतयेतिरोवाराण्यव्यया।

१२३२ ३२ ३२
सीदन्नृतस्ययोनिमा ॥ २ * ॥

हे सोम। "सः" अभिषुतः त्वम् "अव्यया" अविमयानि "वाराणि" वालानि "तिरः" तिरस्कुर्वन् "ऋतस्य" यज्ञस्य "योनिं" कारणभूतं दशापवित्रम् "आसीदन्" आभिमुख्येन उपविशन् "इन्द्राय" इन्दस्य "पीतये" पानाय "अर्षं" क्षर ॥

"ऋतस्ययोनिमासीदन्"--"योमावनेषु"—इति पाठो ॥ २ ॥

अथ तृतीया।

१ २ २१२ ३१ २ ३ १ २
त्वꣳसोमपरिस्रवस्वादिष्टोअङ्गिरोभ्यः।

३ २१ १२ २२
वरिवोवित्तनम्पयः ॥ ३ † ॥ ६

हे "सोम!" "स्वादिष्टः" स्वादुतमः "वरिवोवित्"‡ अस्मदभिलषितस्य धनस्य लम्भकश्च त्वम् "अङ्गिरोभ्यः" अङ्गिरसा-

---

* ऋ० वे० ७, १, २५, २।

† ऋ० व० ७, १, २५, ४।

‡ 'वरिवोवित्—वरिव०=वरिष्ठः, वित्=भव०'—इति वि०।

मर्थाय* "घृतं"दीप्तं† "पयः" क्षीरवत् सारभूतं रसं "परिस्रव" परिक्षर ॥

"त्व सोम"-"त्वमिन्दो" —इति पाठौ ॥ ३ ॥ ६ ॥

इति सामवेदार्थप्रकाशे उत्तरार्चग्रन्थस्य षष्ठस्याध्यायस्य द्वितीयः खण्डः‡ ॥ २ ॥

अथ तृतीय-खण्डे¶—

प्रथम-ऋचे, प्रथमा ।

१२ १ २ ३क १८ २ २ १
तवश्रियोवर्ष्यस्येवविद्युतो

१८ २ २ १ २ २ १ २
अग्नेश्चिकित्रउषसामिवेतयः ।

१८ २८ २ १ १ २ १ १ २
यदोषधीरभिसृष्टोवनानिच

१ १ २ १ २ ३ १८ २८ ३ १ २
परिस्वयञ्चिनुषेअन्नमास्यनि ॥ १ §॥

"अग्नेः" अङ्गनादि-गुण-युक्तस्य "तव" "श्रियः" रश्मि-लक्षणा विभूतयः"चिकित्रे"प्रज्ञायन्ते । तत्र दृष्टान्तः—"वर्ष्यस्येव॥

* 'अङ्गिरोभ्यः—अङ्गिरो नाम देवास्तेभ्योऽर्थे'—इति वि० ।

† "घृतमाज्यम्"—इति सर्वं द्वीयव्याख्या ।

‡ 'उक्थं वक्ष्यमाणं । त्रिणवं सौमिकञ्च तत् । पञ्चमस्यः'—इति वि० ।

¶ 'दर्शपौर्णमास्यानि; आग्नेयस्थमसाज्यम्'—इति वि० ।

§ ऋ० वे० ८, ४, २०, ५ ।

मूले तु "वर्ष्यस्येव „ —इति स-वकारः श्रूयते ।

विद्युतः" यथा वर्षितुर्मेघस्य सम्बन्धिन्यो विद्युतः, "उषसामिवेतयः" यथा चोषसाम् 'एतयः' गमनशीलाः व्याप्ताः प्रकाशाः प्रज्ञायन्ते, तद्वदित्यर्थः। कदेत्यत्राह—"यद्" "यदा" त्वम् "ओषधीः" व्रीहियवाद्याः "वनानि" अरण्यानि च अभिलक्ष्टो लष्टः द्रष्टुं विलष्टः सन् "स्वयम्" आत्मना "आसन्" आस्ये मुखे "अन्नम्" अदनीयं स्थावर-लक्षणं "परि चिनुषे" परिक्षिपसीत्यर्थः॥

"विद्युतोग्नेः"-"विद्युतश्चित्रा"—इति, "उषसामकेतवः"-"उषसामिवेतयः"—इति पाठौ॥ १॥

अथ द्वितीया।

१ २ २ १उ २ १ २
वातोपजूतइषितोवशाꣳअनु
२ १उ २ १ २ ३ १ २
त्वष्टुयद्वन्नावेविषदितिष्ठसे।
१ २ २ २ २१ २१
आतेयतन्तेरथ्योऽइऽयथापृथक्
१ २ २ १ १ १ २
सर्वाꣳस्त्वग्नेअजरस्यधक्षतः॥ २*॥

हे "अग्ने!" त्वं "यद्" यदा "वातोपजूतः" वायुना कम्पितः† "वशान्" कान्तान् वनस्पतीन् "अनु" प्रति "त्वष्टु" क्षिप्रम्

---

* ऋ० वे० ८, ४, २१, २।

† 'वातोपजूतः—वायुप्रेरितः'—इति वि०।

"इषितः" प्रेषितश्च* सन् "यज्ञा" यज्ञानि यष्टव्यानि यजनसाधनानि द्रव्याणि "वेविषत्" व्याप्नुवन् "विदिष्ठवे" इतस्ततो गच्छति; तदानीम् "अजरस्य" जरा-रहितस्य "धक्षतः" दहतः "ते" तव "अर्धांसि"† तेजांसि "यथा" "रथः" रथिनः तद्वत् "आ पृथक्" पृथगायन्त गच्छन्ति ॥

"अजरस्य"-"अजराणि"—इति पाठो ॥ २ ॥

अथ तृतीया।

३ २-३१२ ३१२
मेधाकारंविदथस्यप्रसाधन

३१८ २८ . ३१२ ३२
मग्निꣳहोतारम्परिभूतरम्मतिम्।

१८ २८ ३१२ ३२७
त्वामर्भस्यहविषःसमानमित्त्वां

३१२ ३१
महोवृणतेमान्यन्त्वत्॥ २‡ ॥ ७

"मेधाकारं" प्रज्ञायाः कर्त्तारं "विदथस्य" यज्ञस्य "प्रसाधनम्" प्रकर्षेण साधकं "होतारं" देवानामाह्वातारं "परिभूतरम्" अतिशयेन सर्वेषा मभिभवितारं "मति" मन्तारं "त्वां" "त्वाम्" "अग्निम्" वयमृत्विजः वृणीमहे—इति शेषः।

हे अग्ने! "त्वामित्" त्वामेव "अर्भस्य" अल्पस्यास्य "हविषः"

---

* 'इषितः—इषु इच्छायाम्, इच्छासंयुक्तः'—इति वि०।

† 'अर्धांसि—बलानि'—इति वि०।

‡ ऋ० वे० ८, ४, २१, २।

पुरोडाशादिकस्य भक्षणार्थमिति शेषः। "समानमित्" सदैव ऋत्विजः "हवते" प्रार्थयन्ते "महः" महतः सोमात्मकस्य हविषः भक्षणार्थं त्वामेव हवते "त्वत्" त्वत्तः "अन्यम्" अतिरिक्तं देवं "न" हवते ॥

"परिभूतरं"-"परिभूतमम्"—इति छन्दोगब्राह्मणानां पाठौ, "त्वामर्भस्य हविषः"-"तमिदर्भं हविषि"—इति, "इत्त्वाऽमहो"-"तमिन्महो"—इति च ॥ ३ ॥ ७

अथ द्वितीय-ऋचे—प्रथमा।

३ १ २ ३ १२ १२ ३ १ १
पुरुरुणाचिध्यस्यवोनूनंवांवरुण।

२ ३१ २ ३ २
मित्रवꣳसिवाꣳसुमतिम्॥ १ *॥

हे मित्रावरुणौ! "वां" युवयोः "पुरुरुणा" [प्रथमार्थे तृतीया (३,१,८५)† पुरोरपि बहु उरु बहुतरम् अथवा पुरु च तदुरु च पुरुरु] अत्यन्तं बहुतरमित्यर्थः, तादृक् "अवः" रक्षणं "नूनं" निश्चयेन "अस्ति हि" [हि प्रसिद्धौ; चिदिति पूरणः] हे "वरुण!" हे "मित्र!" "वां" युवयोः "सुमतिम्" अनुग्रहबुद्धिम् "वंसि"‡ सम्भजेयम्॥ १॥

---

* ऋ० वे० ४, ४, ८, १।

† "अत्र सोः सुपांसुलुगित्याकारः"—इति ऋ०-भाष्ये।

‡ 'वंसि—वासयसि'—इति वि०।

अथ द्वितीया।

१ २ ३ १ २ २ १ २ १ २
तावाꣳसम्यगद्रुक्षाणेषमध्यामधामच।

२ १ २
वयंवाम्मित्रावरुणा ॥ २* ॥

हे "अद्रुहाणा" हे अद्रोग्धारौ! "ता" तौ प्रसिद्धौ "वां" युवां सम्यक् स्तुमइति शेषः। स्तोतारः "वयम्" "इषम्" अन्नं "धाम च" आधारम् "अश्याम" प्राप्नुयाम। हे "मित्रा" मित्रावरुणौ! "वां" स्तोतारौ वयं "स्याम" भवेम समृद्धा इति शेषः, युवाभ्यां स्वभूता वा स्याम॥

"धामच"-"धायसे"—इति पाठौ, "मित्रा"-"रुद्रा"—इति च॥ २॥

अथ तृतीया।

३ १ २ ३ १ २ ३ १ २ ३ २
पातन्नोमित्रापायुभिरुतत्रायेथाꣳसुत्रात्रा।

३ २ ३ १ २ ३ १ २
साच्छामदस्यून्तनूभिः॥ ३† ॥ ८

हे "मित्रा" मित्रावरुणौ देवौ! युवां "नः" अस्मान् "पायुभिः" रक्षणैः "पातं" रक्षतम्। "उत" अपिच "सुत्रात्रा" शोभनेन

---

* ऋ० वे० ४, ४, ८, २।

† ऋ० वे० ४, ४, ८, ३।

त्राणेन "त्रायेथां" पालयेथाम् [इष्टप्राप्तानिष्ट-परिहार-भेदेन भेदः —स्तोत्रादि-वैकल्याच्छत्रोर्वा त्रायेथाम् अभिमत-प्रापणेन रक्षत-मित्यर्थः]। वयञ्च "तनूभिः" * पुत्रादिभिः सहिताः स्वीयै-रङ्गैर्वा "दस्यून्" शत्रून् "सह्याम" अभिभवेम ॥

"मिभा"-"रुद्रा"—इति पाठौ, "त्रायेथां"-"त्रायेताम्" —इति, "सह्याम"-"तुर्याम"—इति च ॥ ३ ॥ ८

अथ तृतीय-तृचे †—

प्रथमा ।

३ २ ३ १ २ ३ २ ३ १र २र

उत्तिष्ठन्नोजसासहपीत्वाशिप्रे अवेपयः ।

१ १ २ १ ३ २

सोममिन्द्रचमूसुतम् ॥ १ ‡ ॥

हे "रुद्र !" त्वं "पीत्वा" "ओजसा" बलेन "सह" "उत्तिष्ठन्" ¶ "शिप्रे" हनू "अवेपयः" अकम्पयः मदावेशादिति भावः । किं पीत्वा ? "चमू" चम्वोरधिषवण-फलकयोः "सुतम्" अभिषुतम् "सोमम्" ॥

"पीत्वा"-"पीत्वी"—इति पाठौ ॥ १ ॥

---

* 'तनूभिः—चिभिः युष्मभिः शरीरैरभिष्टुतैरिति वाक्यशेषः'—इति वि० ।

† 'ऐन्द्रमाज्यम्'—इति वि० ।

‡ य० वे० ८, ३९ = ऋ० वे० ६, ४, २८, ४ ।

¶ 'उत्तिष्ठन्—ओजसा सह वीर्येण उत्थानं कुरु । सोमं पिब । पीत्वा शिप्रे वनूनासिके च मनः सन् अवेपयः'—इति वि० ।

अथ द्वितीया।

१ २ ३ १ २ ३।२ १२
अनुत्वारोदसीउभेस्पर्द्धमानमदेताम्।

१ ३ १२ ३ १ १
इन्द्रयद्दस्युहाभवः॥ २*॥

हे "स्पर्द्धमान" शत्रुभिः सह स्पर्द्धां कुर्वाण इन्द्र! "त्वा" त्वाम् "अनु" लक्ष्य "उभे रोदसी" उभे अपि द्यावापृथिव्यौ "मदेतां" हृष्येताम् "यद्" यदा "दस्युहा भवः" शत्रूणां हन्ता भवसि, तदा मदेतामिति सम्बन्धः॥

"स्पर्द्धमानमदेतां"-"हृष्यमाणमक्षपेताम्"—इति पाठौ॥२॥

अथ तृतीया।

१ १३१ २ ३।२ १२ ३ १ १
वाचमष्टापदीमहन्नवस्रक्तिमृतावृधम्।

१ ३ १ २ ३क १२
इन्द्रात्परितन्वम्ममे॥ ३†॥ ९

"अष्टापदीम्" अष्टाभिर्दिग्भिर्विदिग्भिश्चाष्टापदीं,‡ "नवस्रक्तिम्" उपरिस्थितेनादित्येन नवस्रक्तिम् आसु दिक्षु व्याप्तामि-

---

* ऋ० वे० ६, ५, २८, ५।

† ऋ० वे० ६, ५, २९, ३।

‡ 'अष्टापदीम्—चत्वारो वेदाः साङ्गानि च अष्टापदानि'—इति वि०

त्यर्थः*, "ऋताह्वधं" यज्ञस्य वृद्धिं कुर्वन्तीं,† "वाचं" स्तुतिमयीं, परिपूर्णात्‡ "तन्वं तनूं न्यूनां सतीम् ¶ "अहम्" "परि ममे" न्यूनेयत्तां करोमीत्यर्थः§। कात्स्न्र्येन स्वरूपं स्तुत्या विषयीकर्तुमशक्यत्वादितिभावः॥

"ऋताह्वधम्"-"ऋतास्पृग्रम्"—इति पाठो॥ २॥ ९

अथ चतुर्थ-ऋचे ॥—

प्रथमा।

१२ २२ ३२ १८ २८

इन्द्राग्नीयुवामिमेऽभिस्तोमाअनूषत।

१२ ३२

पिबतꣳशम्भुवासुतम्॥ १** ॥

हे "इन्द्राग्नी!" "युवाम्" "इमे" "स्तोमाः" स्तोतारः†† "अभ्यनूषत" अभिष्टुवन्ति। हे "शम्भुवा" सुखस्य भावयितारा विन्द्राग्नी "सुतम्" अभिषुतम् अस्मदीयं सोमं "पिबतम्" ॥ १ ॥

---

* 'नवखन्नि'—नव खन्नयः कोणाः नाः नविष्यवमानाः ऋचो नव अथवा नवखन्नि चिह्नत्स्तौमिकम्'—इति वि०।

† 'ऋताह्वधम्—ऋतो यज्ञः अथवा ऋत मन्नं तं वर्द्धयतीति ऋताह्वधम्'-इति वि०।

‡ 'इन्द्रान् परि—उपरि'—इति वि०।

¶ 'तनुं—शरीरम्'—इति वि०।

§ 'ममे—मिनोति'—इति वि०।

॥ 'ऐन्द्राग्नमाज्यम्'—इति वि०।

** ऋ० वे० ४, ८, २४, २।

†† 'स्तोमाश्चिह्नत्यच्छदग्रादय.'—इति वि०।

अथ द्वितीया ।

२ ३ १ २ ३ १ २ ३ १ २ ३ १ २
यावाꣳसन्तिपुरुस्पृद्योनियुतोदाशुषेनरा ।

१ २ ३ २ २ १ २
इन्द्राग्नीताभिरागतम् ॥ २* ॥

हे "नरा" नेतारौ ! "इन्द्राग्नी !" "वां" युवयोः स्वभूताः "पुरुस्पृहा" पुरुभिर्बहुभिः स्पृहणीयाः† "दाशुषे" हवींषि-दत्तवते यजमानार्थम् उत्पन्नाः "नियुतः" अश्वाः "सन्ति"‡ हे इन्द्राग्नी ! "ताभिः" "नियुद्भिः" सह "आगतम्" आग-च्छतम् ॥ २ ॥

अथ तृतीया ।

२ ३ १ २ ३ २ ३ १ २ २ २ ३ २
ताभिरागच्छतन्नरोपेदꣳसवनꣳसुतम ।

१ २ ३ १ २
इन्द्राग्नीसोमपीतये ॥ ३¶ ॥ १०

हे "नरा" नेताराविन्द्राग्नी ! [सूयतेऽभिसूयतइति सवनः सोमः] "इदं सवनम्"§ इमं सोमं "सुतम्" अभिषुतम् "उप"

---

* ऋ० वे० ४, ८, २४, २ ।

† 'पुरुस्पृहा—पुरुस्पृहौ बहुभिः स्पृहणीयौ'—इति वि० ।

‡ 'सन्ति—बहुवचनमिदं द्विवचनस्य स्थाने द्रष्टव्यम्, सतः'—इति वि० ।

¶ ऋ० वे० ४, ८, २४, ४ ।

§ 'इदं प्रातःसवनं सुतं सोमम्'—इति वि० ।

प्रति* [यद्वा, इदं प्रातःसवनम् उप अस्मिन् सवने सुतमभिषुतं सोमं प्रति] "ताभिः" नियुद्भिः† आगच्छतम् । किमर्थम् ? "सामपीतये" अस्य सोमस्य पानार्थम् ॥ ३ ॥ १०

इति सामवेदार्थ-प्रकाशे उत्तरार्चस्य षष्ठस्याध्यायस्य तृतीयः खण्डः‡ ॥ ३ ॥

अथ चतुर्थ-खण्डे¶, प्रथम-ऋचे—

प्रथमा ।

१ १ ३ १ २ ३ १ २ २ ३ १ २
अर्षा सोम द्युमत्तमोभि द्रोणा नि रोरुवत् ।

२ ३ १ ३ १ ३ २
सीद न्योनौ वने ष्वा ॥ १§ ॥

हे "सोम" पवमान ! "द्युमत्तमः" अतिशयेन दीप्तिमान् "वनेषु" अरण्येषु मध्ये॥ "योनौ" स्वकारण-भूते पर्वतादि-

---

* 'उप—समीपे'—इति वि० ।

† 'ताभिः—तृतीया-बहुवचनमिदं, लौकिकं व्यत्ययेन तैः पालनैः'—इति वि० । "नियुतो वायोः"—इति च निघ० १, १५, १० ।

‡ 'उक्तं प्रातःसवनम्'—इति वि० ।

¶ 'इदानीं माध्यन्दिनं सवन मभिधीयते'—इति वि० ।

§ ऋ० आ० ६, १, २, ७ (२भा० ६२ ५०) = ऋ० वे० ७, २, ४, ४ ।

॥ 'वसु—उदकेषु'—इति वि० ।

स्थाने * "आसीदन्" सर्वतो गच्छंस्त्वं "द्रोणानि" [प्रयोग-बाहुल्यापेक्षमेतत् बहुवचनम्] द्रोणकलशान्† "अभि" लक्ष्य "रोरुवत्" पुनः पुनः भृशं वा शब्दं कुर्वन् "अर्षा" ‡ आगच्छ दशापवित्रमध्यान्निर्गतः सोमः अविच्छिन्न-धारया द्रोणकलशं पतन् शब्दं करोति खलु ॥

"योनौवनेष्वा' -"श्येनोमयोनिमा"—इति पाठे ॥ १ ॥

अथ द्वितीया ।

३ १र २र ६ २३१९ ६ १ ९

अस्माइन्द्रायवायवेवरुणायमरुद्भ्यः ।

१ २ ३ १ १

सोमाअषन्तुविष्णवे ॥ २¶ ॥

"अस्मा" वसतीवरी-नामधेयानामपां सम्भक्तारः [वनुषग सम्भक्तौ (भ्वा, प०) ; "जनसनेति (३,२,६७,) विट्, आत्वं विड्-वनोरिति (६,४,४१,) तादृगाः] "सोमाः" "अर्षन्तु" द्रोण-कलशमागच्छन्तु । किमर्थम् ? "इन्द्राय" सर्वदेवानां प्रथमत एव इन्द्रः सोमान् पिबति, तस्मात् तदनु वायुरुक्तः तस्मै च "वायवे", तदनन्तरं वरुणः सोमान् पिबति तस्मै च "वरुणाय", ततो "मरुद्भ्यः" एतन्नामकेभ्यो देवेभ्यः, "विष्णवे" सर्वजगद्-

---

* 'योनौ—द्रोणकलशे'—इति वि० ।

† 'द्रोणानि—द्रोणकलशसम्बन्धानि पात्राणि'—इति वि०

‡ "द्व्यचोऽतस्तिङ: (६,१,१३५)"—इति दीर्घ: ।

¶ ऋ० वे० ७, २, ५, १ ।

व्यपिने एतन्नामकाय देवाय च,—एतेभ्यः सर्वेभ्यः सोमा आगच्छन्त्वित्यर्थः ॥

"सोमा अर्षन्तु"-"सोमो अर्षति"—इति पाठौ ॥ २ ॥

अथ तृतीया।

१ २ ६ १ १ ३ १ २ ३ १ २ २ १ २

इषन्तोकायनोदधदस्मभ्यꣳसोमविश्वतः ।

१ २ ३ १ २

आपवस्वसहस्रिणम् ॥ ३* ॥ ११

हे "सोम!" त्वं "नः" अस्माकं "तोकाय" † पुत्राय "इषम्" अन्नं "दधद्" विदधत् प्रयच्छन् "सहस्रिणं" सहस्रसङ्ख्याकं धनं "विश्वतः" सर्वतः "अस्मभ्य" च "आपवस्व" आप्रापयं अस्मभ्यं पुत्राय च अन्न-धनादिकं प्रयच्छेत्यर्थः ॥ ३ ॥ ११

१ २ २ १ २ १ २ २ १ २

॥ शाकलम् ॥ अर्षासोमा२द्युमत्तमाः। अभिद्रोणा

२ १ २ २ १ १ २ २ १

निरोहꣳ२३वात्। सायिदा२न्। योनौवना २ ३ यि।

१ २ ५ १ २ २ १

ऊम्। षू३४५वोऽहाधि ॥(१) अस्माइन्द्रा२यवायवायि।

२ २ १ २ १ १ २ १

वरुणायमरुद्भा२३याः। सोमा२ः। आर्षन्तुवा२३यि।

---

* ऋ० वे० ७,२,५,१, ।

† 'पुत्राय पौत्राय'—इति वि० ।

१ २ ५ १ २ २ १
ऊम्। ष्णा ३ ४ ५ वो६ ह्वायि ॥(२) इषन्तोका २यनोद

२ १ २ १ २ १ २ १ १
धात्। अस्मभ्य २ सोमविश्वा २३ताः। आपा २। वास्व

२ १ १ २ ५
सद्वा २३। ऊम्। स्वा ३४५ यिणो६ ह्वायि (३) ॥ ३* ॥ [१]

२ २ २ १ ७ ३ १ २
॥ वार्शम् ॥ अर्षासोमा। द्युमात्ता ३ माः। अभि

२ १ ७ ३ ५ १ २ २
द्रो। णा। निरो २ ह्व २ ३४ वात्। सायिदन्यानाऽउ।

ऽ २ १२ १ ३ ५ २ २ २ २
ई ३ या। वने। षू २ वा २ ३४ औह्वोवा ॥(१) अस्माइन्द्रा।

१ २ १ १ १ २ १ ७ ३ ५
यवाया ३ वायि। वरुणा। या। मरू २ ङ्गा २ ३४ याः। सो

२ ऽ २ १ ३ ५ २ २
मार्अर्षा ३। ई ३ या। तुवि। ष्णा २ वा २ ३४ औह्वोवा ॥(२)

२ २ १ २ २ १ १ ७
इषन्तोका। यनोदा ३ धात्। अस्मभ्यम्। सो। मवा

३ ५ १ २ ऽ २ १
२ यिस्वा २ ३४ ताः। आपवस्वा ३। ई ३ या। सद्व। स्वा

३ ५ २ २ ९ ४
२ यिणा २ ३४ औह्वोवा। ऊ ३ २ ३४ पा (३) ॥ ४† ॥ [२]

१ २ ५ १
॥ सन्तनि ॥ अर्षाहाउ। सोमद्युमा ३ १ उवा २ ३।

---

* ऊ० गा० ३प्र० १अ० ३सा०।

† ऊ० गा० ७प्र० १अ० ५सा०।

५ १ २ २ १ ३ ११११ २ १
ता२३४माः । अभिद्रोणानिरोरुवा२३४५त् । सीदाग्ना
१ २ २ ५ १ १२
उ । योनौवना३१उवा२३यि । षू२३४षा ॥(१) अस्मा
२ १ २ १२१ २ १ २ ३ १ १ १ १ १२ २
इन्द्रायवायवेवरुणायमरुद्भिया२ ३ ४ ५: । सोमाश्चाउ ।
१ २ ५ १ १२ १२
आर्षन्तुवा३१उवा२३यि । ष्णा२३४वे ॥(२) दूषन्तोका
२२१ २ १ २२ १ १ १ १ १ १ १२ २ १
यनोदधदस्मभ्यꣳसोमविश्वता२३४५: । आपाश्चाउ । वा
२ ५
स्वसद्धा३१उवा२३ । स्त्री२३४णाम्(३) ॥ १३* ॥ [३]
१ २ २ १२ २ २ १
॥ प्राक्तरवर्णम् ॥ आयिषाम् । नोकायनोदधात् ।
१ १ २ १ २ २
अस्मभ्यम् । सोमवा२यि । स्वता३१उवा२३ । ऊ ३ ४
५ २१ १ २ १ १ २
पा । आपवा२३स्वा । सद्धस्तिणा३माउवा२३ । ऊ३२
५
३४पा(३) ॥ १९ ॥ [४]
२ २ १ २ १२ २ १ २ १
॥ जरावोधीयोत्तरम् ॥ दूषन्तोकोवा । यानोदधात् । अस्मा

---

* ऊ० गा० ७प्र० २अ० १२सा० ।

† ऊ० गा० १ ०प्र० १अ० १९सा० ।

र १ र १ ४ ५
भ्या२३ऽसो । मविस्वाताः । आपाघा१स्वा२३सा । ह ।

३ २
स्विणो३४५ई । डा(३) ॥ १५* ॥ [५]

॥ मार्गीयवम् ॥ १ र १ १ १
अप्सौहोवा । आयिन्द्रा२ । य

१ २ ५ १ २र १ २ १र र
वाया२३४यायि । वरुणाय । मरुद्भ्या१या२: । सोमाः ।

१ २ ३ ५ १ ३ ५र र
पा । औ३त्तोयि । आ२३४र्षा । ह्व२वा२३४औहोवं ।

२ १ १ १ १ १
ए३ । ष्ण्वा२३४५यि(२) ॥ २† ॥ [६] ११

अथ प्रमाथरूपे द्वितीयसूक्ते—

प्रथमा ।

१ २ १ १ ३ २ २ १ ३ २ २ १ २
सोमऽउधाणःसोतृभिरधिष्णुभिरवीनाम् ।

१ २ ३ १ २ ३ १ २ १ १ २ ३ १ २
अश्वयैवहरितायातिधारयामन्द्रयायातिधारया ॥ १‡ ॥

---

* ऋ० गा० ११प्र० १अ० १५सा० ।

† ऋ० मा० १८प्र० २अ० २सा० ।

‡ ऋ० आ० ६, १, २, ५ (२भा० ८८पृ०)=ऋ० वे० ७, ५, १३, ६ ।

"सोतृभिः" अभिषुण्वद्भिः ऋत्विग्भिः "स्वानः"* अभिषूयमाणः "सोमः" "अवीनां" "स्नुभिः"† ["मांसृत्स्नूनामुपसंख्यानम् (६,१,६३)"—इति सानु-शब्दस्य स्नु-भावः] समुच्छितैर्वालैः पवित्रैः "अधि याति" अधिकं गच्छति। "उ"—इति प्रसिद्धौ। "अश्वया इव" वडवया इव "हरिता" हरित-वर्णया धारया "याति" "मन्द्रया" मदकारिण्या द्रोणकलशमधिगच्छति॥

"उष्वाणः"-उषुवाणः"—इति पाठौ॥ १॥

अथ द्वितीया।

३ २उ ३ १ २ ३ १ २ ३ १ २
अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः।

३ २उ ३ १ २ २ १र २र
समुद्रन्नंवरणान्यग्मन्मन्दीमदायतोशते॥ २ ॥ १२

"गोमान्" गोयुक्तः सोमः "अनूपे" निम्ने देशे‡ कलशे "गोभिः" गोर्विकारैः क्षीरादिभिः§ सह "अक्षाः" क्षरन्ति।

---

* क्वचित् तु "ष्वाणः"—इति मूर्द्धण्य-षकार-णकारोपेतः श्रूयते। तत्र "पूर्वपदात् (८, ३, १०६)"—इति षत्वम् सुतरां णत्वञ्च।

† "स्नुभिः"—इति मूर्द्धण्यपाठौ क्वचित्, "पूर्वपदात् (८, ३, १०६)"—इति च तत्र दीर्घः।

‡ 'अनूपे—उच्चैः प्रदेशे'—इति वि०।

§ 'गोभिः—चन्द्रक-मज्जानं गोभिर्वा'—इति वि०।

तदेवोच्यते—"सः" सोमः आत्मनोभिस्रवणार्थं "दुग्धाभिः गोभिः" सह "अक्वाः" चरति [चरतेर्लुङि रूपम्]। किञ्च "समुद्रं न" यथा समुद्रमुदकानि गच्छन्ति तद्वत् "संवरणानि" सम्भजनीयानि रसरूपाणि अन्नानि* द्रोणकलशम् "अग्मन्" गच्छन्ति [गमेर्लुङि च्लेर्लुगि रूपम्] किञ्च "मन्दी" मदकरः सोमः "मदाय" मदार्थं "तोशते"† हन्यते अभिषूयते [तोशतिर्बधकर्मा (निघ० २,१९,२९)] ॥ २ ॥१२

॥ मानवोत्तरम् ॥ ह्वोवायि। सोमउष्वाणःसोत्वभिः।
ह्वोवायि। आधिष्णुभिरवीनाम्। आश्वयेव। हारिता
याऽ१। तिधाऽरा२३४या। मन्द्रायाऽ२३४याऽ३। ताऽ२
यिधाऽरा२३४औह्वोवा। राऽ२३४या। ह्वोवायि। मन्द्रया
यातिधारया। ह्वोवायि। मन्द्रयायातिधारया। आ
नूपे। गोमान्गोऽ१। भाऽरयिराऽ२३४क्षाः। सोमोदूऽ२३
ग्धाऽ३। भाऽरयिराऽ२३४औह्वोवा। आ २ ३ ४ क्षाः॥(२)

---

* 'संवरणानि—उदकानि'—इति वि०।

† 'तोशते—तुष्टि व्याप्तौ व्यापयति'—इति वि०।

१ २ २ २१२ १ २ १ २
ह्वोवायि। सोमोदुग्धाभिरद्भाः। ह्वोवायि। सोमोदु

२ २ ७ १ १ ७ १ ७ ३
ग्धाभिरद्भाः। सामुद्रन्न। सांवरणा३१। नियार्२आ२३

५ १ १ २ १ ३ ५२ २
४गमान्। मन्दायिमा२३दा३। या२तो२३४औहोवा।

१ ५
ओ२३४ते(३) ॥ ५* ॥[१]

१ १ १२ २ १ २
॥ आनूपन्ध्वश्वम् ॥ सोमाःसोमाः। उष्वाणा३ःसोतृ

१ २ १ २ १
भी२ः। आधिष्णुभिः। आवा१यिना२म्। आस्वा

१ १ २ २ २१२ २ १ २ २
२येवा२। हरितायातिधारा२३या। मन्द्रायाइया३।

१ ४ २ ५ १ २ १ २ २
ता२३इधा३। रा३४५योर्हाय ॥(१) मन्द्रामन्द्रा। या

२ १ १ १ २२ २ १ २
यातो३धारा१या२। मान्द्रयाया। तिधारा१या२।

१ १ १२ २ २ १ २ १२ २ २
आनू२पेगो२। मान्गोभिरा२३द्भाः। सोमोदूइध्वा३।

१ ४ २ ५ १२ २ १२ २
भा२३यि३। रान्आ२३४५त्तोर्हायि ॥(२) सोमाःसोमाः।

२ १ २ १ १२ २ २ १ २
दुग्धा३भायिरा१द्भा२ः। सोमोदुग्धा। भायिरा१द्भा

---

* ऊ० गा० ३ प्र० १ अ० ५ सा०

१ १ १ २ १ १ २ १
२ः। साम्२द्रान्ना२। संवरणानियार३म्मान्। मन्दा

१ ४ १ ४ २ ५
ग्रिमाइदाइ। याइतोइ। आ३४५ तो ६ द्वायि(३)

॥ ६* ॥ [२]

२२ १ २ ५२ १ १
॥ वाम्रम् ॥ सोमउष्वाणःसो। ह्वाइह्वाइयि। तर

४ ५ १ १
३४। भिस्तृभीवा। अधाह्वो२यि। ष्णुभायिह्वौ२।

१ २ १ २२ १ २ १ १
आवा१यिना२म्। आश्वथेव। हरायितायो। तिधा

१ ४ १ १ १ १
उवाइ। ज२३४पा। रया२। मान्द्रा२याया२।

१२ १ ५२ २ ४ ३ ४२ ५२ २
तिधा। रा२या२३४ औह्होवा ॥(१) मन्द्रयायातिधा।

१ २ १ २ ५ १
ह्वाइह्वाइयि। रा२३४। यारयोवा। मान्द्राह्वो२यि।

१२ १ २ १ २२२२ १ १
यायाह्वो२। तायिधा१राया२। आनूपेगो। मान्गो।

१ १ १ ५ १ १ १
भिराउवाइ। ज३४पा। अश्वा२ः। सोमो२दूग्धा२भि

१ ३ ५२ २ ३२ ४२ १२ ४ ५२ १
रा२। ह्वा२३४ औह्होवा ॥(२) सोमोदुग्धाभिरा। ह्वाइ

ज०गा० ३प्र० १च० ६सा०।

२ १ २ ५ १२
ह्वाइयि। आ२३४। त्ताःत्तोवा। सोमोहो२यि।
१ १ १ १ २ १
दुग्धाह्वो२। भायिरा१त्ता२:। सामुद्रञ्च। संवारा
२ ३ २ २ ५ १ १
णा। नियाउवा३। ऊ३४पा। अगमा२न्। मान्दी
१ १२ ३ ५२ २ २
२माद्वा२। यतो। ष्ठा२ता२३४औह्वोवा। *ऊ३२३४
५
पा(३)॥ ७*॥ [३]

२२ ३ ५
॥ अग्नेस्तिग्मधनम्॥ सोमउष्वा। णःसोतृ२३४भीः।
२ १ २ ५ २ २
अधायिष्णुभिरा३१उवा२३। वी२३४नाम्। आश्वाये२
५ २ १ २ २ १ ५ २
३४वा। हरितायातिधा३१उवा२३। रा२३४या। मा
२ ३ ५ २ ५
न्द्रायाय३४या। तिधा३१उवा२३। रा २ ३ ४ या॥(१)
२ २ ३ ५ २ १ २ २
मन्द्रयाया। तायिधारा२३४या। मन्द्रयायातिधा३१उ
५ २ ३ ५ १ २ २
वा२३। रा२३४या। आनूपे२३४गो। मान्गोभिरा३१
५ २ ३ ५ २
उवा२३। आ२३४त्ताः। सोमोदू२३४ग्धा। भिरा३१

---

* ऊ० गा० ३प्र० १अ० ७सा०।

५ २र र १
उवा२३। आ२३४त्ना: ॥(२) सोमोदुग्धा। भायिरा२

५ २र १र र २ ५
३ऽत्ना:। सोमोदुग्धाभिरा३१उवा२३। आ२३४त्ना:।

२ ३ ५ २ १ २
सामूद्रा२३४न्ना। संवरणानिया३१उवा२३। आ २ ३ ४

५ २ ३ ५ २ १
ग्मान्। मान्दीमा२३४दा। यतो३आउवा२३। आं

५
२३४ते३) ॥ ८* ॥ [४]

५ ४ २ ४ ५र ४ ५ १
॥ अभीवर्त्तः ॥ मन्द्रा३याइयाऽतिधारयोवा। मान्द्र

१र र १ २ १ र र ५र
याया। तिधारा१या२। आनूपेगो३१२३४। मान्गो।

१ २ र १ २ ७ २ १
भायिरा१त्ना२:। सोमोदू१ग्धा२। भिरा३। आ२३४

३ १ १ १ १
५। त्ना२३४५:(२) ॥ ३† ॥ [५]

५र र २ ४र ५ ४ ५ २र १ २ १
॥ कालेयम् ‡ ॥ सोमोदू३ग्धाभिरत्ना:। सोमोदुग्धा।

२ १ २ ३ २ १ २४र ५
भिरत्ना२३:। समुद्रन्ना३। सा२३४म्। वरणानि।

---

* ऊ० गा० ३प्र० १ऋ० ८सा०।

† ऊ० गा० ८प्र० २ऋ० ३सा०।

‡ "मद्राकालेयम्"—इति ख० पु० पाठः

आ३ग्मान्। मन्दायिमद्दौ। वा३४३ओ३४वा। यतो५
शतायि। च्छो५ई। डा(२) ॥ ४* ॥ [६]

॥ मानवाद्यम् ॥ मन्द्रयाया। तिधारा२३४या।
तायिधारा २ ३ ४ या। मान्द्रयाया। तिधारा१या २।
अ। नू। पे। गोमान्गो३। भा२यिरा२३४च्चाः। सोमो
दुग्धा२३। भा२यिरा२३४ओच्छोवा। आ२३४च्चाः(२)।
॥ १३† ॥ [७]

॥ आग्नेस्त्विष्णिधनम् ॥ अनूपेगो। मान्गोभायिरा
२३४च्चाः। सोमोदुग्धाभिरा३१उवा२३। आ२३४च्चाः।
सामूद्रा२३४न्ना। संवरणानिया३१उवा२३। आ २ ३ ४
गमान्। मान्दीमा२३४दा। यतो३आउवा२३। आ२
३४ते(२) ॥ ३ङ्क ॥ [८]

---

* ऋ० गा० ८प्र० २ अ० ४सा०।
† ऋ० गा० ९प्र० २ अ० १३सा०।
‡ ऋ० गा० १९प्र० २ अ० ३सा०।

॥ वैष्णवाद्यम् ॥ सोमउष्वा। ऽउःसो २तृभायिः। तृ
भिः। अधिष्ण,भिरा २वीनाम्। वीनाम्। अश्वयेवद्ध
रितायातिधा २रया। रया। मन्द्रयायातिधा २रया २३।
रा २। या २३४। औहोवा ॥(१) मन्द्रयाया। तिधा २ः
रया। रया। मन्द्रयायातिधा २रया। रया। अनूपे
गोमान्गोभिरा २क्षाः। क्षाः। सोमोदुग्धाभिरा २क्षा २३ः।
आ २। क्षा २३४। औहोवा। सोमोदुग्धा। भि
रा २क्षाः। क्षाः। सोमोदुग्धाभिरा २क्षा २३ः। आ २।
क्षा २३४। औहोवा ॥(२) सोमोदुग्धा। भिरा २क्षाः।
क्षाः। सोमोदुग्धाभिरा २क्षाः। क्षाः। समुद्रन्नसवर
णानियंग्मान्। ग्मन्। मन्दीमदायतो २श्नता २३यि।
श्रा २। ता २४३। औहोवा। ऊ ३ २३४पा(३) ॥१८*॥ ९]

---

* ऊ० गा० २०प्र० १अ० १८ सा०।

॥ वैष्णवोक्तरम् ॥ सोमः। सोमाः। उष्वाणःसोतृ
भिः। अधायिष्णू३भायिः। आआऔ३हो। वायिना२
म्। अस्वयेवहरितायातिधा१रा३या। मन्द्राऔ३हो।
याायातिधो२३४वा। रा५योर्ह्वायि(१) ॥ २०* ॥ [१०]

॥ यौक्तस्रुचम् ॥ सोमउष्वाणःसो। तृभायिः। अ-
धिष्णुभिरवा२३यिनाम्। आस्वा२। येवहरितायाति
धारा२३या। मान्द्रा२। याायातिधो२३४वा। रा२३४
या ॥(१) मन्द्रयायातिधा। रया। मन्द्रयायातिधारा
२३या। आनू२। पेगोमान्गोभिरा२३क्षाः। सोमा
२:। दूग्धाभिरो२३४वा। आ२३४क्षाः ॥(२) सोमोदु
ग्धाभिरा। क्षाः। सोमोदुग्धाभिरा२३क्षाः। सामू२।
द्रप्नसंवरणानिया२३ग्मान्। मान्दी२। मादायतो२३४
वा। शा२३४ते(३) ॥ १† ॥ [११] १२

---

* ऋ० गा० २०प्र० १अ० २०सा०।

† ऋ० गा० २०प्र० २अ० १सा०।

अथ तृतीय-ऋचे—

प्रथमा।

१ १ २ १ २ २ १ २ १ २ १ १ १
यत्सोमचित्रमुक्थ्यन्दिव्यम्पार्थिवंवसु।

१ १ २ १२ १२
तन्नःपुनानआभर॥ १*॥

हे "सोम!" "यत्" "चित्र"" चायनीयम् "उक्थ्यम्"† स्तुत्यं "दिव्यं" दिवि भवं "पार्थिवं" पृथिवी-सम्बन्धञ्च यत् "वसु" धनमस्ति "तत्" "नः" अस्मभ्यम् "पुनानः" पूयमानः सन् "आभर" आहर॥ १॥

अथ द्वितीया।

१ १ २ १२ १२ २ २ २ १ १ २ १ १
वृषापुनानआयूंषिस्तनयन्नधिबर्हिषि।

२ २ २ उ १ १ १
हरिःसन्योनिमासदः॥ २‡॥

हे सोम! "आयूंषि" यजमानादीनामृत्विजां जीवितकालान् "पुनानः" शुद्धान् कुर्वन् "वृषा" कामानां वर्षकस्त्वं "स्तनयन्"‥ शब्दं कुर्वन् "अधि बर्हिषि" [अधीति सप्तम्यर्थानुवादी] आस्तीर्णे दर्भे "हरिः सन्" हरितवर्णः सन् "योनिं" स्वकीयं स्थानम्¶ "आसदः" आसीद॥

---

* ऋ० वे० ९, ८, ९, १।
† 'चक्थ्यं—नामरूपम्'—इति वि०।
‡ ऋ० वे० ९, ८, ९, २।
¶ 'योनिं—द्रोणकलशम्'—इति वि०।

"आयूंषि"-"आयुःषु"—इति पाठौ, "आसदः"-"आसदत्"—इति च ॥ २ ॥

अथ तृतीया ।

१२ २२ ३१ १ २११
युवꣳहिस्थःस्वःपतीइन्द्रश्चसोमगोपतौ ।
२ १२ ३१२
ईशानापिप्यतन्धियः ॥ ३* ॥ १३

हे "सोम !" त्वम् "इन्द्रश्च" युवं हि" युवां खलु "स्वःपती" सर्वस्य स्वामिनौ "स्थः" भवथः । तथा "गोपतौ" गवां पालकौ† "ईशाना" ईश्वरौ सन्तौ "धियः" अस्मदीयानि कर्माणि‡ "पिप्यतम्" प्याययत¶ ॥

"युवंहिस्थःस्वःपती"-"युवंहिस्वःस्थपंती"-इति पाठौ ॥ ३ ॥ १३

२२ १२ १२
॥ शैशवम् ॥ यत्सोमचित्रमुक्थायाम् । दिव्यम्पार्थिं
२१ ५ २१ ४ २२
वंवसू । तन्नःपू२३४ना । नस्वाꣳभाꣳरा६५६ ॥(१) वृषा
२२ १२ १ २ १ २१
पुनानस्वायूꣳषी । स्तनयन्नधिबर्हिषायि । हरिःसा२३
५ २२ ४ २ १
४न्यो । निमाꣳसाꣳदा६५६ः ॥(२) युवꣳहिस्थःस्वःपा

---

* ऋ० वे० ६, ८, ९, २ ।

† 'गोपती—गवां पती, उदकानामादित्यरश्मीनां वा'—इति वि० ।

‡ 'धियः—बुद्धयः'—इति वि० ।

¶ 'पिप्यतं—पालयतम्'—इति वि० ।

१ १ २ २ १२१२ ५ ३ २
तौ । इन्द्रश्चसोमगोपतायि । ईशानाऽ३४पौ । प्यता

४
न्धाप्यायाऽ५६ः(३) ॥ ८* ॥ [१] १३

इति सामवेदार्थप्रकाशे उत्तरायन्यस्य षष्ठस्याध्यायस्य
चतुर्थः खण्डः† ॥ ४ ॥

अथ पञ्चम-खण्डे‡ प्रथम-ऋचे—

प्रथमा ।

१ १ १ २ ३ १ २ ३ १२ २
इन्द्रोमदायवावृधेशवसेवृत्रहानृभिः ।

२४ १ २ ३ १ ३ १२ २ ३
तमिन्महत्स्वाजिषूतिमर्भेहवामहे

१२ २२ १ १
सवाजेषुप्रनोविषत् ॥ १¶ ॥

---

* ऋ० गा० १प्र० १अ० ६सा० ।

† 'उक्थो माध्यन्दिनः पवमानः'—इति वि० ।

अतोऽनन्तरं विवरणतया इदैव शक्वरीः प्रस्तुत्य ता एव व्याख्याताः । तथाहि—'इदानीं इष्टानि भवन्ति, तत्र पञ्चमेऽहनि शक्वर्यः इष्टं भवति ता उच्यन्ते ; —छन्दो-दैवत-ब्राह्मणानि परिभाषासिद्धानि "विदा मघवन्" सर्वज्ञः त्वं मघवन्'—इत्यादि । एवञ्चैतन्नये उत्तरायन्योयमेव षष्ठानाम्नार्चिकः न तु ग्रन्थान्तरच्छन्दआर्चिकपरिशिष्ट-भूतः, परमेतदतीव चिरं मूलपुस्तकदर्शनेन तथात्वे व्याघातात् ।

‡ 'बार्हद्गिरं ब्रह्मसाम'—इति वि० ।

¶ ऋ० आ० ५, १, ३, २ (१भा० ८३६पृ०) = ऋ० वे० १, ६ १, १ ।

"वृत्रहा" वृत्रस्यावरकस्य वृष्टि-निरोधकस्य मेघस्यासुरस्य वा हन्ता । यद्वा, आवरकाणां शत्रूणां हन्ता, "इन्द्रः" "मदाय" हर्षार्थं "शवसे" [बलनामैतत् (निघ०२,९,३) बलार्थश्च "नृभिः" यज्ञस्य नेतृभिः ऋत्विग्भिः "वृधे" स्तोत्र-शस्त्र-रूपाभिः स्तुतिभिः प्रवर्द्धितो बभूव । स्तुत्या हि देवता प्राप्त-बला सती प्रवर्द्धते । "तम् इत्" तमेवेन्द्रम् "महत्सु" प्रभूतेषु "आजिषु" सङ्ग्रामेषु "ऊतये" रक्षां कुर्वन्तमितिशेषः "हवामहे" अस्माकं रक्षणाय आह्वयामहे । ["उत" अपिच "ईम्" एनम् एवम्भूतमिन्द्रम्*] "अर्भे" अल्पे सङ्ग्रामे हवामहे अस्माभिराहुतः सन्निन्द्रः "वाजेषु" सङ्ग्रामेषु "नः" अस्मान् "अविषत्" प्रावतु प्रकर्षेण रक्षतु ॥ ["ऊतिमर्भे"--"उतेमर्भे"—इति पाठौ ॥ वावृधे—वृधेः कर्मणि लिट् तुजादित्वादभ्यासस्य दीर्घत्वम्† । नृभिः—"सावेकाच (६,१,१६८)"—इति प्राप्तस्य विभक्त्युदात्तत्वस्य "नृचान्यतरस्यां (६,१,१८४)"—इति प्रतिषेधः । हवामहे—ह्वयतेर्लटि "ह्वः (६,१,३२)"—इत्यनुवृत्तौ "बहुलञ्छन्दसि (६, १, ३४)"—इति सम्प्रसारणम् , अपि गुणावादेशौ । अविषत्—अवरक्षणे (भ्वा०,प०) लेटअड़ागमः, "इतश्च लोपः (३, ४, ९)—इति इकारलोपः, "सिब्बहुलं लेटि (३,१,३४)—इति सिप् , तस्यार्द्धधातुकत्वात् वलादिलक्षण इट्] ॥ १ ॥

---

* ऋग्वेदीय-पाठमनुसृत्येदं व्याख्यानम् ।

† परं चिन्त्यमेतत्—"संहितायामभ्यासस्य अन्येषामपि दृश्यतइति दीर्घत्वम् । तुजादिलेऽपि तूतुजान इति वत् पदकाले दीर्घः स्यूयेत"—इति ऋग्वेद-व्याख्यावसरेऽयमेव सायणः ।

अथ द्वितीया ।

२ १ १ २ ३ १ उ ३ १ २ ७ २
असिहिवीरसेन्योसिभूरिपराददिः ।

१ २ ७ १ १ ३ १ र २ र
असिदभ्रस्यचिद्वधोयजमानाय

३ १ र १ र २ १ १
शिक्षसिसुन्वतेभूरितेवसु ॥ २* ॥

हे "वीर !" शत्रु-क्षेपण-कुशलेन्द्र ! त्वं "सेन्यः असि" सेनार्हो भवसि†, त्वमेकोऽपि सेना सदृशो भवसीत्यर्थः । "हि"‡ यस्मादेवं तस्मात् प्रभूतं शत्रूणां धनं "पराददिः" परादाता शत्रूणां पराङ्मुखं यथा भवति तथा आदाता "असि" भवसि "दभ्रस्य चित्" अल्पस्य नामैतत्¶ अल्पस्यापि तव स्तोतुः§ "वृधः" वर्द्धयितासि, तथा "यजमानाय" यागं कुर्वते "सुन्वते" सोमाभिषवं कुर्वते पुरुषाय "शिक्षसि" अर्पयितं धनं ददासि [शिक्षतिर्दानकर्मा (निघ० ३, २०, ८)] यस्मात् "ते" तव "वसु"

---

* ऋ० वे० १, ६, १, २ ।

† विवरण-नथे 'वीरसेन्य'—इत्येकं पदम्, अतएवैवं व्याख्यातम्—वीरसेन्यः—वीराः सेन्या यस्य सौ वीरसेन्यः'—इति । परन्तत् पदद्वयं विरुद्धम्, तत्र "वीर सेन्यः"—इति छेद-स्वरयोर्दर्शनात् ।

‡ 'हीति पदपूरणः'—इति वि० ।

¶ "दभ्रम्"—इति निघण्टौ तृतीयस्य 'तृतीये ह्रस्वनामसु चष्टमभिति दर्शनात् ।

§ 'दभ्रस्य—ध्वंसकस्य'—इति वि० ।

धनं "भूरि" बहुलं अक्षयं धनं विद्यते तस्मात् ददासीति भावः ॥ [परादादिः—डुदाञ् दाने (जुहो०उ०) "आदृगमहन जन (३,२,१७१)"—इति कि-प्रत्ययः; लिङ्वद्भावाद् द्विर्वचने कुत्वम्, "आतो लोप इटि च (६,४,६४)"—इत्याकारलोपः । दधः—दधेरन्तर्भावितण्यर्थादिगुपध-लक्षणः कः । सुन्वते—"शतुरनुमः (६,१,१७३)"—इति विभक्तेरुदात्तत्वम् ॥ २ ॥

अथ तृतीया ।

२ २ १ १ २ १ २ ३ १ १ ३ १ २
यदुदीरताजयोधृष्णवेधीयतेधनम् ।
३ १ १ २ २ २ ३ २ ३ ३ १ १
युङ्क्ष्वामदच्युताहरीकृष्णःकंवसौ
३ १ २ ३ १ २
दधोऽस्माऽइन्द्रवसौदधः ॥ ३* ॥ १४

[अत्रेदमाख्यानम्—'रहूगण-पुत्रो गोतमः कुरु-सृञ्जयानां† राज्ञां पुरोहित आसीत्, तेषां राज्ञां परैः सह युद्धे सति स ऋषिः अनेन सूक्तेन इन्द्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामास'—इति । तस्य च तत्पुरोहितत्वं वाजसनेयिभिराम्नातम्—"गोतमोऽह वै राहूगण उभयेषां कुरु-सृञ्जयानांः पुरोहित आसीत्"—इति ।] "यत्" यदा "आजयः" सङ्ग्रामाः "उदीरते" उद्गच्छन्ति उत्पद्यन्ते तदानीं "धना" धनं "धृष्णवे" यो धृष्णुः धर्षयिता

* ऋ० सा० ४, १, १, ९ (१भा० ८४४पृ०) = ऋ० सं० १, ६, १, ३ ।

†, ‡ "सञ्जयानां"—इति रा० सा० पु० पाठः ।

